सा दसरहस्स दिन्ना, परिणीया तेण वरविभूईए । अह कमलसंकुलपुरे, सुबन्धुतिलओ निवो तत्थ ॥१०७॥

मित्ता य महादेवी, दुहिया चिय केकई ललियरूवा । सा दसरहेण कन्ना, परिणीया नाम सोमित्ती ॥१०८॥

एवं जुवईहि समं, परिभुञ्जइ दसरहो महारज्जं । सम्मत्तभावियमई, देव-गुरूपूयणाभिरओ ॥१०९॥

जे भरहाइनराहिवसूरा, उत्तमसत्ति-सिरीसंपन्ना ।
ते जिणधम्मफलेण महप्पा, होन्ति पुणो विमला-ऽमलभावा ॥११०॥

॥ इय पउमचरिए सुलकोसलमाहप्पजुत्तो दसरहउप्पत्तिभिहाणो नाम बावीसइमो उद्देसओ समत्तो ॥

---

दशरथः-

तस्य महादेव्याः पृथिव्यां द्वौ सुतौ समुत्पन्नौ । प्रथमश्चानन्तरथो द्वितीयः पुनर्दशरथोजातः ॥१०१॥

माहेश्वरनगरपतिं मित्रं श्रुत्वा सहस्रकिरणं सः । प्रव्रजितो निर्विण्ण एतस्मात् संसारवासात् ॥१०२॥

अनरण्योऽपि नरपतिः पुत्रमेव दशरथं स्थापयित्वा राज्ये । निष्क्रामति सुतसमग्रः पार्श्वे मुन्यभयसेनस्य ॥१०३॥

षष्ठाष्टमदशमद्वादशैः र्मासाद्र्धमासक्षपणैः । कृत्वा तप उदारमनरण्यः प्रस्थितो मोक्षम् ॥१०४॥

साध्वप्यनन्तरथोऽनन्तबल-वीर्यशक्तिसंपन्नः । संयमतपोनियमधरो यथास्तमितो महीं भ्रमति ॥१०५॥

अरुहस्थले नरेन्द्रः सुकोशलस्तस्यैव महिलायाः । अमृतप्रभाया दुहिता कन्याऽपराजिता नाम ॥१०६॥

सा दशरथाय दत्ता परिणीता तेन वरविभूत्या । अथ कमलसंकुलपुरे सुबन्धुतिलको नृपस्तत्र ॥१०७॥

मित्रा च महादेवी दुहितैव कैकयी ललितरुपा । सा दशरथेन कन्या परिणीता नाम सौमित्री ॥१०८॥

एवं युवतिभ्यां समं परिभुनक्ति दशरथो महाराज्यम् । सम्यक्त्वभावितमति र्देवगुरुपूजनाभिरतः ॥१०९॥

ये भरतादिनराधिपशूरा उत्तमशक्ति-श्रीसंपन्नाः । ते जिनधर्मफलेन महात्मानो भवन्ति पुन र्विमलाऽमलभावाः ॥११०॥

॥ इति पद्मचरित्रे सुकोशलमहात्मययुक्तो दशरथोत्पत्यभिधानो नाम द्वाविंशतितम उद्देशः समाप्तः ॥

---

१. नियमरओ-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २३. बिहीसणवयणविहाणं

अह अन्नया कयाई, सहाए मज्झम्मि दसरहो राया । चिट्ठइ सुहासणत्थो, ताव च्चिय नारओ पत्तो ॥१॥
अब्भुट्ठिओ य सहसा, नरवइणा आसणे सुहनिसण्णो । परिपुच्छिओ य भयवं !, कत्तो सि तुमं परिब्भमिओ? ॥२॥
दाऊण य आसीसं, भणइ तओ नारओ जिणहराणं । वन्दणनिमित्तहेउं, पुव्वविदेहं गओ अहयं ॥३॥
अह पुण्डरीगिणीए, सीमन्धरजिणवरस्स निक्खमणं । दिट्ठं मए महायस !, सुरअसुरसमाउलं तत्थ ॥४॥
सीमंधरभगवन्तं, नमिऊणं यचेइयाइँ तत्थ पुणो । मन्दरगिरिं गओ हं, पणमामि जिणालए तुट्ठो ॥५॥
सुरगणसेवियसिहरं, काऊण पयाहिणं नगवरिन्दं । तुरियं च पडिनियत्तो, अभिवन्दन्तो जिणहराइं ॥६॥
तो नारहण भणिओ, साएयवई ! सुणेहि मह वयणं । अवसारेसु य लोयं, जेण रहस्सं निवेएमि ॥७॥
ओसारियम्मि लोए, कहेइ तो नारओ नरवइस्स । वन्दणकएण नवरं, तिकूडसिहरं गओ अहयं ॥८॥
तत्थ जिणसन्तिभवणं, अभिवन्देऊण चिट्ठमाणेणं । तुह पुण्णपभावेणं, तं मे अवहारियं वयणं ॥९॥
नेमित्तिएण सिट्ठं, सायरविहिणा उ रावणं समरे । जह दहरहस्स पुत्तो, मारिहिइ न एत्थ संदेहो ॥१०॥
जणयदुहियानिमित्तं, सुणिऊण बिहीसणो भणइ एवं । मारेमि दसरहं तं, जाव [1]सुओ से न संभवइ ॥११॥
अहमवि बिभीसणेणं, भणिओ जाणसि कहिं दसरहो सो? । जणओ य साहसु फुडं, भयवं ! मा कुणह वक्खेवं ॥१२॥
भणिओ बिभीसणो मे, अहयं न सुणेमि ताण उप्पत्ती । दाऊण उत्तरमिणं, इहागओ तुज्झ पासम्मि ॥१३॥

## २३. बिभीषणवचनविधानम्

अथान्यदा कदाचित्सभाया मध्ये दशरथो राजा । तिष्ठति सुखासनस्थस्तावदेव नारदः प्राप्तः ॥१॥
अभ्युत्थितश्च सहसा नरपतिनाऽऽसने सुखनिषण्णः । परिपृष्टश्च भगवन् ! कुतोऽसि त्वं परिभ्रान्तः ॥२॥
दत्वा चाशीषं भणति ततो नारदो जिनगृहाणाम् । वन्दननिमित्तहेतु पूर्वविदेहं गतोऽहम् ॥३॥
अथ पुण्डरीकिण्यां सीमंधरजिनवरस्य निष्क्रमणम् । दृष्टं मया महायश ! सुरासुरसमाकुलं तत्र ॥४॥
सीमंधरभगवन्तं नत्वा च चैत्यानि तत्र पुनः । मन्दरगिरिं गतोऽहं प्रणमामि जिनालयांस्तुष्टः ॥५॥
सुरगणसेवितशिखरं कृत्वा प्रदक्षिणां नगवरेन्द्रम् । त्वरितं च प्रतिनिवृत्तो ऽभिवन्दन् जिनगृहाणि ॥६॥
तदा नारदेन भणितः साकेतपते ! श्रृणु मम वचनम् । अपसारय च लोकं येन रहस्यं निवेदयामि ॥७॥
अपसारिते लोके कथयति ततो नारदो नरपतेः । वन्दनकृतेन नवरं त्रिकूटशिखरं गतोऽहम् ॥८॥
तत्र जिनशान्तिभवनमभिवन्द्य तिष्ठता । तव पुण्यप्रभावेन तन्मया ऽवधारितं वचनम् ॥९॥
नैमित्तिकेन शिष्टं सागरविधिना तु रावणं समरे । यथा दशरथस्य पुत्रो मारयिष्यति नात्र संदेहः ॥१०॥
जनकदुहिता निमित्तं, श्रुत्वा बिभीषणो भणत्येवम् । मारयामि दशरथं तं यावत्सुतस्तस्य न संभवति ॥११॥
अहमपि बिभीषणेन भणितो जानासि कुत्र दशरथः सः । जनकश्च कथय स्फुटं भगवन् ! मा कुरु व्याक्षेपम् ॥१२॥
भणितो बिभीषणो मयाहं न श्रृणोमि तयोरुत्पत्तिः । दत्वोत्तरमिममिहागतस्तवपार्श्वे ॥१३॥

१. सुओ नेव संभवइ-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं ते परिकहियं, सम्मद्दिट्ठिस्स तुज्झ नेहेणं। ताव करेहि उवायं, जाव य न बिभीसणो एइ ॥१४॥
दाऊण य उवएसं, अइतुरियं नारओ गओ मिहिलं। जणयस्स वि निस्सेसं, कहेइ वत्तं मरणहेउं ॥१५॥
मरणमहब्भयभीओ, नराहिवो दसरहो समप्पेउं। मन्तीण कोस-देसं, विणिग्गओ तत्थ पच्छन्नो ॥१६॥
ताव य मन्तीहि लहुं, लेप्पमयं दसरहस्स पडिबिम्बं। कारावियं मणोज्जं, सत्ततले भवणपासाए ॥१७॥
एसो च्चिय वित्तन्तो जणयस्स वि कारिओ य मन्तीहि। नट्ठा भमन्ति दोण्णि वि, पुहई पच्छन्नरूवधरा ॥१८॥
ताव य बिहीसणेणं, साएयपुरीए पेसिया पुरिसा। हिण्डन्ति गवेसन्ता, नराहिवं दिन्नदिट्ठीया ॥१९॥
रायहरं असमत्था, पविसेउं जाव ते चिरावेन्ति। ताव य साएयपुरिं, बिहीसणो आगओ तुरियं ॥२०॥
तडिविलसिएण सिग्घं, बिहीसणाणत्तियाए भवणवरं। पविसेऊण य छिन्नं, सीसं चिय कित्तिमनिवस्स ॥२१॥
लक्खारसपगलन्तं, सीसं तडिविलसिएण घेत्तूणं। रयणीए सयं दट्ठुं, पुणरवि दावेन्ति सामिस्स ॥२२॥
अन्तेउरे [1]पलावं, सोऊण सिरं महीए मोत्तूण। मणपवणजवणवेओ, बिहीसणो पत्थिओ लङ्कं ॥२३॥
परिवग्गो वि पलावं, काऊणं पेयकम्मकरणिज्जं। दहरहसमूसुयमणो, अच्छइ य दिसिं पलोयन्तो ॥२४॥
एत्तो बिभीसणो वि य, गुरूण सम्माण-दाण-पूयाई। कुणइ पयत्तेणं चिय, आणन्दं हरिसियमईओ ॥२५॥
परभवजणियं जं दुक्कयं सुक्कयं वा, परिणमइ नराणं तं तहा नेव मिच्छं।
इइ मुणिय विसेसं घोरसंसारवासं, कुणह विमलभावं मोक्खमग्गे जिणाणं ॥२६॥

॥ इय पउमचरिए बिहीसणवयणविहाणो नाम तेवीसइमो उद्देसओ समत्तो ॥

---

एवं ते परिकथितं सम्यग्दृष्टेस्तव स्नेहेन। तावत्कुरूपायं यावच्च न बिभीषण एति ॥१४॥
दत्वा चोपदेशमतित्वरितं नारदो गतो मिथिलाम्। जनकस्यापि निःशेषं कथयति वृत्तं मारणहेतुम् ॥१५॥
मरणमहाभयभीतो नराधिपो दशरथः समर्प्य। मन्त्रिणाम् कोशदेशं विनिर्गतस्तत्र प्रच्छन्नः ॥१६॥
तावच्च मन्त्रिभि र्लघुं लेप्यमयं दशरथस्य प्रतिबिम्बम्। कारितं मनोज्ञं सप्ततले भवनप्रासादे ॥१७॥
एष एव वृत्तान्तो जनकस्यापि कारितश्च मन्त्रिभिः। नष्टौ भ्रमतो द्वावपि पृथिवीं प्रच्छन्नरुपधरौ ॥१८॥
तावच्च बिभीषणेन साकेतपूर्यां प्रेषिताः पुरुषाः। भ्रमन्ति गवेषयन्तो नराधिपं दत्तदृष्टिकाः ॥१९॥
राजगृहमसमर्था प्रवेशितुं यावत्ते चिरायन्ति। तावच्च साकेतपुरिं बिभीषण आगतस्त्वरितम् ॥२०॥
तडिद्विलसितेन शीघ्रं बिभीषणाज्ञया भवनवरम्। प्रविश्य च छिन्नं शीर्षमेव कृत्रिमनृपस्य ॥२१॥
लाक्षारसप्रगलन्तं शीर्षं तडिद्विलसितेन गृहीत्वा। रजन्यां स्वयं दृष्ट्वा पुनरपि दर्शयन्ति स्वामिनः ॥२२॥
अन्तेपुरे प्रलापं श्रुत्वा शिरः मह्यां मुक्त्वा। मनःपवनजवनवेगो बिभीषणः प्रस्थितो लङ्काम् ॥२३॥
परिवर्गोऽपि प्रलापं कृत्वा प्रेतकर्मकरणीयम्। दशरथसमुत्सुकमनस आसते च दिशां प्रलोक्यन् ॥२४॥
इतो बिभीषणोऽपि च गुरूणां सन्मान-दान-पूजादि। करोति प्रयत्नेनैवानन्दं हर्षितमतिः ॥२५॥
परभवजनितं यद्दुष्कृत्यं सुकृतं वा परिणमति नराणां तत्तथा नैव मिथ्याम्।
इति ज्ञात्वा विशेषं घोरसंसारवासं कुरुत विमलभावं मोक्षमार्गे जिनानाम् ॥२६॥

॥ इति पद्मचरित्रे बिभीषणवचनविधानो नाम त्रयोविंशतितम उद्देशः समाप्तः ॥

---

१. विलावं-प्रत्य०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २४. केगइपरिणयण-वरसंपायणवण्णणं

तस्स भमन्तस्स तया, जं वत्तं तं सुणेहि मगहवई ! । तं ते कहेमि सव्वं, सुणेहि इह अवहितो होउं ॥१॥
उत्तरदिसाए नयरं, इह कोउयमङ्गलं मणभिरामं । तत्थाऽऽसी नरवसभो, गुणाहिओ सुहमई नामं ॥२॥
महिला से पुहइसिरी, धूया वि य केकई पवरकन्ना । पुत्तो य दोणमेहो, जोव्वणलायण्णपडिपुण्णो ॥३॥
कन्तिपडिपुण्णसोहा, रूवाईसयगुणेहि उववेया । विविहकला-ऽऽगमकुसला, सा कन्ना बुद्धिसारेणं ॥४॥
नट्टं सलक्खणगुणं, गन्धव्वं सरविहत्तिसंजुत्तं । जाणइ आहरणविही, चउव्विहं चेव सविसेसं ॥५॥
विज्जं सभेयभिन्नं, लिविसत्थं सद्दलक्खणं सयलं । गयतुरयलक्खणं चिय, गणियं छन्दं निमित्तं च ॥६॥
आलेक्खं लेप्पमयं, पत्तच्छेज्जं च भोयणविही य । बहुविहरयणविसेसं, कुसुमविसेसं सभेयजुयं ॥७॥
विविहा य गन्धजुत्ती, लोयन्नाणं तहेव सविसेसं । एयासु य अन्नासु य, कलासु कन्ना समुव्वहइ ॥८॥
दट्ठूण नरवरिन्दो, कन्नं नवजोव्वणं विचिन्तेइ । को से वरो णु सरिसो, पुहइयले होहिइ इमाए ? ॥९॥
जो से मणस्स इट्ठो, तं गिण्हउ वा सयंवरा कन्ना । एव भणिऊण सहसा, नराहिवा मेलिया सव्वे ॥१०॥
ते च्चिय तहिं भमन्ता, दसरह-जणया तओ मिलेऊणं । अन्नोन्नमुणियनिहसा, दो वि तहिं चेव संवत्ता ॥११॥

---

## २४. कैकेयी परिणयन-वरसंपादनवर्णनम् -

**कैकेयी -**

तस्य भ्रमतस्तदा यद्वृत्तं तच्छ्रुणु मगधपते ! । तत्त्वां कथयामि सर्वं श्रुण्वेहावहितो भूत्वा ॥१॥
उत्तरदिशि नगरमिह कौतुकमङ्गलं मनोभिरामम् । तत्रासीन्नरवृषभो गुणाधिकः शुभमतिर्नाम ॥२॥
महिला तस्य पृथिवीश्री र्दुहिताऽपि च कैकयीप्रवरकन्या । पुत्रश्च द्रोणमेघो यौवनलावण्यप्रतिपूर्णः ॥३॥
कान्तिप्रतिपूर्णशोभा रुपातिशयगुणैरुपपेता । विविधकलाऽऽगमकुशला सा कन्या बुद्धिसारेण ॥४॥
नृत्यं सलक्षणगुणं गान्धर्वं स्वरविभक्तिसंयुक्तम् । जानात्याभरणविधिं चतुर्विधंचैव सविशेषम् ॥५॥
विद्यां सभेदभिन्नां लिपिशास्त्रं शब्दलक्षणं सकलम् । गजतुरगलक्षणमेव गणितं छन्दं निमित्तं च ॥६॥
आलेख्यं लेप्यमयं पत्रच्छेद्यं च भोजनविधिं च । बहुविधरत्नविशेषं कुसुमविशेषं सभेदयुक्तम् ॥७॥
विविधां च गन्धयुक्तिं लोकज्ञानं तथैव सविशेषम् । एतासु चान्यासु च कलासु कन्या समुद्वहति ॥८॥
दृष्ट्वा नरवरेन्द्रः कन्यां नवयौवनां विचिन्तयति । कस्तस्या वरो नु सदृशः पृथिवीतले भविष्यत्यस्याः ॥९॥
यस्तस्या मनस इष्टस्तं गृह्णातु वा स्वयंवरा कन्या । एवं भणित्वा सहसा नराधिपा मेलिताः सर्वे ॥१०॥
त एव तत्र भ्रमन्तौ दशरथ-जनकौ ततो मीलित्वा । अन्योन्यं ज्ञात्वा निकषा द्वावपि तत्रैव संप्राप्तौ ॥११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मञ्चेसु य उवविट्ठा, हरिवाहणमाइया नरवरिन्दा । सयलपरिवारसहिया, आहरणविभूसियसरीरा ॥१२॥

सा वि तहिं वरकन्ना, सव्वालंकारसुकयनेवच्छा । मङ्गलसओवगीया, रायसमुद्दं समोइण्णा ॥१३॥

पासेसु चामराइं, उवरिं छत्तं समोत्तिओऊलं । पुरओ य महातूरं, वज्जइ घणसरिसनिग्घोसं ॥१४॥

लीलाए संचरन्ती, नियन्ति तं पत्थिवा अणिमिसच्छा । उम्माइया खणेणं, बहवे आयल्लयं पत्ता ॥१५॥

[1]मयहरयदाविए ते, सव्वे वि नराहिवे पलोएउं । बालाए कया माला, सिग्घं कण्ठे दसरहस्स ॥१६॥

आलइयकण्ठमालं, दट्ठूणं दसरहं जणो भणइ । रूवेण अणंसमो, नवरं अणायकुल-वंसो ॥१७॥

केइत्थ नरवरिन्दा, भणन्ति जोगो वरो सुलायण्णो । गहिओ कन्नाए इमो, पुव्वक्कम्माणुजोएणं ॥१८॥

अन्ने भणन्ति रुट्ठा, देसियपुरिसस्स अमुणियकुलस्स । एयस्स हरह कन्नं, सिग्घं चिय मा चिरावेह ॥१९॥

अह ते खणेण सव्वे, सन्नद्धे पेच्छिऊण नरवसभे । तो सुहमई नरिन्दो, वयण जामाउयं भणइ ॥२०॥

जाव य सरेहि समरे, धाडेमि इमे अहं नरवरिन्दे । ताव य कन्नाए समं, पविससु नयरं रहारूढो ॥२१॥

जं एव समालत्तो, भणइ तओ [2]माम ! किं विसण्णो सि ? । थोवन्तरेण पेच्छसु, भज्जन्ते रणमुहे एए ॥२२॥

एव भणिऊण तो सो, सन्नद्धो रहवरं समारूढो । पग्गहकरावलग्गा, धुरासणे केगई तस्स ॥२३॥

जस्स ससिमण्डलनिभं, दीसइ छत्तं भडाण मज्झम्मि । एयस्स तुरियवेयं, वाहेहि रहं विसालच्छि ! ॥२४॥

---

मञ्चेषु चोपविष्टा हरिवाहनादयो नरवरेन्द्राः । सकलपरिवारसहिता आभरणविभूषितशरीराः ॥१२॥

साऽपि तत्र वरकन्या सर्वालङ्कारसुकृतनेपथ्या । मङ्गलशतोपगीता राजसमुद्रं समवतीर्णा ॥१३॥

पार्श्वयो श्चामराण्युपरि छत्रं समौक्तिकावचूलम् । पुरतश्च महातूर्यं वाद्यते घनसदृशनिर्घोषम् ॥१४॥

लीलया सञ्चरन्ती पश्यन्ति तां पार्थिवा अनिमेषाक्षाः । उन्मादिताः क्षणेन बहव आकुलतां प्राप्ताः ॥१५॥

महत्तरकदर्शितान् तान् सर्वानपि नराधिपान् प्रलोक्य । बालया कृता माला शीघ्रं कण्ठे दशरथस्य ॥१६॥

आरोपितकण्ठमालं दृष्ट्वा दशरथं जनो भणति । रुपेणानङ्गसमो नवरमज्ञातकुलवंशः ॥१७॥

केचिन्नरवरेन्द्रा भणन्ति योग्यो वरः सुलावण्यः । गृहीतः कन्ययायं पूर्वकर्मानुयोगेन ॥१८॥

अन्ये भणन्ति रुष्टा दैशिकपुरुषस्याजातकुलस्य । एतस्य हरत कन्यां शीघ्रमेव मा चिरायत ॥१९॥

अथ तान्क्षणेन सर्वान्सन्नद्धान्दृष्ट्वा नरवृषभान् । तदा शुभमतिर्नरेन्द्रो वचनं जामातरं भणति ॥२०॥

यावच्च शरैः समरे निस्सारयामीमानहं नरवरेन्द्रान् । तावच्च कन्यया समं प्रविश नगरे रथारुढः ॥२१॥

यदेव समालप्तो भणति ततो माम ! किं विषण्णोऽसि ? । स्तोकान्तरेण पश्य भञ्जतो रणमुखे एतान् ॥२२॥

एवं भणित्वा ततः स सन्नद्धो रथवरं समारूढः । प्रग्रहकरावलग्ना धुरासने कैकेयी तस्य ॥२३॥

यस्य शशिमण्डलनिभं दृश्यते छत्रं भटानां मध्ये । एतस्य त्वरितवेगं वाह्य रथं विशालाक्षि ! ॥२४॥

---

१. महत्तरकदर्शितान् । २. सामि ! - प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एव भणियाए सिग्घं, उसियधयदण्डमण्डणाडोवो । तह वाहिओ रहवरो, जह खुहियं रिउबलं सयलं ॥२५॥**

**जुज्झन्तेण रणमुहे, सरेहि परिहत्थदच्छमुक्केहिं । भग्गा नासन्ति भडा, अन्नन्नं चेव लङ्घन्ता ॥२६॥**

**हेमप्पभेण सव्वे, नियभडा चोइया पडिणियत्ता । मुञ्चन्ता सरनिवहं, आवडिया दसरहं समरे ॥२७॥**

**हत्थीसु रहवरेसु य, तुरङ्गजोहेसु वेढिओ समरे । जुज्झइ अविसण्णमणो, मुञ्चन्तो आउहसयाइं ॥२८॥**

**चउसु वि दिसासु सिग्घं, भमइ च्चिय दसरहो रहारूढो । गयवर-तुरङ्ग-जोहे, घायन्तो सत्थपहरेहिं ॥२९॥**

**दट्ठूण भउव्विग्गं, सेन्नं हेमप्पभो नरवरिन्दो । पुरओ अवट्ठिओ दसरहस्स परिबद्धतोणीरो ॥३०॥**

**छिन्नकवया-ऽऽयवत्तो, सरेहि हेमप्पहो कओ विरहो । सिग्घं रणमज्झाओ, सेन्नेण समं समोसरइ ॥३१॥**

**हेमप्पभम्मि भग्गे, बन्दिजणाइण्णघुट्ठजयसद्दो । कन्नाए समं नयरं, पविसरइ रहेण वीसत्थो ॥३२॥**

**तो सो पाणिग्गहणं, करेइ विहिणा जणेण परिकिण्णो । कोउयमङ्गलनिलए, परिणीओ दसरहो राया ॥३३॥**

**परमविभूईए तओ, [1]महिला घेत्तूण सयलपरिवारो । पडियागओ विणीयं, अणरण्णसुओ पहियकित्ती ॥३४॥**

**मन्ति-भड-पुरजणेणं, ठविओ पुण दसरहो महारज्जे । भुञ्जइ भोगसमिद्धिं, सग्गे वाऽऽखण्डलो मुइओ ॥३५॥**

**संपत्थिओ य [2]महिलं, जणओ वि ससंभमो दढधिईओ । पुणरवि रज्जाणन्दं, परितुट्ठो कुणइ सविसेसं ॥३६॥**

**अह केगई कयाई, भणियाअणरण्णपत्थिवसुएणं । भद्दे ! मणस्स इट्ठं, जं मग्गसि तं पणामेमि ॥३७॥**

---

एवं भणितया शीघ्रमोच्छ्रितध्वजदण्डमण्डनाटोपः । तथा वाहितो रथवरो यथा क्षुभितं रिपुबलं सकलम् ॥२५॥

युध्यमानेन रणमुखे शरैः परिपूर्णदक्षमुक्तैः । भग्ना नश्यन्ति भटा अन्योन्यमेव लङ्घन्तः ॥२६॥

हेमप्रभेण सर्वे निजभटाश्चोदिताः प्रतिनिवृत्ताः । मुञ्चन्तः शरनिवहमापतिता दशरथं समरे ॥२७॥

हस्तिभी रथवरैश्च तुरङ्गयोद्धै वेष्टितः समरे । युध्यत्यविषण्णमना मुञ्चन्नायुधशतानि ॥२८॥

चतुर्ष्वपि दिक्षु शीघ्रं भ्रमत्येव दशरथो रथारुढः । गजवर-तुरङ्ग-योधान्घातयन्शस्त्रप्रहारैः ॥२९॥

दृष्ट्वा भयोद्विग्नं सैन्यं हेमप्रभो नरवरेन्द्रः । पुरतोऽवस्थितो दशरथस्य परिबद्धतूणीरः ॥३०॥

छिन्नकवचाऽऽतपत्रः शरैर्हेमप्रभः कृतो विरथः । शीघ्रं रणमध्यात्सैन्येन समं समपसरति ॥३१॥

हेमप्रभे भग्ने बन्दिजनाकीर्णधृष्टजयशब्दः । कन्यया समं नगरं प्रविशति रथेन विश्वस्तः ॥३२॥

ततः स पाणिग्रहणं करोति विधिना जनेन परिकीर्णः । कौतुकमङ्गलनिलये परिणीतो दशरथो राजा ॥३३॥

परमविभूत्या ततो महिलां गृहीत्वा सकलपरिवारः । प्रत्यागतो विनीतामनरण्यसुतः प्रथितकीर्तिः ॥३४॥

मन्त्रि-भट-पुरजनेन स्थापितः पुन र्दशरथो महाराज्ये । भुनक्ति भोगसमृद्धिं स्वर्ग इवाऽऽखण्डलो मुदितः ॥३५॥

संप्रस्थितश्च मिथिलां जनकोऽपि ससंभ्रमो दृढधृतिः । पुनरपि राज्यानन्दं परितुष्टः करोति सविशेषम् ॥३६॥

अथ कैकेयी कदाचिद्भणिताऽनरण्यपार्थिव सुतेन । भद्रे ! मनस इष्टं यन्मार्गयसि तदर्पयामि ॥३७॥

---

१. महिलं-प्रत्य० । २. मिथिलानगरीम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जं तइया संगामे, सारच्छगुणेण तोसिओ [१]अहयं । तस्सुवयारस्स फलं, मग्गसु मा णे चिरावेहि ॥३८॥**

**तो केगईए भणिओ, संपइ नत्थेत्थ कारणं किंचि । काले जत्थ नराहिव !, मग्गिस्सं तत्थ देज्जासु ॥३९॥**

**वरजुवइसमग्गो तिव्वभोगाणुरत्तो, महुरसरनिणाओ गिज्जमाणो महप्पा ।**

**भडमउडमऊहालीढपायप्पएसो, रमइ विमलकित्ती सेसकालं नरिन्दो ॥४०॥**

**॥ इय पउमचरिए केगइवरसंपायणो नाम चउवीसइमो उद्देसओ समत्तो ॥**

---

यत्त्वया संग्रामे सारथ्यगुणेन तोषितोऽहम् । तस्योपकारस्य फलं मार्गय मा चिराय ॥३८॥

तदा कैकेय्या भणितः संप्रति नास्त्यत्र कारणं किञ्चित् । काले यत्र नराधिप ! मार्गयिष्यामि तत्र देयम् ॥३९॥

वरयुवतिसमग्रस्तीव्रभोगानुरक्तो मधुरस्वरनिनादो गीयमानो महात्मा ।

भटमुकुटमयूखालीढपादप्रदेशो रमते विमलकीर्त्तिः शेषकालं नरेन्द्रः ॥४०॥

**॥ इति पद्मचरित्रे कैकेयीवरसंपादनो नामचतुर्विंशतितम उद्देशः समाप्तः ॥**

---

१. सिग्घं-मु० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २५. चउभाइविहाणं

अह अन्नया कयाई, देवी अवराइया सुहपसुत्ता । पेच्छइ य पवरसुमिणे, रयणीए पच्छिमे जामे ॥१॥
वरकुसुमकुन्दवण्णं, सीहं सूरं तहेव रयणियरं । दट्ठूण अह विबुद्धा, पइणो सुमिणे परिकहेइ ॥२॥
सोऊण पवरसुमिणे, सत्थत्थविसारओ नरवरिन्दो । भणइ इमे वरपुरिसं, सुन्दरि ! पुत्तं निवेएन्ति ॥३॥
तयणन्तरं सुमित्ता, पेच्छइ सुमिणे निसावसाणम्मि । [१] लच्छो कमलविहत्था, ससि-सूरे किरणपज्जलिए ॥४॥
अत्ताणं अइतुङ्गे, गिरिवरसिहरे अवट्ठिया सन्ती । सायवरपेरन्तं, पेच्छइ पुहइं चिय पसत्थं ॥५॥
सूरुग्गमम्मि तो सा, गन्तूण कहेइ सुविणए पइणो । तेण वि य तीए सिट्ठं, होही पुत्तो तुमं भद्दे ! ॥६॥
अवराइया कयाई, गुरुभारा सोहणे तिहि-मुहुत्ते । पुत्तं चेव पसूया, वियसियवरपउमसरिसमुहं ॥७॥
जम्मूसवो महन्तो, तस्स कओ दसरहेण तुट्ठेणं । नामं च विरइयं से, पउमो पउमुप्पलदलच्छो ॥८॥
तत्तो चेव पसूया, सोमित्ती दारयं परमरूवं । तस्स वि य महाणन्दो, सविसेसो नरवईण कओ ॥९॥
वेरियघरेसु जाया, उप्पाया दारुणा महापावा । बन्धवनयरेसु पुणो, कहेन्ति सुहसंपयं विउलं ॥१०॥
नीलुप्पलदलसामो, जेणं चिय लक्खणेसु उववेओ । तेणं गुणाणुरूवं, छूढं चिय लक्खणो नामं ॥११॥
अह दो वि बालया ते, रिङ्खण-चंकमणयाइ कुणमाणा । वड्ढन्ति लच्छिनिलया, आभरणविभूसियसरीरा ॥१२॥
बहुविहजम्मसिणेहा, अन्नोन्नवसाणुगा वरकुमारा । बन्धवहिययाणन्दा, रक्खिज्जन्ते पयत्तेणं ॥१३॥

## २५. चतुर्भ्रातृविधानम्

अथान्दा कदाचिद्देव्यपराजिता सुखप्रसुप्ता । पश्यति च प्रवरस्वप्नान्रजन्यां पश्चिमे यामे ॥१॥
वरकुसुमकुन्दवर्णं सिंह सूर्यं तथैव रजनिकरम् । दृष्ट्वा अथ विबुद्धा पत्युः स्वप्नान्परिकथयति ॥२॥
श्रुत्वा प्रवरस्वप्नान्शास्त्रार्थविशारदो नरवरेन्द्रः । भणतीमे वरपुरुषं सुन्दरि ! पुत्रं निवेदयन्ति ॥३॥
तदनन्तरं सुमित्रा पश्यति स्वप्नान्निशावसाने । लक्ष्मीः कमलविहस्ता शशि-सूर्यौ किरणप्रज्वलितौ ॥४॥
आत्मानमत्युत्तुङ्गे गिरिवरशिखरे ऽवस्थिता सती । सागरवरपर्यन्तं पश्यति पृथिवीमेव प्रशस्ताम् ॥५॥
सूर्योद्गमे तदा सा गत्वा कथयति स्वप्नान् पत्युः । तेनापि च तस्याः शिष्टं भविष्यति पुत्रस्त्वां भद्रे ! ॥६॥
अपराजिता कदाचिद्गुरुभारा शोभने तिथि-मुहूर्ते । पुत्रमेव प्रसूता विकसितवरपद्मसदृशमुखम् ॥७॥
जन्मोत्सवो महांस्तस्य कृतो दशरथेन तुष्टेन । नाम च विरचितं तस्य पद्मः पद्मोत्पलाक्षः ॥८॥
तत एव प्रसूता सौमित्रि र्दारकं परमरुपम् । तस्यापि च महानन्दः सविशेषो नरपतिना कृतः ॥९॥
वैरीगृहेषु जाता उत्पाता दारुणा महापापाः । बान्धवनगरेषु पुनः कथयन्ति सुखसंपद्विपुलम् ॥१०॥
नीलोत्पलदलश्यामो येनैव लक्षणैरुपपेतः । तेन गुणानुरुपं क्षिप्तमेव लक्ष्मणो नाम ॥११॥
अथ द्वावपि बालकौ तौ रिङ्खनचक्रमणादि कुर्वाणौ । वर्धेते लक्ष्मीनिलयावाभरणविभूषितशरीरौ ॥१२॥
बहुविधजन्मस्नेहावन्योन्यवशानुगौ वरकुमारौ । बान्धवहृदयानन्दौ रक्ष्येते प्रयत्नेन ॥१३॥

१. लच्छि कमलविहत्थं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अह केगई पसूया, भरहकुमारं तहेव [1]सत्तुघणं । जम्मूसवो महन्तो, ताणं पि कओ नरवईणं ॥१४॥
अह ते कुमारसीहे, चत्तारि वि सत्ति-कन्ति-बलजुत्ते । कलगहण-धारणसहे, दट्ठूण समाउलो राया ॥१५॥
अत्थेत्थ महानयरी, कम्पिल्ला तत्थ भग्गवो नामं । तस्सऽइराणी महिला, पुत्तो वि य अइरकुच्छी सो ॥१६॥
अइलालिओ स [2]दूरं अविणयकारी जणस्स अइवेसो । निद्धाडिओ पुराओ, पियरेणं अयसभीएणं ॥१७॥
दोकप्पडपरिहाणो, पत्तो, रायग्गिहं महानयरं । वइवस्सओ त्ति नामं, तत्थ धणुव्वेयमइकुसलो ॥१८॥
सीससहस्सेणं चिय, परिकिण्णो तस्स चेव पासम्मि । अह सिक्खिओ कमेणं, सव्वाण वि उत्तमो जाओ ॥१९॥
रायगिहसामिओ तं सुणिऊणं चावलक्खमइकुसलं । कारेइ सरक्खेवं, समयं चिय अन्तवासीहिं ॥२०॥
दट्ठूण सरक्खेवं, भणइ निवो अह दुसिक्खिओ तुहयं । सुणिऊण रायवयणं, पुणरवि य गुरुं समल्लीणो ॥२१॥
वइवस्सयस्स [3]दुहिया, काऊण वसे निसासु छिड्डेणं । निग्गन्तूण पलाओ, साएयपुरिं समणुपत्तो ॥२२॥
तो दसरहस्स सव्वं, निययं दावेइ सत्थकुसलत्तं । परितुट्ठो नरवसभो, तस्स कुमारे समप्पेइ ॥२३॥
ईसत्थसन्निहाणं, नियय जं तस्स चावमाईयं । संकन्तं चिय सव्वं, ताणं उदए व्व ससिबिम्बं ॥२४॥
ते तत्थ कुमारवरा, बहुविहविन्नाणलद्धमाहप्पा । जाया विक्खायजसा, चत्तारि वि सायरा चेव ॥२५॥

एवं कलासु [4]कुसला मुणिऊण पुत्ता, विन्नाण-नाण-बल-सत्तिसमत्थचित्ता[5] ।
सम्माण-दाण-विभवेण गुरुस्स तुट्ठो, पूयं करेइ विमलेण मणेण राया ॥२६॥

॥ इय पउमचरिए चउभाइविहाणो नाम पञ्चवीसइमो उद्देसओ समत्तो ॥

---

अथ कैकयी प्रसूता भरतकुमारं तथैव शत्रुघ्नम् । जन्मोत्सवो महांस्तयोरपि कृतो नरपतिना ॥१४॥
अथ तान् कुमारसिंहांश्चतुरोऽपि शक्ति-कान्ति-बल युक्तान् । कलाग्रहण-धारणसहान् दृष्ट्वा समाकुलो राजा ॥१५॥
अस्त्यत्र महानगरी काम्पिल्या तत्र भार्गवो नाम । तस्याचिरा महिला पुत्रोऽपि चाचिराकुक्षिः सः ॥१६॥
अतिलालितः स दूरमविनयकारी जनस्यातिद्वेष्यः । निष्काषितः पुरात्पित्राऽयशोभीतेन ॥१७॥
द्विकर्पटपरिधानः प्राप्तो राजगृहं महानगरम् । वैवश्वत इति नाम तत्र धनुर्वेदमतिकुशलः ॥१८॥
शिष्यसहस्रेणैव परिकीर्णस्तस्यैव पार्श्वे । अथ शिक्षितः क्रमेण सर्वेषामप्युत्तमो जातः ॥१९॥
राजगृहस्वामी तच्छ्रुत्वा चापलक्ष्यमतिकुशलम् । कारयति शरक्षेपं समकमेवान्तेवासिभिः ॥२०॥
दृष्ट्वा शरक्षेपं भणति नृपो अरे ! दुःशिक्षितस्त्वम् । श्रुत्वा राजवचनं पुनरपि च गुरुं समालीनः ॥२१॥
वैवस्वतस्य दुहितरं कृत्वा वशे निशायां छिद्रेण । निर्गत्य पलायमाणः साकेतपुरिं समनुप्राप्तः ॥२२॥
ततो दशरथस्य सर्वं निजको दर्शयति शस्त्रकुशलताम् । परितुष्टो नरवृषभस्तस्य कुमारान् समर्पयति ॥२३॥
ईष्वस्त्रसन्निधानं निजकं यत्तस्य चापादिकम् । सङ्क्रान्तमेव सर्वं तेषामुदक इव शशिबिम्बम् ॥२४॥
ते तत्र कुमारवरा बहुविधविज्ञानलब्धमाहात्म्याः । जाता विख्यातयशसश्चत्वारोऽपि सागरा इव ॥२५॥
एवं कलासु कुशलाञ्ज्ञात्वा पुत्रान् विज्ञान-ज्ञान-बलशक्तिसमर्थचित्तान् ।
सन्मान-दान-विभवेन गुरोस्तुष्टः पूजां करोति विमलेन मनसा राजा ॥२६॥

॥ इति पद्मचरित्रे चतुर्भ्रातृविधानो नाम पञ्चविंशतितम उद्देशः समाप्तः ॥

---

१. सत्तुग्घं-प्रत्य० । २. सरोसं-मु० । ३. दुहियं-प्रत्य० । ४. कुसले मुणिऊण पुत्ते-प्रत्य० । ५. चित्ते-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २६. सीया-भामण्डलुप्पत्तिविहाणं

### भामण्डलपूर्वभवचरितम् –

एत्तो जणयस्स तुमं, सेणिय ! निसुणेहि ताव संबन्धं । होऊण एगचित्तो, कहेमि सव्वं जहावत्तं ॥१॥
जणयस्स महादेवी, आसि विदेहि त्ति नाम नामेणं । गुरुभारा पसवन्ती, परिवालइ सुखरो तइया ॥२॥
तो भणइ मगहराया, केण निमित्तेण सुरवरो गब्भं । रक्खइ साहेहि पहू !, एयं मे कोउयं परमं ॥३॥
तो भणइ गणाहिवई, राया चक्कद्धओ त्ति नामेणं । सो चक्कपुरनिवासी, भज्जा मणसुन्दरी तस्स ॥४॥
तीए गुणाणुरूवा, धूया अइसुन्दरा गुरुगिहम्मि । सा पढइ अक्खराइं, लेहणिहत्था पयत्तेणं ॥५॥
नरवइपुरोहियसुओ, साहामहिलाए कुच्छिसंभूओ । महुपिङ्गलो त्ति नामं, सो वि तहिं गुरुगिहे पढइ ॥६॥
पढमं चिय आलावो, आलावा रई रईए वीसम्भो । वीसम्भाओ पणओ, पणयाओ वड्ढए पेम्मं ॥७॥
जाए च्चिय सब्भावे, तं कन्नं पिङ्गलो हेरऊणं । अइदुग्गमं सुदूरे, वियब्भनयरं समणुपत्तो ॥८॥
काऊण तत्थ गेहं, मूढो विन्नाण-नाण-धणरहिओ । तण-दारुएहि जीवइ, विक्कन्तो सो तहिं नयरे ॥९॥
तइया तम्मि पुरवरे, पयाससीहस्स पढममहिलाए । पवरावलीए पुत्तो, अह कुण्डलमण्डिओ नामं ॥१०॥

---

## २६. सीताभामण्डलोत्पत्ति विधानम् -

### भामण्डलपूर्वभव चरित्रम् -

इतो जनकस्य त्वां श्रेणिक ! निश्रुणु तावत्संबंधम् । भूत्वेकाग्रचित्तः कथयामि सर्वं यथावृत्तम् ॥१॥
जनकस्य महेदेव्यासीद्विदेहीति नाम नाम्ना । गुरुभारा प्रसवन्ती परिपालयति सुरवरस्तदा ॥२॥
तदा भणति मगधराजा केननिमित्तेन सुरवरो गर्भम् । रक्षति कथय प्रभो ! एतन्मे कौतुकं परमम् ॥३॥
तदा भणति गणाधिपती राजा चक्रध्वज इति नाम्ना । स चक्रपुरनिवासी भार्या मनःसुन्दरी तस्य ॥४॥
तस्या गुणानुरुपा दुहिताऽतिसुन्दरा गुरुगृहे । सा पठत्यक्षराणि लेखिनीहस्ता प्रयत्नेन ॥५॥
नरपतिपुरोहितसुतः शाखामहिलायाः कुक्षिसंभूतः । मधुपिङ्गल इति नाम सोऽपि तत्र गुरुगृहे पठति ॥६॥
प्रथममेवालाप आलापाद्रती रत्या विश्वासः । विश्वासात्प्रणयः प्रणयाद्ववर्धते प्रेम ॥७॥
जात एव सद्भावे तां कन्यां पिङ्गलो हृत्वा । अतिदुर्गमं सुदूरं विदर्भनगरं समनुप्राप्तः ॥८॥
कृत्वा तत्र गृहं मूढो विज्ञान-ज्ञान-धनरहितः । तृण-दारूभि र्जीवति विक्रीणानः स तत्र नगरे ॥९॥
तदा तस्मिन्पुरवरे प्रकाशसिंहस्य प्रथममहिलायाः । प्रवरावल्याः पुत्रोऽथ कुण्डलमण्डितो नाम ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सो तत्थ निग्गओ च्चिय, विहरन्तो अत्तणो सलीलाए । तं दट्ठूण [1]वरतणू, विद्धो कुसुमाउहसरेहिं ॥११॥

तीए कएण दूई, गूढं संपेसिया नरवईणं । वेयारिऊण बाला, समाणिया नरवईभवणं ॥१२॥

तीए समं नरिन्दो, वरकुण्डलमण्डिओ पवरभोगे । भुञ्जइ गुणाणुरत्तो, रईए समयं अणङ्गो व्व ॥१३॥

महुपिङ्गलो वि एत्तो, [2]अडवीय समागओ नियगेहं । [3]कन्ता अपेच्छमाणो, पडिओ दुक्खण्णवे सहसा ॥१४॥

महिलं गवेसमाणो, रुवइ च्चिय गग्गरेण कण्ठेण । गन्तूण भणइ नरवइ !, केणवि बाला महं हरिया ॥१५॥

भणिओ य सहामज्झे, मन्तीणं सो अणेयबुद्धीणं । अज्जाहि समं बाला, पोयणनयरे मए दिट्ठा ॥१६॥

सो एवभणियमेत्तो, सिग्घं चिय पोयणं गवेसेउं । पडियागओ नरिन्दं, भणइ य [4]कन्ता ममं लहसु ॥१७॥

नरवइआणाए तओ, पुरुसेहि गलग्गहप्पहारेहिं । निद्धाडिओ पुराओ, भमइ महिं दुक्खिओ विमणो ॥१८॥

हिण्डन्तो च्चिय पुहइं, साहुं दट्ठूण अज्जगुत्तं सो । पणमइ कयञ्जलिउडो, सुणइ य धम्मं जिणुद्दिट्ठं ॥१९॥

सोऊण धम्मनिहसं, वइरागुप्पन्नजायसंवेगो । गेण्हइ सङ्गविमुक्कं, पव्वज्जं गुरुसयासम्मि ॥२०॥

गिम्हे आयावेन्तो, चिट्ठइ सिसिरे निसासु एगन्ते । वासारत्तं पि मणी, [5]गमइ सया पव्वयगुहत्थो ॥२१॥

घोरं तवोविहाणं, बारसरूवं मुणी पकुव्वन्तो । सीया-ऽऽयवदुहिओ वि य, कन्तामोहं न छड्डेइ ॥२२॥

तावऽच्छउ संबन्धो, एसो अन्नं सुणेहि मगहवई ! । अन्तरजोयनिबद्धा, ठिया कहा रयणमाल व्व ॥२३॥

---

स तत्र निर्गत एव विहरन्नात्मनो सलीलया । तां दृष्ट्वा वरतनुं विद्धः कुसुमायुधशरैः ॥११॥

तस्याः कृतेन दूती गूढं संप्रेषिता नरपतिना । विप्रतार्य बाला समानीता नरपतिभवनम् ॥१२॥

तस्याः समं नरेन्द्रो वरकुण्डलमण्डितः प्रवरभोगान् । भुनक्ति गुणानुरक्तो रत्या सममनङ्ग इव ॥१३॥

मधुपिङ्गलोऽपीतो ऽटव्याः समागतो निजगृहम् । कान्तामप्रेक्षमाणो पतितो दुःखार्णवे सहसा ॥१४॥

महिलां गवेषयन्रोदित्येव गद्गदेन कण्ठेन । गत्वा भणति नरपते ! केनापि बाला मम हृता ॥१५॥

भणितश्च सभामध्ये मन्त्रिणा सोऽनेकबुद्धिना । आर्याभिःसमं बाला पोतननगरे मया दृष्टा ॥१६॥

स एवं भणित मात्रः शीघ्रमेव पोतनं गवेषयितुम् । प्रत्यागतो नरेन्द्रं भणति च कान्तां मम लभस्व ॥१७॥

नरपत्याज्ञया ततः पुरुषैर्गलग्रहप्रहारैः । निष्काषितः पुराद्भ्रमति महीं दुःखितो विमनाः ॥१८॥

हिण्डमान एव पृथिव्यां साधुं दृष्ट्वाऽऽर्यगुप्तं स । प्रणमति कृताञ्जलिपुटः श्रृणोति च धर्मं जिनोपदिष्टम् ॥१९॥

श्रुत्वा धर्मनिकषं वैराग्योत्पन्नजातसंवेगः । गृह्णाति सङ्गविमुक्तां प्रव्रज्यां गुरुसकाशे ॥२०॥

ग्रीष्म आतापयंस्तिष्ठति शिशिरे निशास्वेकान्ते । वर्षारात्रमपि मुनिर्गमयति सदा पर्वतगुहास्थः ॥२१॥

घोरं तपोविधानं द्वादशरुपं मुनिः प्रकुर्वन् । शीताऽऽतपदुःखितोऽपि च कान्तामोहं न त्यजति ॥२२॥

तावदास्ता संबन्ध एषोऽन्यं श्रृणु मगधपते ! । अन्तर्योगनिबद्धा स्थिता कथा रत्नमालेव ॥२३॥

---

१. वरतणुं-प्रत्य० । २. कत्थइ य-मु० । ३. कंतं-प्रत्य० । ४. कंतं-प्रत्य० । ५. वसइ-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अणरण्णे रज्जत्थे, अह कुण्डलमण्डिओ महासुहडो । दुग्गमपुरट्ठिओ सो, देसं सव्वं विणासेइ ॥२४॥
अणरण्णसन्तिए जे, सुहडे मारेइ ते बलुम्मत्तो । निद्दय-निराणुकम्पो, देसविणासं कुणइ सव्वं ॥२५॥
घेत्तूणमचायन्तो, अणरण्णो तं अवट्ठियं विसमे । रत्तिंदिया य निद्दं, न लहइ चिन्तापरिग्गहिओ ॥२६॥
दट्ठूण दुक्खियं तं, अणरण्णं तत्थ भणइ सामन्तो । नामेण बालचंदो, सामिय ! वयणं निसामेहि ॥२७॥
जइ बन्धिऊण समरे, इह कुण्डलमण्डियं न आणेमि । तो एव निग्गओ हं, होहामि इमा पइन्ना मे ॥२८॥
गन्तूण तेण तुरियं, सहसा चउरङ्गबलसमग्गेणं । वीसत्थओ पमाई, अह कुण्डलमण्डिलो बद्धो ॥२९॥
विद्धंसेऊण पुरं, सिग्घं पडियागओ नियं ठाणं । दावेइ बालचन्दो, बद्धं सत्तुं नरिन्दस्स ॥३०॥
तो तेण सुभिच्चेणं, पुहई सत्था कया निरवसेसा । परितुट्ठो अणरण्णो, सम्माणं से तो कुणइ ॥३१॥
मुक्को य बन्धणाओ, अह कुण्डलमण्डिओ परिभमन्तो । दट्ठूण मुणिवरिन्दं, कयविणओ पुच्छे धम्मं ॥३२॥

## मांसविरत्युपदेशः, मांसभक्षणे नरकवेदना वर्णनं च–

जो न कुणइ पव्वज्जं, भयवं ! गिहवासपासपडिबद्धो । सो किह संसाराओ, मुच्चिहिइ अणाइमन्ताओ ? ॥३३॥
तो भणइ मुणी धम्मो, जीवदया निग्गहो कसायाणं । एएसु चेव जीवो, मुच्चइ घणकम्मबनधाओ ॥३४॥
हिंसा पुण जीववहो, सो वि य मंसस्स कारणं हवइ । तुहमवि खायसि मंसं, कह बन्धविमोयणं कुणसि ? ॥३५॥
इह खाइऊण मंसं, जिब्भिन्दियवसगओ सरीरट्ठो । मरिऊण वच्चइ नरो, तिव्वमहावेयणे नरए ॥३६॥

---

अनरण्ये राज्यार्थे ऽथ कुण्डलमण्डितो महासुभटः । दुर्गमपुरस्थितः स देशं सर्वं विनश्यति ॥२४॥
अनरण्यसत्कान्यान् सुभटान् मारयति तान् बलोन्मत्तः । निर्दय-निरणुकम्पो देशविनाशं करोति सर्वम् ॥२५॥
ग्रहितुमशक्नुवननरण्यस्तमवस्थितं विषमे । रात्रिंदिवा च निद्रां न लभते चिन्तापरिगृहीतः ॥२६॥
दृष्ट्वा दुःखितं तमनरण्यं तत्र भणति सामन्तः । नाम्ना बालचद्रः स्वामिन् ! वचनं निशामय ॥२७॥
यदि बद्धवा समरे इह कुण्डलमण्डितं नानयामि । तदैवं निग्रहोऽहं भविष्यामीयं प्रतिज्ञा मे ॥२८॥
गत्वा तेन त्वरितं सहसा चतुरङ्गबलसमग्रेण । विश्वस्तः प्रमाद्यथ कुण्डलमण्डितो बद्धः ॥२९॥
विध्वस्य पुरं शीघ्रं प्रत्यागतो निजं स्थानम् । दर्शयति बालचन्द्रो बद्धं शत्रुं नरेन्द्रस्य ॥३०॥
तदा तेन सुभृत्येन पृथिवी स्वस्था कृता निरवशेषा । परितुष्टोऽनरण्यः सन्मानं तस्य तदा करोति ॥३१॥
मुक्तश्च बन्धनादथ कुण्डलमण्डितः परिभ्रमन् । दृष्ट्वा मुनिवरेन्द्रं कृतविनयः पृच्छति धर्मम् ॥३२॥

## मांसविरत्युपदेशः मांसभक्षणे नरकवेदना वर्णनं च-

यो न करोति प्रव्रज्यां भगवन् ! गृहवासपाशप्रतिबद्धः । स कथं संसारान्मोक्ष्यत्यनाद्यनन्तात् ? ॥३३॥
तदा भणति मुनि र्धर्मो जीवदया-निग्रहकषायाणाम् । एतैरेव जीवो मुच्यते घनकर्मबन्धात् ॥३४॥
हिंसा पुन र्जीववधः सोऽपि च मांसस्य कारणे भवति । त्वमपि खादसि मांसं कथं बन्धविमोचनं करोसि ॥३५॥
इह खादित्वा मांसं जीव्हेन्द्रियवशगतः शरीरार्थैः । मृत्वा गच्छति नरस्तीव्रमहावेदने नरके ॥३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ण्हाणेण मुण्डणेण य, दाणेणं विविहलिङ्गगहणेणं। मंसासिणस्स भणियं, नत्थि हु साहारणं किंचि ॥३७॥
संसारत्था जीवा, आसि च्चिय बन्धवा परभवेसु। खायन्तएण मंसं, ते सव्वे भक्खिया नवरं ॥३८॥
न य पायवेसु मंसं, उप्पज्जइ नेय धरणिपट्ठम्मि। वज्जेह सुक्क-सोणिय-समुब्भवं पावसंबन्धं ॥३९॥
जलयर-पक्खि-मिया वि य, हन्तूणं जीववल्लहे सत्ते। एएसु हवइ मंसं, दयावरा तं न भुञ्जन्ति ॥४०॥
धण्णेण वड्ढियं चिय, महिसीखीरेण पोसियं देहं। तह वि य खायन्ति नरा, जणणीए अत्तणो मंसं ॥४१॥
इह मन्दरहेट्ठाओ, पुढवी रयणप्पभा मुणेयव्वा। तिसु भागेसु विहत्ता, असीयं जोयणा लक्खं ॥४२॥
तत्थेव भवणवासी, देवा निवसन्ति दोसु भागेसु। तइए पुण नेरइया, हवन्ति बहुवेयणा नियमं ॥४३॥
तत्तो य सक्करा वालुया य पङ्कप्पभा महापुढवी। धूमा तमा तमतमा, इमासु नरया महाघोरा ॥४४॥
नरओ कुम्भीपाओ, वेयरणी कूडसामली हवइ। असिपत्तवणे एत्तो, तत्थेव खुरप्पधाराओ ॥४५॥
दुग्गन्धा दुप्फरिसा, ससि-सूरविवज्जिया तमब्भहिया। एएसु पावकारी, नरएसु हवन्ति नेरइया ॥४६॥
जे एत्थ जीवहया, महु-मंस-सुराइलोलुया पावा। ते हु मया परलोए, हवन्ति नरएसु नेरइया ॥४७॥
केएत्थ धगधगन्ते, नरए डज्झन्ति जलियजालोहे। छिमिछिमिछिमन्तसद्दे, रुहिरवसावट्टणारूवे ॥४८॥
नासन्ति अग्गिभीया, सुतिक्खसूईसु विद्धचलणजुया। वेयरणिजलं दट्ठुं, तिसाभिभूया अहिवडन्ति ॥४९॥
कढकढकढेन्तफरिसं, विलीणतउ-तम्ब-सीसयसरिच्छं। वस-केस-पूय-सोणिय-मीसं खारोदयं दुरभिं ॥५०॥

---

स्नानेन मुण्डनेन च दानेन विविधलिङ्गग्रहणेन। मांशाशिनो भणितं नास्ति हु साधारणं किञ्चित् ॥३७॥
संसारस्था जीवा आसन्नेव बान्धवाः परभवेषु। खादता मांसं ते सर्वे भक्षिता नवरम् ॥३८॥
न च पादपेषु मांसमुत्पद्यते नैव धरतिपृष्ठे। वर्जयत शुक्र-शोणित समुद्भवं पापसम्बन्धम् ॥३९॥
जलचर-पक्षि-मृगानपि च हत्वा जीववल्लभान्सत्त्वान्। एतेषु भवति मांसं दयापरास्तन्न भुञ्जते ॥४०॥
धान्येन वर्धितमेव महिषीक्षीरेण पोषितं देहम्। तथापि च खादन्ति नरा जनन्या आत्मनो मांसम् ॥४१॥
इह मन्दराधः पृथिवी रत्नप्रभा ज्ञातव्या। त्रिषु भागेषु विभक्ताऽशीति योजना लक्षम् ॥४२॥
तत्रैव भवनवासिनो देवा निवसन्ति द्वयोर्भागयोः। तृतीये पुनर्नारका भवन्ति बहुवेदना नित्यम् ॥४३॥
ततश्च शर्करा वालुका च पङ्कप्रभा महापृथिवी। धूमा तमा तमस्तमैतासु नरका महाघोराः ॥४४॥
नरकः कुम्भीपाको वैतरणी कूटशाल्मली भवति। असिपत्रवना इतस्तत्रैव क्षुरप्रधाराः ॥४५॥
दुर्गन्धा दुस्स्पर्शाः शशि-सूर्य विवर्जितास्तमोऽभ्यधिकाः। एतेषु पापकारिणो नरकेषु भवन्ति नैरयिकाः ॥४६॥
येऽत्र जीववधका मधु-मांस-सुरादिलोलुपाः पापाः। ते हु मृताः परलोके भवन्ति नरकेषु नैरयिकाः ॥४७॥
केचिद्धगधगति नरके दहन्ति ज्वलितज्वालौधे। छम-छम-छमच्छब्दे रुधिरवशावर्तनारुपे ॥४८॥
नश्यन्त्यग्निभीताः सुतीक्ष्णसूचिभि विद्धचरणयुग्माः। वैतरणिजले दृष्ट्वा तृषाभिभूता अभिपतन्ति ॥४९॥
कड-कड-कडत्स्पर्शं विलीनत्रपु-ताम्र-सीसकसदृशम्। वशा-केश-पूत-शोणित-मिश्रं क्षारोदकं दुरभिम् ॥५०॥

Jain Education International	For Personal & Private Use Only	www.jainelibrary.org

चडचडचडं त्ति घेत्तुं, खण्डन्ति य वेढियं महीवट्टे । पाइज्जन्ति रडन्ता, पाणीयं नरयपालेहिं ॥५१॥

खारोदयदद्धङ्गा, मयवेगेणं समुट्ठिया सन्ता । छायं अहिलसमाणा, असिपत्तवणं तओ जन्ति ॥५२॥

खणखणखणन्ति खग्गा, गाढं कणकणकणन्ति सत्तीओ । मडमडमडेन्ति कुन्ता, ताण सरीरे निवडमाणा ॥५३॥

कर-चरण-कण्ण-नासोट्ठ-फुप्फुसा छिन्नभिन्नसव्वङ्गो । लोलन्ति धरणिवट्टे, मेय-वसा-रुहिरविच्छड्डा ॥५४॥

खर-फरुसरज्जुबद्धा, सिग्घं आहिण्डिऊण विरडन्ता । आरुहणोरुहणाइं, कारिज्जन्ते अकयपुण्णा ॥५५॥

पीलिज्जन्ते जन्तेसु केइ कडकडकडेन्ति कावडिया । अवरे मुसुंढि-मोग्गर-चडक्कघाएसु ओसुद्धा ॥५६॥

काएसु य गिद्धेसु य, अवरे चडचडचडाखद्धङ्गा । अणुहोन्ति वेयणाओ, चिट्ठइ नरयाउयं जाव ॥५७॥

एयाणि य अन्नाणि य, दुक्खाणि निरन्तरं[1] अणुहवन्ता । अच्छन्ति दिहकालं, जेहि अधम्मो कओ पुव्विं ॥५८॥

एयं सोऊण तुमं, दुक्खं नरएसु मंससंभूयं । तम्हा वज्जेहि इमं, मंसं दोसाण आमूलं ॥५९॥

जो पुण मंसनिवित्तं, कुणइ नरो सील-दाणरहिओ वि । सो च्चिय सोग्गइगमणं, पावइ नत्थेत्थ संदेहो ॥६०॥

पञ्चाणुव्वयधारी, जो पुण तव-नियम-सीलसंपन्नो । जिणसासणाणुरत्तो, सो देवो होइ सुहनिलओ ॥६१॥

## मांसविरतिफलम्—

हवइ अहिंसा मूलं, धम्मस्स जिणुत्तमेहि परिकहियं । सा पुण सुनिम्मलतरी, मंसनिवित्तीए संभवइ ॥६२॥

---

चटचटचटमिति गृहीत्वा खण्डयन्ति च वेष्टितं महीपृष्टे । पाय्यन्ते रटन्तो जलं नरकपालैः ॥५१॥

क्षारोदकदग्धाङ्गा मृगवेगेन समुत्थिताः सन्तः । छायामभिलषमाणा असिपत्रवनं ततो यान्ति ॥५२॥

खनखनखनन्ति खड्गा गाढं कणकणक्कणन्ति शक्तयः । मड-मडमडन्ति कुंतास्तेषां शरीरे निपतन्तः ॥५३॥

कर-चरण-कर्ण-नासौष्ट-[2]कुक्कुसाश्छिन्नभिन्नसर्वाङ्गाः । लोलन्ति धरणिपृष्ठे मेद-वसारुधिरविच्छर्दाः ॥५४॥

खर-परुषरज्जुबद्धाः शीघ्रमाहिण्डय विरटन्तः । आरोहणावरोहणादि क्रियन्ते अकृतपुण्याः ॥५५॥

पील्यन्ते यन्त्रेषु केऽपि कटकटकटदिति कार्पटिकाः । अपरे [3]मुसुंठि-मुद्गर-[4]चडक्कघातैर्विनाशिताः ॥५६॥

काकैश्च गृध्रैश्चापरे चटचटचटाकखद्धाङ्गाः । अनुभवन्ति वेदनास्तिष्ठन्ति नरकायु र्यावत् ॥५७॥

एतानि चान्यानि च दुःखानि निरन्तरमनुभवन्तः । आसते दीर्घकालं यैरधर्मः कृतः पूर्वे ॥५८॥

एवं श्रुत्वा त्वं दुःखं नरकेषु मांससंभूतम् । तस्माद्वर्जयतेदं मांसं दोषानामामूलम् ॥५९॥

यः पुन मांस निवृत्तिं करोति नरः शील-दानरहितोऽपि । स एव सुगतिगमनं प्राप्नोति नास्त्यत्र संदेहः ॥६०॥

पञ्चाणुव्रतधारी यः पुनस्तपोनियम-शील संपन्नः । जिनशासनानुरक्तः स देवो भवति सुखनिलयः ॥६१॥

## मांस विरतिफलम् -

भवत्यहिंसा मूलं धर्मस्य जिनोत्तमैः परिकथितम् । सा पुनः सुनिर्मलतरी मांसनिवृत्या संभवति ॥६२॥

---

१. अणन्तरं-मु० । २. उदरवर्ती अन्त्रविशेषः । ३-४. शस्त्रविशेषः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जो वि य सबर-पुलिन्दो, चण्डालो वा दयावरो निययं। महु-मंसनिवित्तीए, सो पावविवज्जिओ होइ ॥६३॥

पावेण वज्जियस्स य, देवत्तं हवइ अह नरिन्दत्तं। सम्मत्तलद्धबुद्धी, कमेण सिद्धिं पि पाविहिए ॥६४॥

एयं साहुवएसं, सोऊणं कुण्डलो य दढसत्तो। पञ्चाणुव्वसहिओ, जाओ महु-मंसविरओ य ॥६५॥

जाओ अणन्नदिट्ठी, साहू नमिऊण निग्गओ तत्तो। परिचिन्तिऊण वच्चइ, अत्थि महं माउलो नियओ ॥६६॥

तस्स पसाएण अहं, सत्तुं जिणिऊण समरमज्झम्मि। निययपुरे बलसहिओ, पुणरवि रज्जं करीहामि ॥६७॥

चिन्तेऊण पयट्टो, एगागी दक्खिणावहं तुरिओ। पन्थपरिस्समदुहिओ, मरणावत्थो तओ जाओ ॥६८॥

जम्मि समए विमुञ्चइ, जीवं इह कुण्डलो तहिं अन्ना। सग्गाउ चुया देवी, अवसाणे आउखन्धस्स ॥६९॥

जणयस्स महिलियाए, गब्भे सम्मुच्छिया विदेहाए। जीवा कम्मवसेणं, दोण्णि वि एक्कोयरम्मि ठिया ॥७०॥

एयन्तरम्मि साहू, कालं काऊण पिङ्गलो सग्गे। जाओ सुरो महप्पा, सुमरइ अन्नं तओ जम्मं ॥७१॥

अवहिविसएण मुणिउं, जणयस्स वरङ्गणाए गब्भम्मि। उववन्नो मह सत्तू, समयं अन्नेण जीवेणं ॥७२॥

सरिऊण विरहदुक्खं, सेणिय ! पुव्वाणुबन्धजोएण। वेरपडिवञ्चणट्ठे, तं गब्भं रक्खई देवो ॥७३॥

नाऊण एवमेयं, दुक्खं चिय न य परस्स कायव्वं। मा पुणरवि अहिययरं, पाविहह परम्परं दुक्खं ॥७४॥

अह सा सुहं पसूया, दुहिया पुत्तं च तत्थ वइदेही। पुव्वभवबद्धवेरो, हरइ सुरो बालयं सिग्घं ॥७५॥

चिन्तेइ तो मणेणं, एयं दढकक्खडे सिलापट्टे। पप्फोडेमि रसन्तं, अह कुण्डलमण्डियं सत्तुं ॥७६॥

---

योऽपि च शबर-पुलिन्द्रश्चाण्डालो वा दयापरो नित्यम्। मधुमांसनिवृत्या सः पापविवर्जितो भवति ॥६३॥

पापेन वर्जितस्य च देवत्वं भवत्यथ नरेन्द्रत्वम्। सम्यकत्वलब्धबुद्धिः क्रमेण सिद्धिमपि प्राप्स्यति ॥६४॥

एवं साधूपदेशं श्रुत्वा कुण्डलश्च दृढसत्त्वः। पञ्चाणुव्रतसहितो जातो मधुमांसविरतश्च ॥६५॥

जातोऽनन्यदृष्टी साधुं नत्वा निर्गतस्ततः। परिचिन्त्य व्रजत्यस्ति मम मातुलो निजकः ॥६६॥

तस्य प्रसादेनाहं शत्रुं जित्वा समरमध्ये। निजपुरे बलसहितः पुनरपि राज्यं करिष्यामि ॥६७॥

चिन्तयित्वा प्रवृत्त एकाकी दक्षिणापथं त्वरितः। पथपरिश्रमदुःखितो मरणावस्थस्ततो जातः ॥६८॥

यस्मिन्समये विमुचति जीवमिह कुण्डलो तत्रान्या। स्वर्गाच्च्युतादेव्यवसान आयुस्स्कन्धस्य ॥६९॥

जनकस्य महिलाया गर्भे समुच्छितौ विदेहायाः। जीवौ कर्मवशेन द्वावप्येकोदरे स्थितौ ॥७०॥

एतदन्तरे साधुःकालं कृत्वा पिङ्गलः स्वर्गे। जातः सुरो महात्मा स्मरत्यन्यं ततो जन्म ॥७१॥

अवधिविषयेन ज्ञात्वा जनकस्य वराङ्गनाया गर्भे। उत्पन्नो मम शत्रुः सकमन्येन जीवेन ॥७२॥

स्मृत्वा विरहदुःखं श्रेणिक ! पूर्वानुबन्धयोगेन। वेरप्रतिकारार्थे तद्गर्भं रक्षति देवः ॥७३॥

ज्ञात्वैवमेतद्दुःखमेव न च परस्य कर्तव्यम्। मा पुनरप्यधिकतरं प्राप्स्यसि परम्परं दुःखम् ॥७४॥

अथ सा सुखं प्रसूता दुहिता पुत्रं च तत्र वैदेहि। पूर्वभव बद्धवैरो हरति सुरो बालकं शीघ्रम् ॥७५॥

चिन्तयति तदा मनसैनं दृढकर्कशे शिलापट्टे। प्रस्फोटयामि रसन्नथ कुण्डलमण्डितं शत्रुम् ॥७६॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**पुणरवि चिन्तेइ सुरो, संसारनिबन्धणं ववसियं मे। कम्मं बहुदुक्खयरं, एयं बालं वहन्तेणं ॥७७॥**
**साहुपसाएण मए, जिणधम्मस्स य पसङ्गजोगणं। लद्धं मे देवत्तं, पावं न करेमि जाणन्तो ॥७८॥**
**परिचिन्तिऊण एयं, कुण्डल-वरहारभूसियं काउं। देवो मुञ्चइ बालं, उज्जाणे पत्तलच्छाए ॥७९॥**
**ताव य सेज्जासु ठिओ, चन्दगई खेयरो निसासमए। [1]चुंपालएण पेच्छइ, निवडन्तं रयणपज्जलियं ॥८०॥**
**किं एस हुप्पाओ, अहवा सोदामणीए खण्डो व्व ?। सवियक्कमणो गन्तुं, पेच्छइ बालं महियलत्थं ॥८१॥**
**घेत्तूण बालयं तं, अंसुमईए सुहं पसुत्ताए। सुकुमाल-कोमलङ्गं, जङ्घुद्देसम्मि संठवइ ॥८२॥**
**पडिबोहिऊण साहइ, सुन्दरि ! पुत्तं तुमं पसूया सि। तीए वि य सो भणिओ, किं वञ्झा पसवई नाह ! ॥८३॥**
**काऊण य अइहासं, सव्वं साहेइ बालसंबन्धं। तुज्झ इमो पसयच्छी !, होही पुत्तो अपुत्ताए ॥८४॥**
**भणिऊण एवमेयं, देवी [2]सूयाहरं समल्लीणा। तत्तो पहायसमए, लोयस्स पयासिओ पुत्तो ॥८५॥**
**जम्मूसवो महन्तो, तस्स कओ चक्कवालनयरम्मि। जह बन्धवा समत्था, लोगो वि य विम्हयं पत्तो ॥८६॥**
**कुण्डलमाणिक्कसमुज्जलेहि किरणेहि दित्तसव्वङ्गो। तो से गुणाणुरूवं, कयं च भामण्डलो नामं ॥८७॥**
**देहसुहलालणट्ठे, धाईण समप्पिओ तओ बालो। एत्तो सुणेहि सेणिय !, पुत्तपलावं विदेहाए ॥८८॥**
**हा पुत्तय ! केण हिओ, मज्झ अपुण्णाए पुव्ववेरीणं ?। दावेऊण वरनिहिं, अच्छीणि पुणो अवहियाणि ॥८९॥**
**वरकमलकोमलतणू, बालो अविकारिणो अबुद्धीओ। पावेण केण हरिओ, अज्ज महं निरणुकम्पेणं ? ॥९०॥**
**नूणं कओ विओगो, कस्स वि बालस्स अन्नजम्मम्मि। तस्सेयं कम्मफलं, न बीजरहियं हवइ कज्जं ॥९१॥**

---

पुनरपि चिन्तयति सुरः संसारनिबन्धनं व्यवसितं मया। कर्मबहुदुःखतरमेनं बालं वहता ॥७७॥
साधुप्रसादेन मया जिनधर्मस्य च प्रसङ्गयोगेन। लब्धं मया देवत्वं पापं न करोमि जानन् ॥७८॥
परिचिन्त्यैतत्कुण्डल-वरहारभूषितं कृत्वा। देवो मुञ्चति बालमुद्याने पत्रच्छाये ॥७९॥
तावच्च शय्यासु स्थितश्चन्द्रगतिः खेचरो निशासमये। गवाक्षेन पश्यति निपतन्तं रत्नप्रज्वलितम् ॥८०॥
किमेव महोत्पादोऽथवा सौदमिन्या खण्डो वा ?। सविकल्पमना गत्वा पश्यति बालं महीतलस्थम् ॥८१॥
गृहीत्वा बालकं तमशुमत्यां सुखं प्रसुप्तायाः। सुकुमालकोमलाङ्गं जङ्घोद्देशे संस्थापयति ॥८२॥
प्रतिबोधय्य कथयति सुन्दरि ! पुत्रं त्वं प्रसूताऽसि। तयाऽपि स भणितः किं वन्ध्या प्रसवति नाथ ! ॥८३॥
कृत्वा चातिहास्यं सर्वं कथयति बालसंबन्धम्। तवायम् प्रसन्नाक्षि ! भविष्यति पुत्रोऽपुत्र्यायाः ॥८४॥
भणित्वेवमेतद्देवी प्रसूतिगृहं समालीना। ततः प्रभातसमये लोकस्य प्रकाशितः पुत्रः ॥८५॥
जन्मोत्सवो महांस्तस्य कृतश्चक्रवालनगरे। यथा बान्धवाः समस्ता लोकोऽपि च विस्मयं प्राप्तः ॥८६॥
कुण्डलमाणिक्य समुज्वलैः किरणै र्दिप्तसर्वाङ्गः। तदा तस्य गुणानुरूपं कृतं च भामण्डलो नाम ॥८७॥
देहसुखलालनार्थे धात्रीं समर्पितस्ततो बालः। इतः श्रुणु श्रेणिक ! पुत्रप्रलापं विदेहायाः ॥८८॥
हा पुत्र ! केन हृतो ममापुण्ययाः पूर्ववैरिणा ?। दर्शयित्वा वरनिधिमक्षिणी पुनरपहृते ॥८९॥
वरकमलकोमलतनु र्बालोऽविकार्यबुद्धिकः। पापेन केन हृतोऽद्य मम निरनुकम्पेन ? ॥९०॥
नूनं कृतो वियोगः कस्यापि बालस्यान्यजन्मनि। तस्येदं कर्मफलं न बीजरहितं भवति कार्यम् ॥९१॥

---

१. गवाक्षेण। २. प्रसूतिगृहम्।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं परिदेवन्ती, जणओ परिसंथवेइ वइदेहिं। मा रोयसु अणुदियहं, पुव्वकयं पावई जीवो ॥९२॥
छड्डुसु सोगसमूहं, लेहं पेसेमि दसरहनिवस्स। सो हं च बालयं तं, अज्जपभूई गवेसामो ॥९३॥
संथाविऊण कन्तं, अणरण्णसुयस्स पेसिओ लेहो। तं सोऊण दसरहो, बालस्स गवेसणं कुणइ ॥९४॥
सिग्घं चारियपुरिसा, जणएण विसज्जिया समन्तेण। बालं गवेसिऊणं, निययपुरिं आगया सव्वे ॥९५॥
साहन्ति कयपणामा, सामि ! न दिट्ठो महिं भमन्तेहिं। केण वि गयणेण हिओ, सामिय ! दिव्वेण पुरिसेणं ॥९६॥
दुसहं हवइ समक्खं, दुक्खं चिय उब्भवे जणवयस्स। गयवेयणं तु पच्छा, जणम्मि एसा सुई भमइ ॥९७॥

सीता—

एवं अणुक्कमेणं, जोव्वण-लायण्ण-कन्तिपडिपुण्णा। सोयस्स मोयणट्ठं, नज्जइ संवड्ढिया सोया ॥९८॥
वरकमलपत्तनयणा, कोमुइरयणियरसरिसमुहसोहा। कुन्ददलसरिसदसणा, दाडिमफुल्लाहरच्छाया ॥९९॥
कोमलबाहालइया, रत्तासोउज्जलाभकरजुयला। करयलसुगेज्झमज्झा, वित्थिण्णनियम्बकरभोरू ॥१००॥
रत्तुप्पलसमचलणा, नहमणिविच्छुरियरकिरिणसंघाया। ओहासिउं व नज्जइ, रयणियरं चेव कन्तीए ॥१०१॥
एरिसरूवावयवा, लक्खणसंपुण्णजोव्वणगुणोहा। जणएण पसन्नेणं, रामस्स निवेइया सीया ॥१०२॥

सुरवरमहिला वा रूव-लावण्णजुत्ता, रमइ परिमिया सा सत्तकन्नासतेहिं।
जणयनरवरिन्दो रामदेवस्स भज्जं, विमलगुणसरंतो तं निरूवेइ सीयं ॥१०३॥

॥ इय पउमचरिए सीया-भामण्डलउप्पत्तिविहाणो नाम छव्वीसइमो उद्देसओ समत्तो ॥

---

एवं परिदेवन्तीं जनकः परिसंस्थापयति वैदेहीम्। मा रोदीरनुदिवसं पूर्वकृतं प्राप्नोति जीवः ॥९२॥
मुञ्च शोकसमूहं लेखं प्रेषयामि दशरथनृपस्य। सोऽहं च बालकं तमद्यप्रभृति गवेषयामि ॥९३॥
संस्थाप्य कान्तामनरण्यसुतस्य प्रेषितो लेखः। तच्छ्रुत्वा दशरथो बालस्य गवेषणां करोति ॥९४॥
शीघ्रं चरपुरुषा जनकेन विसर्जिताः समन्ततः। बालं गवेषयित्वा निजपुरिमागताः सर्वे ॥९५॥
कथयन्ति कृतप्रणामाः स्वामिन्न दृष्टो महीं भ्रमद्भिः। केनाऽपि गगनेन हृतः स्वामिन्! दिव्येन पुरुषेण ॥९६॥
दुःसहं भवति समक्षं दुःखमेवोद्भवं जनपदस्य। गतवेदनं तु पश्चाज्जने एषा श्रुतिर्भ्रमति ॥९७॥

सीता -

एवमनुक्रमेण यौवनलावण्यकान्ति परिपूर्णा। शोकस्य मोचनार्थं ज्ञायते संवर्धिता सीता ॥९८॥
वरकमलपत्रनयना कौमुदीरजनिकरसदृशमुखशोभा। कुन्ददलसदृशदशना दाडिमपुष्पाधरच्छाया ॥९९॥
कोमलबाहालतिका, रक्ताशोकोज्ज्वलाभकरयुगला। करतलसुग्राह्यमध्या विस्तीर्णनितम्बकरभोरूः ॥१००॥
रक्तोत्पलसमचरणा नभोमणि विच्छूरितकिरणसंघाता। अवभाषितुमिव ज्ञायते रजनिकरमिव कान्त्या ॥१०१॥
एतादृशरूपावयवा लक्षणसंपूर्णयौवनगुणौघा। जनकेन प्रसन्नेन रामस्य निवेदिता सीता ॥१०२॥

सुरवरमहिलेव रुपलावण्ययुक्ता रमते परिमिता सा सप्तकन्याशतैः।
जनकनरवरेन्द्रो रामदेवस्य भार्यां विमलगुणस्मरंस्तां निरुपयति सीताम् ॥१०३॥

॥ इति पद्मचरित्रे सीताभामण्डलोत्पत्तिविधानो नाम षड्विंशतितम उद्देशः समाप्तः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २७. रामकयमेच्छपराजयस्स कित्तणं

तो मगहनराहिवई, विम्हियहियओ मुणिं पणमिऊणं । पुच्छइ अणन्नहियओ, कहेहि रामस्स संबन्धं ॥१॥

रामस्स किं व दिट्ठं, माहप्पं जणयनरवरिन्देणं । रूव-गुण-जोव्वणधरी, निरूविया जेण सा सीया ? ॥२॥

अह भणइ गणाहिवई, सेणिय ! निसुणेहि जणयनरवइणा । कज्जेण जेण दुहिया, रामस्स निरूविया सीया ॥३॥

वेयड्ढदाहिणेणं, कइलासगिरिस्स उत्तरदिसाए । देसा हवन्ति बहवे, गामाऽऽगर-नगरपरिपुण्णा ॥४॥

तत्थेव अत्थि देसो, एक्को च्चिय अद्धबब्बरो नामं । निस्संजम-निस्सीलो, बहुमेच्छसमाउलो घोरो ॥५॥

तत्थ य मऊरमाले, नयरे परिवसइ मेच्छजणपउरे । नामेण आयरङ्गो, राया जमसरिसदढसत्तो ॥६॥

कम्बोय-सुय-कवोया, देसा अन्ने य सबरजणपउरा । एएसु जे नरिन्दा, ते पणया आयरङ्गस्स ॥७॥

### रामस्य अनार्यैः सह युद्धम्—

अह अन्नया कयाई, देसं जणयस्स बब्बरो राया । उव्वासिउं पयत्तो, चिलायसेन्नेण परिपुण्णो ॥८॥

सोऊण जणयराया, देसं उव्वासियं अणज्जेहिं । पेसेइ तुरियचवलं, पुरिसं चिय दसरहनिवस्स ॥९॥

गन्तूण पणमिऊण य, सव्वं मेच्छागमं परिकहेइ । देसविणासं च पुणो, जं चिय जणएण संदिट्ठं ॥१०॥

---

## २७. रामकृतम्लेच्छपराजयस्य कीर्तनम् -

तदा मगधाधिपति र्विस्मितहृदयो मुनिं प्रणम्य । पृच्छत्यनन्यहृदयः कथय रामस्य सम्बन्धम् ॥१॥

रामस्य किं वा दृष्टं माहात्म्यं जनकनरवरेन्द्रेण । रुपगुणयौवनधारी निरुपिता येन सा सीता ? ॥२॥

अथ भणति गणाधिपतिः श्रेणिक ! निश्रृणु जनकनरपतिना । कार्येण येन दुहिता रामस्य निरुपिता सीता ॥३॥

वैताढ्यदक्षिणेन कैलासगिरेरुत्तरदिशि । देशा भवन्ति बहवो ग्रामाऽऽकरनगरपरिपूर्णाः ॥४॥

तत्रैवास्ति देश एकैवादर्धबर्बरो नाम । निस्संयम-निश्शीलो बहुम्लेच्छसमाकुलः घोरः ॥५॥

तत्र च मयूरमाले नगरे परिवसति म्लेच्छजनप्रचूरे । नाम्नाऽऽयरंगो राजा यमसदृशदृढसत्त्वः ॥६॥

कम्बोज-शुक-कपोता देशा अन्याश्च शबरजनप्रचुराः । एतेषु ये नरेन्द्रास्ते प्रणता आयरंगस्य ॥७॥

### रामस्यानार्यैः सह युद्धम् -

अथान्यदा कदाचिद्देशं जनकस्य बर्बरो राजा । उद्वासितुं प्रवृत्त श्चिलातसैन्येन परिपूर्णः ॥८॥

श्रुत्वा जनकराजा देशमुद्वासितमनार्यैः । प्रेषयति त्वरितचपलं पुरुषमेव दशरथनृपस्य ॥९॥

गत्वा प्रणम्य च सर्वं म्लेच्छागमं परिकथयति । देशविनाशं च पुनर्यदैव जनकेन संदिष्टम् ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सामिय ! विन्नवइ तुमं, जणओ जणवच्छलो कयपणामो । मह अद्धबब्बरेहिं, सव्वो उव्वासिओ विसओ ॥११॥

[1]सावय समणा य बहू, विद्धत्थाणि य जिणिन्दभवणाणि । एयनिमित्तेण पहू !, एह लहुं रक्खणट्ठाए ॥१२॥

भणिऊण एवमेयं, रामं सद्दाविऊण नरवसभो । सव्वबलसमुदएणं, रज्जं दाउं समाढत्तो ॥१३॥

चामीयरकलसकरा, सूरा पडुपडह-बन्दिघोसेणं । अहिसेयकारणट्ठे, रामस्स अवट्ठिया पुरओ ॥१४॥

दट्ठूण एरिसं सो, आडोवं भणइ राहवो वयणं । किंकारणमिह सुहडा, कलसविहत्था समल्लीणा ? ॥१५॥

तो दसरहो पवुत्तो, पुत्तय ! मेच्छाण आगयं सेन्नं । पुहइं पालेहि तुमं, तस्साहं अहिमुहो जामि ॥१६॥

भणइ विहसन्तवयणो, रामो किं ताय ! पसुसरिच्छाणं । उवरिं जासि महाजस !, पुत्तेण मए सहीणेणं ? ॥१७॥

सोऊण वयणमेयं, हरिसियहियओ नराहिवो भणइ । बालो सि तुमं पुत्तय ! कह मेच्छबलं रणे जिणासि ? ॥१८॥

भणइ पउमो नराहिव !, थोवो च्चिय हुयवहो वणं बहुयं । दहइ य खणेण सव्वं, किं व बहुत्तेण निव्वडई?। ॥१९॥

रामस्स वयणनिहसं, सोऊणं नरवई भणइ एवं । संगामे सुहडजसं, पुत्तय ! पावन्तओ होहि ॥२०॥

काऊण पिउपणामं, दो वि कुमारा महन्तबलसहिया । अह निग्गया पुराओ, जयसद्दुग्घुट्ठतूररवा ॥२१॥

ताव च्चिय पढमयरं, विणिग्गयाणं तु जणयकणयाणं । दो चेव जोयणाइं, उभयबलाणऽन्तरं जायं ॥२२॥

रिवुबलसद्दुक्करिसं, असहन्ता जणयसन्तिया सुहडा । पविसन्ति मेच्छसेन्नं, गह व्व मेहाण संघायं ॥२३॥

---

स्वामिन् ! विज्ञापयति त्वां जनको जनवत्सलः कृतप्रणामः । ममादर्धबर्बरैः सर्व उद्वासितो विषयः ॥११॥

श्रावका श्रमणाश्च बहवो विध्वस्तानि च जिनेन्द्रभवानि । एतन्निमित्तेन प्रभो ! एत लघुं रक्षणार्थे ॥१२॥

भणित्वेवमेतद्रामं शब्दायित्वा नरवृषभः । सर्वबलसमुदायेन राज्यं दातुं समारब्धः ॥१३॥

चामीकरकलशकराः शूराः पटुपटह-बन्दिघोषेण । अभिषेककारणार्थे रामस्यावस्थिताः पुरतः ॥१४॥

दृष्ट्वेतादृशं स आटोपं भणति राघवो वचनम् । किंकारणमिह सुभटाः कलशविहस्ताः समालीनाः ? ॥१५॥

ततो दशरथः प्रोक्तः पुत्र ! म्लेच्छानामागतं सैन्यम् । पृथिवीं पालय त्वं तस्याहमभिमुखो यामि ॥१६॥

भणति विहसद्वदनो रामः किं तात ! पशुसदृशानाम् । उपरि यासि महायशः ! पुत्रेण मया स्वाधीनेन ? ॥१७॥

श्रुत्वा वचनमेतद्धर्षितहृदयो नराधिपो भणति । बालोऽसि त्वं पुत्र ! कथं म्लेच्छबलं रणे जयसि ॥१८॥

भणति पद्मो नराधिप ! स्तोक एव हुतवहो वनं बहुकम् । दहति च क्षणेन सर्वं किं वा बहुत्वेन निवर्तते ॥१९॥

रामस्य वचननिकषं श्रुत्वा नरपति र्भणत्येवम् । संग्रामे सुभटयशः प्राप्तवान्भव ॥२०॥

कृत्वा पितृप्रणामं द्वावपि कुमारौ महद्बलसहितौ । अथ निर्गतौ पुराज्जयशब्दोघृष्टतूर्यरवौ ॥२१॥

तावदेव प्रथमतरं विनिर्गतानां तु जनककनकानाम् । द्वावेव योजनावुभयबलानामन्तरं जातम् ॥२२॥

रिपुबलशब्दोत्कर्षमसहमाना जनकसत्काः सुभटाः । प्रविशन्ति म्लेच्छसैन्यं ग्रह इव मेघानां संघातम् ॥२३॥

---

१. तावससमणगणाण य बहूविहाण य जिणिन्दभवणाण-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मेच्छाण आरियाण य, संगामो दारुणो समावडिओ । अन्नोन्नसत्थघत्तिय-संघट्टुट्ठेन्तजालोहो ॥२४॥
अन्तरिओ च्चिय कणओ, मेच्छेहिं बहलतमसरिच्छेहिं । ताहे जणयनरिन्दो, वाहेइ समन्तसेन्नेणं ॥२५॥
तो बब्बरेहि जणओ, भग्गेहि पुणो पुणो समन्तेहिं । परिवेढिओ खणेणं, सूरो इव मेहनिवहेणं ॥२६॥
एयन्तरम्मि रामो, लक्खणसहिओ बलेण परिपुण्णो । संपत्तो च्चिय सहसा, तं मेच्छबलं अइमहन्तं ॥२७॥
आसासिऊण जणयं, रामो तं मेच्छसुहडसंघायं । पुणसरं पिव हत्थी, कुणइ च्चिय विहयविद्धत्थं ॥२८॥
तह लक्खणो वि बाणे, मुञ्चइ उवरिं अणारियभडाणं । नज्जइ य सायरवरे, वरिसइ मेहो सयरकाले ॥२९॥
निद्दयपहरुम्हवियं, भग्ग चिय मेच्छसाहणं समरे ! तह वि य सोमित्तिसुओ, धावइ मग्गेण बलसहिओ ॥३०॥
दट्ठूण नियससेन्नं, भग्गं चिय लक्खणेण परहुत्तं । सयमेव आयरङ्गो, सुहडेहि समं समुट्ठेइ ॥३१॥
केएत्थ कज्जलाभा, सुयपिच्छसमप्पभा तहिं अन्ने । अवरे तम्बयवण्णा, वामणदेहा चिबिडनासा ॥३२॥
वक्कलपत्तनियच्छा, मणिमयकडिसुत्तयाभरणदेहा । धाऊकयङ्गरागा, विरइसिरिमञ्जरीकुसुमा ॥३३॥
एवंविहेहि समयं, जोहेहिं आयरङ्गनरवसहो । अह लक्खणस्स पुरओ, उवट्ठिओ [1]दप्पियामरिसो ॥३४॥
गय-वसह-सीहचिन्धा, सर-सत्ति-करालकुन्तगहियकरा । जुज्झन्ति मेच्छसुहडा, खोभेन्ता अज्जवबलोहं ॥३५॥
अह लक्खणस्स चावं, दुहाकयं आयरङ्गनरवइणा । जाव य गेण्हइ खग्गं, ताव य विरहो कओ सिग्घं ॥३६॥

---

म्लेच्छानामार्याणां च संग्रामो दारुणः समापतितः । अन्योन्यशस्त्रगृहीतसंघर्षोत्थितजालौधः ॥२४॥
अन्तरित एव जनको म्लेच्छै र्बहलतमः सदृशैः । तदा जनकनरेन्द्रो वाह्यति सामन्तसैन्येन ॥२५॥
ततो बर्बरै र्जनको भग्नैः पुनः पुनः सामन्तैः । परिवेष्टितः क्षणेन सूर्य इव मेघनिवहेन ॥२६॥
अत्रान्तरे रामो लक्ष्मणसहितो बलेन परिपूर्णः । संप्राप्त एव सहसा तन्म्लेच्छबलमतिमहत् ॥२७॥
आश्वास्य जनकं रामस्तं म्लेच्छसुभटसंघातम् । पद्मसर इव हस्ती करोत्येव विहत-विध्वस्तम् ॥२८॥
तदा लक्ष्मणोऽपि बाणान्मुञ्चत्युपर्यनार्यभटानाम् । ज्ञायते च सागरवरे वर्षति मेघः शरत्काले ॥२९॥
निर्दयप्रहरोष्मापितं भग्नमेव म्लेच्छसाधनं समरे । तथापि च सौमित्रिसुतो धावति मार्गेणबलसहितः ॥३०॥
दृष्ट्वा निजसैन्यं भग्नमेव लक्ष्मणेन पराभूतम् । स्वयमेवायारङ्गः सुभटैः समं समुत्तिष्ठति ॥३१॥
केचित्कज्जलाभा शुकपक्षसमप्रभा तथान्ये । अपरे ताम्रवर्णावामनदेहा श्चिपिटनासाः ॥३२॥
वल्कलपत्रनेपथ्या मणिमयकटिसूत्राभरणदेहाः । धातुकृताङ्गरागा विरचितश्रीमञ्जरिकुसुमाः ॥२३॥
एवंविधैः समं योधैरायरंगनरवृषभः । अथ लक्ष्मणस्य पुरत उपस्थितो दर्पितामर्षः ॥३४॥
गज-वृषभ-सिंहचिन्हाः शरशक्ति-करालकुन्तगृहीतकराः । युध्यन्ते म्लेच्छसुभटाः क्षोभयन्त आर्यबलौघम् ॥३५॥
अथ लक्ष्मणस्य चापं द्विधा कृतमायरङ्गनरपतिना । यावच्च गृह्णाति खड्गं तावच्च विरथः कृतः शीघ्रम् ॥३६॥

---

१. वड्डियामरिसो-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दट्ठूण लक्खणं सो, विरहं सयमेव उट्ठिओ रामो । सर-सत्ति-चक्क-मोग्गर-सएसु सेन्नं विवाएन्तो ॥३७॥

रामेण आयरङ्गो, गरुयपहाराहओ कओ विमुहो । नस्सइ विभग्गमाणो, दस वि दिसाओ पलोएन्तो ॥३८॥

हय-विहय-विप्परद्धं, सेन्नं काऊण राहवो समरे । मग्गं अमुञ्चमाणो, नियत्तिओ लक्खणेण तओ ॥३९॥

जाओ य महाणन्दो, पुहई आवासिया भयविमुक्का । वीसज्जिओ य रामो, लद्धजसो पत्थिओ [1] नयरिं ॥४०॥

तं पुरिसयारनिहसं, दट्ठूण नराहिवेण तुट्ठेणं । रामस्स निययधूया, जणएण निरूविया सीया ॥४१॥

एवं मणुस्सो सुकएण पुव्वं, जयं रणे पाइ वीरसत्तो ।
विक्खायकित्ती भुवणे पसिद्धो, ससि व्व रामो विमलप्पभावो ॥४२॥

॥ इय पउमचरिए मेच्छपराजयकित्तणो नाम सत्तावीसइमो उद्देसओ समत्तो ॥

---

दृष्ट्वा लक्ष्मणं स विरथं स्वयमेवोत्थितो रामः । शर-शक्ति-चक्र-मुद्गर शतैः सैन्यं व्यापादयन् ॥३७॥

रामेणाऽऽयरङ्गो गुरुकप्रहाराहतः कृतो विमुखः । नश्यति विभज्यमानो दशापि दिशः प्रलोकमाणः ॥३८॥

हत-वित-विपीडितं सैन्यं कृत्वा राधवः समरे । मार्गममुञ्चन् निवर्त्तितो लक्ष्मणेन ततः ॥३९॥

जातश्च महानन्दः पृथिव्यावासिता भयविमुक्ता । विसर्जितश्च रामो लब्धयशाः प्रस्थितो नगरीम् ॥४०॥

तं पौरुषकारनिकसं दृष्टवा नराधिपेन तुष्टेन । रामस्य निजदुहिता जनकेन निरुपिता सीता ॥४१॥

एवं मनुष्यः सुकृतेन पूर्वं जयं रणे प्राप्नोति वीरसत्त्वः ।
विख्यातकीर्त्ति र्भुवने प्रसिद्धः शशीव रामो विमलप्रभावः ॥४२॥

॥ इति पद्मचरित्रे म्लेच्छपराजयकीर्त्तनो नाम सप्तविंशतितम उद्देशः समाप्तः ॥

---

१. नयरं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## २८. राम-लक्खण-धणुरयणलाभविहाणं

अह अन्नया कयाई, पुहइ भमन्तेण नारएण सुया । रामस्स पवररूवा, जणएण निरूविया सीया ॥१॥
ताहे नहङ्गणेणं, उप्पइउं नारओ गओ मिहिलं । कन्नालोयणहियओ, सीयाभवणं समल्लीणो ॥२॥
दट्ठूण पविसरन्तं, दीहजडामउडभासुरं सहसा । भयविहलवेविरङ्गी, सीया भवणोयरं लीणा ॥३॥
अणुमग्गेण रियन्तो, रुद्धो नारीहिं दारवालीहिं । कलहन्तो ताहि समं, गहिओ सो रायपुरिसेहिं ॥४॥
जाव य भणन्ति पुरिसा, को एसो ? हणइ मुट्ठिपहरेहिं । ताव भउव्विग्गमणो, उप्पइउं नारओ नट्ठो ॥५॥
कइलासपव्वओवरि, आसत्थो चिन्तिऊण आढत्तो । अह तं पोढकुमारी, वसणसमुद्दे निवाडेमि ॥६॥
परिचिन्तिऊण एवं, सिग्घं रहणेउरं गओ नयरं । ताहे उज्जाणहरे, सीयारूवं पडे लिहइ ॥७॥
ताव च्चिय चन्दगई, कन्नारूवं पडे समालिहियं । दट्ठूण तं विसण्णो, सहसा भामण्डलकुमारो ॥९॥
मुञ्चइ दीहुस्सासे, सोयइ पलवइ य अन्नमन्नाइं । रत्तिं दिया य निद्दं, न लहइ चिन्तापरिग्गहिओ ॥१०॥
सुसुयन्धगच्छमल्लाइयाइँ, आहार-मज्जणविहीओ । नेच्छइ अणन्नहियओ, परिहायइ अङ्गमङ्गेसु ॥११॥
नाऊण तं कुमारं, मयणावत्थं तु नारओ ताहे । अहदेइ दरिसणं चिय, वीसत्थो तस्स गन्तूणं ॥१२॥

---

## २८. रामलक्ष्मणधनूरत्नलाभ विधानम् -

अथान्यदाकदाचित्पृथिवीं भ्रमता नारदेन श्रुता । रामस्य प्रवररुपा जनकेन निरुपिता सीता ॥१॥
तदा नभोऽङ्गणेनोत्पत्य नारदो गतो मिथिलाम् । कन्याऽऽलोकनहृदयः सीताभवनं समालीनः ॥२॥
दृष्ट्वा प्रविशन्तं दीर्घजटामुकुटभासुरं सहसा । भयविह्वलवेपिताङ्गी सीता भवनोदरं लीना ॥३॥
अनुमार्गेण यान् रुद्धो नारीभि र्द्वारपालीभिः । कलहयन् ताभिःसमं गृहीतः स राजपुरुषैः ॥४॥
यावच्च भणन्ति पुरुषाः क एषः ? घ्नत मुष्टिप्रहारैः । तावद्भयोद्विग्नमना उत्पत्य नारदो नष्टः ॥५॥
कैलासपर्वतोपर्याश्वस्तश्चिन्तयितुमारब्धः । अहं तां प्रौढकुमारीं व्यसनसमुद्रे निपातयामि ॥६॥
परिचिन्त्यैवं शीघ्रं रथनूपुरं गतो नगरम् । तदोद्यानगृहे सीतारुपं पटे लिखति ॥७॥
तावदेव चन्द्रगतिः समकं भामण्डलेन नगरात् । अथ निर्गतो महात्मा क्रीडनहेतुं तदुद्यानम् ॥८॥
तं पेच्छिऊण सिया, सहोयरं जायबन्धवसिणेहा। पगलन्तअंसुनिवहा, रुयइ च्चिय महुरसद्देण ॥७९॥
चिरकालदरिसणुस्सुय-हियया आलिङ्गिउं समासत्था। सीया वि य कमलमुही, परिओसुब्भिन्नरोमञ्ची ॥८०॥
रामेण लक्खणेण य, अन्नेण पि सेसबन्धवजणेणं। आलिङ्गिओ कुमारो, गरुयसिणेहाणुरागेणं ॥८१॥
तं पणमिऊण समणं, विज्जाहर-भूमिगोयरा सव्वे। हय-गय-जोहसमग्गा साएयपुरिं पविसरन्ति ॥८२॥
भामण्डलेण समयं, संमन्तेऊण दसरहो लेहं। पेसेइ खेयरवरं, आसेण समं पवणवेगं ॥८३॥
गन्तूण पणमिऊण य, पवणगईणं नराहिवो जणओ। वद्धाविओ य सहसा, पुत्तस्स समागमेणं तु ॥८४॥
लेहं समप्पियं सो जणओ सुणिऊण तस्स परितुट्ठो। देइ निययङ्गलग्गं, आहरणविहिं निरवसेसं ॥८५॥
लेहत्थमुणियसारो, सपरियणो नरवई सभज्जाओ। अभिणन्दिओ सुदूरं, कयकोउयमङ्गलरवेणं ॥८६॥
विज्जाहरसाहीणं, भज्जाए समं नराहिवो तुरियं। आरुहिऊण खणेणं, साएयपुरिं सममुपत्तो ॥८७॥
दट्ठूण नियपुत्तं, आलिङ्गिऊण रुयइ नरवसभो। अइदीहवियोगाणल-तविओ पगलन्तनयणजुओ ॥८८॥
रुइऊण समासत्थो, पुत्तं परिमुसइ अङ्गमङ्गेसु। हियएण जायहरिसो, चन्दणफरिसोवमं महइ ॥८९॥

---

यश्चैव कयाणः खलु सरसां हत्वा भ्रमति संसारे। मधुपिङ्गल इति श्रमणो जातः पुनः सुरवरो मृत्वा ॥७६॥
योऽपि च सोऽतिभूतिः स हु त्वं कुण्डलः समुत्पन्नः। एष तव सम्बन्धः परभवजनितस्य कर्मणः ॥७७॥
एवमेव वृत्तान्तं सर्वं श्रुत्वा दशरथो राजा। भामण्डलं कुमारमवगूहति तीव्रस्नेहेन ॥७८॥
तं दृष्ट्वा सीता सहोदरं जातबन्धुस्नेहा। प्रगलदश्रुनिवहा रोदित्येव मधुरशब्देन ॥७९॥
चिरकालदर्शनोत्सुकहृदयाऽऽलिङ्ग्य समाश्वस्ता। सीताऽपि च कमलमुखी परितोषोद्भिन्नरोमाञ्ची ॥८०॥
रामेण लक्ष्मणेन चान्येनाऽपि शेषबन्धुजनेन। आलिङ्गितः कुमारो गुरुकस्नेहानुरागेण ॥८१॥
तं प्रणम्य श्रमणं विद्याधर-भूमिगोचराः सर्वे। हय-गज-योधसमग्राः साकेतपुरिं प्रविशन्ति ॥८२॥
भामण्डलेन समकं सन्मन्त्र्य दशरथो लेखम्। प्रेषयति खेचरवरमश्वेन समं पवनवेगम् ॥८३॥
गत्वा प्रणम्य च पवनगतिना नराधिपो जनकः। वर्धापितश्च सहसा पुत्रस्य समागमेनं तु ॥८४॥
लेखं समर्पितं स जनकः श्रुत्वा तस्य परितुष्टः। ददाति निजाङ्गलग्नमाभरणविधिं निरवशेषम् ॥८५॥
लेखस्थमुणितसारः सपरिजनो नरपतिः सभार्याकः। अभिनन्दितः सुदूरं कृतकौतुकमङ्गलरवेण ॥८६॥
विद्याधरस्वाधीनं भार्यायाः समं नराधिपस्त्वरितम्। आरुह्य क्षणेन साकेतपुरिं समनुप्राप्तः ॥८७॥
दृष्ट्वा निजपुत्रमालिङ्ग्य रोदिति नरवृषभः। अतिदीर्घवियोगानलतप्तः प्रगलन्नयनयुग्मः ॥८८॥
रोदित्वा समाश्वस्तः पुत्रं परिमृशत्यङ्गमङ्गेषु। हृदयेन जातहर्षश्चन्दनस्पर्शोपमं काङ्क्षते ॥८९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दट्ठूण सुयं जणणी, [1]मुच्छं गन्तूण तत्थ पडिबुद्धा । रुयइ कलुणं मयच्छी, चिरदंसणलद्धजीयासा ॥९०॥
जत्तो पभूइ पुत्तय ! केण वि बालत्तणम्मि अवहरिओ । तत्तो इमं सरीरं, दड्ढं चिन्तग्गिणा मज्झं ॥९१॥
तुह दरिसणोदएणं, विज्झवियं एत्थ नत्थि संदेहो । परितोससमूसवियं, अज्जप्पभिइं महं हिययं ॥९२॥
धन्ना सा [2]अंसुमई, जीए अङ्गाणि बालभावम्मि । परिचुम्बियाणि पुत्तय ! कीलणरयणेणुमइलाइं ॥९३॥
फुसिऊण नयणजुयलं, थणेसु खीरं तओ हरिसियङ्गी । अभिणन्दिया विदेहा, समगामे नियपुत्तस्स ॥९४॥
कुणइ जणओ महन्तं, पुत्तनिमित्तं समागमाणन्दं । जिणचेउयपूयत्थं, ण्हवणविहिं चेव सविसेसं ॥९५॥
भामण्डलेण भणिओ, रामो अच्चन्तबन्धवो तुहयं । सीया न गच्छइ पहू, जह उव्वेयं पयणुयं पि ॥९६॥
संभासिऊण सव्वे, जणयं मिहिलापुरिं विसज्जेउ । पियरं घेतूण गओ, नियय भामण्डलो ठाणं ॥९७॥
एवं सेणिय ! पेच्छ धम्मनिहसं तुङ्गं पुरा सेवियं, जाओ नेहनिरन्तरोच्छ्रयमणो [3]बन्धू पहामण्डलो ।
वज्जावत्तधणुं वसम्मि ठवियं सीया य से गेहिणी, रामस्सऽब्भुयकारणस्स विमलो भन्तो जसो मेइणी[4] ॥९८॥

॥ इय पउमचरिए भामण्डलसंगमविहाणो नाम तीसइमो उद्देसओ समत्तो ॥

---

दृष्ट्वा सुतं जननी मुर्च्छां गत्वा तत्र प्रतिबुद्धा । रोदिति करुणं मृगाक्षिश्चिरदर्शनलब्धजीविताशा ॥९०॥
यतः प्रभृति पुत्र ! केनापि बालत्वेऽपहृतः । तत इदं शरीरं दग्धं चिन्ताग्निना मम ॥९१॥
तव दर्शनोदयेन विध्यापितमत्र नास्ति संदेहः । परितोषसमुच्छ्रितमद्यप्रभृति मम हृदयम् ॥९२॥
धन्या सांशुमती ययाङ्गानि बालभावे । परिचुम्बितानि पुत्र ! क्रीडन्नजोरेणुमलिनानि ॥९३॥
स्पृष्ट्वा नयनयुगलं स्तनयोः क्षीरं ततो हर्षिताङ्गी । अभिनन्दिता विदेहा समागमे निजपुत्रस्य ॥९४॥
करोति जनको महान्तं पुत्रनिमित्तं समागमानन्दम् । जिनचैत्यपूजार्थं स्नपनविधिं चैव सविशेषम् ॥९५॥
भामण्डलेन भणितो रामोऽत्यन्तबन्धवस्तव । सीता न गच्छति प्रभो ! यथोद्वेगं प्रतनुकमपि ॥९६॥
संभाष्य सर्वाञ्जनकं मिथिलापुरीं विसर्ज्य । पितरं गृहीत्वा गतो निजकं भामण्डलः स्थानम् ॥९७॥
एवं श्रेणिक ! पश्य धर्मनिकषं तुङ्गं पुरा सेवितम् । जातः स्नेहनिरन्तरोच्छ्रयमना बन्धुः प्रभामण्डलः ।
वज्रावर्तधनु र्वशे स्थापितं सीता च तस्य गृहिणी रामस्याऽभ्युदयकारणस्य विमलं भ्रान्तं यशो मेदिनीम् ॥९८॥

॥ इति पद्मचरित्रे भामण्डलसंगमविधानो नाम त्रिंशत्तम उद्देशः समाप्तः ॥

---

१. मुच्छं-प्रत्य० । २. सा पुप्फवई-मु० । ३. बन्धू य भामण्डलो-प्रत्य० । ४. भेइणिं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३१. दसरहपवज्जानिच्छयविहाणं

पुच्छइ मगहनरेन्दो, गणाहिवं दसरहो महारिद्धिं। केण व कएण पत्तो ? एयं साहेहि मे भयवं ! ॥१॥
तो भणइ इन्दभूई, सेणिय ! निसुणेहि दसरहो राया। मुणिसव्वभूयसरणं, पुच्छि नियय भवसमूहं ॥२॥
जं एव नरवईणं, अप्पहियं पुच्छिओए समणिसीहो। तो साहिउं पवत्तो, परभवपरियट्टणं बहुसो ॥३॥

### दशरथपूर्वभवः—

तो भणइ दसरह ! तुमं, मिच्छत्तेणं तु भमिय संसारे। सेणापुरम्मि नयरे, अत्थि च्चिय भावणो नामं ॥४॥
भज्जा य दीविया से, तीए उवत्थी सुया समुप्पन्ना। सा मिच्छत्तमइलिया, साहूण अवण्णवादी उ ॥५॥
मरिऊण उवत्थी सा, भमिय चिरं नरय-तिरियजोणीसु। कम्मपरिणिज्जराए, कमेण पुण्णस्स उदएणं ॥६॥
जाओ च्चिय अङ्गपुरे, धरणेणं नयणसुन्दरीपुत्तो। बहुबन्धवो सुरूवो, नामेणं भद्दवरुणो त्ति ॥७॥
दाऊण भावसुद्धं, फासुयदाणं मुणिस्स कालगओ। धाइयसण्डम्मि तओ, उत्तरकुरुवे समुप्पन्नो ॥८॥
भोत्तूण मिहुणसोक्खं, कालगओ सुरवरो समुप्पन्नो। चइऊण पुक्खलाए, नयरीए नन्दिघोसस्स ॥९॥
जाओ च्चिय भज्जाए, पुहईए नन्दिबद्धणो नामं। अह अन्नया नरेन्दो, पडिबुद्धो नन्दिघोसो उ ॥१०॥

---

## ३१. दशरथप्रव्रज्यानिश्चयविधानम्

पृच्छति नरेन्द्रो गणाधिपं दशरथमहर्द्धिम्। केन वा कृतेन प्राप्तः ? एतत्कथय मे भगवन् ! ॥१॥
तदा भणतीन्द्रभूतिः श्रेणिक ! निश्रुणु दशरथो राजा। मुनिसर्वभूतशरणं पृच्छति निजकं भवसमूहम् ॥२॥
यदेव नरपतिनाऽऽत्महितं पृष्टः श्रमणसिंहः। तदा कथयितुं प्रवृत्तः परभवपर्यटनं बहुशः ॥३॥

### दशरथपूर्वभवः -

ततो भणति दशरथ ! त्वं मिथ्यात्वेन तु भ्रान्त्वा। संसारे सेनापुरे नगरे अस्तिचैव भावनो नाम ॥४॥
भार्या च दीपिका तस्य तस्यारुपस्थी सुता समुत्पन्ना। सा मिथ्यात्वमलिना साधूनामवर्णवादी तु ॥५॥
मृत्वोपस्थी सा भ्रान्त्वा चिरं नरकतिर्यग्योनिषु। कर्मपरिनिर्जरायाः क्रमेण पुण्यस्योदयेन ॥६॥
जातश्चैवाङ्गपुरे धरणेन नयनसुन्दरीपुत्रः। बहुबान्धवः सुरुपो नाम्ना भद्रवरुण इति ॥७॥
दत्वा भावशुद्धं प्रासुकदानं मुनये कालगतः। घातकीखण्डे तत उत्तरकुरावुत्पन्नः ॥८॥
भुक्त्वा मिथुनसुखं कालगतः सुरवरः समुत्पन्नः। च्युत्वा पुष्कलायां नगर्यां नन्दिघोषस्य ॥९॥
जातश्चैव भार्यायां पृथिव्यां नन्दिवर्धनो नाम। अथान्यदा नरेन्द्रः प्रतिबुद्धो नन्दिघोषस्तु ॥१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संसारभउव्विग्गो, ठविऊणं नन्दिवद्धणं रज्जे । निक्खमइ नन्दिघोसो, पासम्मि जसोहरमुणिस्स ॥११॥
काऊण तवमुयारं, कालगओ सुरवरो समुप्पन्नो। अह नन्दिवद्धणो विय, सागारतवं कुणइ धीरो ॥१२॥
भोत्तूण [1]पुव्वकोडिं, रज्जं सण्णासणेण कालगओ । विमलामलबोंदिधरो, पञ्चमकप्पे सुरो जाओ ॥१३॥
तत्तो चुओ समाणो, अवरविदेहे नगम्मि वेयड्ढे । उत्तरवरसेढीए, विक्खाओ ससिपुरे राया ॥१४॥
नामेण रयणमाली, तस्स पियाए य कुच्छिसंभूओ । विज्जुलयाए पुत्तो, जाओ सूरंजयकुमारो ॥१५॥
कोहाणलविज्जाए, डहिउमणो रिउपुरं रहारूढो । वच्चन्तो च्चिय भणिओ, गयणलत्थेण देवेणं ॥१७॥
भो रयणमालिनरवइ ! मा ववससु एरिसं महापावं । निसुणेहि मज्झ वयणं, कहेमि तुह पुव्व संबन्धं ॥१८॥
इह भारहम्मि वरिसे, गन्धारे आसि भूरिणो नामं । दट्ठूण कमलगब्भं, साहुं तो गेण्हए नियमं ॥१९॥
न करेमि पुणो पावं, भणइ तओ एरिसं वयं मज्झं । पञ्चपलिओवमाइं, सग्गे अज्जेइ देवाउं ॥२०॥
उवमच्चुनामधेयो, तत्थेव पुरोहिओ वसइ पावो । तस्सुवएसेण वयं, मुञ्चइ भूरी अकयपुण्णो ॥२१॥
खन्देण हिंसिओ सो, पुरोहिओ गयवरो समुप्पन्नो । जुज्झे जज्जरियतणू, लहइ च्चिय कण्णजावं सो ॥२२॥
कालगओ गन्धारे, तत्थेव उ भूरिणस्स उप्पन्नो । जोयणगन्धाए सुओ, अरिहसणो नाम नामेणं ॥२३॥
दट्ठूण कमलगब्भं, पुव्वभवं सुमरिऊण पव्वइओ । कालगओ उप्पन्नो, सहसारे सुरवरो अहयं ॥२४॥

---

संसारभयोद्विग्नः स्थापयित्वा नन्दिवर्धनं राज्ये । निष्क्रामति नन्दिघोषः पार्श्वे यशोधरमुनेः ॥११॥
कृत्वा तप उदारं कालगतः सुरवरः समुत्पन्नः । अथ नन्दिवर्धनोऽपिच साकारं तपः करोति धीरः ॥१२॥
भुक्त्वा पूर्वकोटिं राज्यं संन्यासेन कालगतः । विमलामलबोंदिधरः पञ्चमकल्पे सुरो जातः ॥१३॥
ततश्च्युतस्सन्नपरविदेहे नगे वैताढ्ये । उत्तरवरश्रेणौ विख्यातः शशिपुरे राजा ॥१४॥
नाम्ना रत्नमाली तस्य प्रियायाश्च कुक्षिसंभूतः । विद्युल्लतायाः पुत्रो जातः सूरंजयकुमारः ॥१५॥
अथ विग्रहेण चलितः सिंहपुरं रत्नमाली सबलः । सन्नद्धबद्ध-कवचो यत्र च स वज्रवरनयनः ॥१६॥
क्रोधानलविद्यया दग्धुमना रिपुपुरं रथारुढः । व्रजन्नेव भणितो गगनतलस्थेन देवेन ॥१७॥
भो रत्नमालिनरपते ! मा व्यवसयैतादृशं महापापम् । निःश्रुणु मम वचनं कथयामि तव पूर्वसम्बन्धम् ॥१८॥
इह भरते वर्षे गन्धारे आसीद्भूरिणो नाम । दृष्ट्वा कमलगर्भं साधुं तदा गृह्णाति नियमम् ॥१९॥
न करोमि पुनः पापं भणति ते इदृशं व्रतं मम । पञ्चपल्योपमानि स्वर्गेऽर्जयति देवायुः ॥२०॥
उपमृत्युनामधेयस्तत्रैव पुरोहितो वसति पापः । तस्योपदेशेन व्रतं मुञ्चति भूर्यकृतपुण्यः ॥२१॥
स्कन्देन हिंसितः स पुरोहितो गजवरः समुत्पन्नः । युद्धे जर्जरिततनुर्लभते चैव कर्णजापं सः ॥२२॥
कालगतो गन्धारे तत्रैव तु भूरिण उत्पन्नः । योजनगन्धायाः सुतोऽरिहसनो नाम नाम्ना ॥२३॥
दृष्ट्वा कमलगर्भं पूर्वभवं स्मृत्वा प्रव्रजितः । कालगत उत्पन्नः सहस्रारकल्पे सुरवरोऽहम् ॥२४॥

---

१. पुव्वकोडी-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सो हु तुमं जो भूरी, कालं काऊण दण्डगारण्णे । जाओ दगकित्तिधरो, दवेण दड्ढो मओ त्तो ॥२५॥**

**पावपसङ्गेण गओ, बीयं चिय सक्करप्पभं पुढविं । तत्थ मए नेहेणं, नरए पडिबोहिओ गन्तुं ॥२६॥**

**तत्तो च्चिय नरयाओ, कालेणुव्वट्टिओ रयणमाली । जाओ तुमं महायस, राया विज्जाहराहिवई ॥२७॥**

**जो आसि पुरा भूरी, सो हु तुमं रयणमालिणो जाओ । जो वि य आसुवमच्चू, पुरोहिओ सो अहं देवो ॥२८॥**

**किं ते नऽणुहूयाइं, दुक्खाइं नरय-तिरियजोणीसु । जेणेरिसं अकज्जं, करेसि घणरागदोसेणं ॥२९॥**

**सुणिऊण देववयणं, संवेगपरायणो नरवरेन्दो । कुलणन्दणं ठवेई, रज्जे सूरंजयस्स सुयं ॥३०॥**

**सूरंजएण समयं, आयरियं तिलयसुन्दरं सरणं । पत्तो य रयणमाली, दिक्खं जिणदेसियं धीरो ॥३१॥**

**सूरंजओ महन्तं, काऊण तवं गओ महासुक्कं । चविओ अणरण्णसुओ, जाओ च्चिय दसरहो सि तुमं ॥३२॥**

**नरवइ थोवेण तुमं, पुण्णेण उवत्थिमाइसु भवेसु । वडबीयं पिव विड्ढिं, पत्तो सुहकम्मउदएणं ॥३३॥**

**जो आसि नन्दिघोसो, तुज्झ पिया नन्दिवद्धणस्स पुरा । सो हं गेवेज्जचुओ, जाओ मुणिसव्वभूयहिओ ॥३४॥**

**जे वि य ते दोण्णि जणा, भूरी-उवमच्चुनामधेयाऽऽसि । ते चेव जणय-कणया, इह तुज्झ वसाणुगा जाया ॥३५॥**

**संसारम्मि य घोरे, अणेयभवसयसहस्ससंबन्धे । उव्वट्टण-परियट्टण, करेन्तिजीवा सकम्मेहिं ॥३६॥**

**एवं मुणिवरभणियं, सुणिऊणं दसरहो भउव्विग्गो । अह संजमाभिलासी, जाओ च्चिय तक्खणं चेव ॥३७॥**

**सव्वायरेण चलणे, गुरुस्स नमिऊण दसरहो राया । पविसइ निययनयरिं, साएयं [1]जण-धणाइण्णं ॥३८॥**

---

स हु त्वं यो भूरी कालं कृत्वा दण्डकारण्ये । जातो दककीर्तिधरो दवेन दग्धो मृतश्तदा ॥२५॥

पापप्रसङ्गेन गतो द्वितीयामेव शर्कराप्रभां पृथिवीम् । तत्र मया स्नेहेन नरके प्रतिबोधितो गत्वा ॥२६॥

तत एव नरकात् कालेनोद्वर्त्तितो रत्नमाली । जातस्त्वं महायशः ! राजा विद्याधराधिपतिः ॥२७॥

य आसीत्पुरा भूरी स हु त्वं रत्नमाली जातः । योऽपि चासीदुपमृत्युः पुरोहितः सोऽहं देवः ॥२८॥

किं त्वया नानुभूतानि दुःखानि नरक-तिर्यग्योनिषु । येनैतादृशमकार्यं करोषि घनरागदोषेण ॥२९॥

श्रुत्वा देववचनं संवेगपरायणो नरवरेन्द्रः । कुलनन्दनं स्थापयति राज्ये सूरंजयस्य सुतम् ॥३०॥

सूरंजयेन समकमाचार्यतिलकसुन्दरं शरणम् । प्राप्तश्च रत्नमाली दिक्षां जिनदेशितां धीरः ॥३१॥

सूरंजयो महत्कृत्वातपो गतो महाशुक्रम् । च्युतोऽनरण्यसुतो जात एव दशरथोऽसि त्वम् ॥३२॥

नरपते ! स्तोकेन त्वं पुण्येनोपास्त्यादिषु भवेषु । वटबीजमिव वृद्धिं प्राप्तः शुभकर्मोदयेन ॥३३॥

य आसीन्नन्दिघोषस्तव पिता नन्दिवर्धनस्य पुरा । सोऽहं ग्रैवेयकच्युतो जातो मुनिसर्वभूतहितः ॥३४॥

यावपि च तौ द्वौ जनौ भूरि-उपमृत्यू नामधेयौ स्तः । तो चैव जनक-कनकाविह तव वशानुगौ जातौ ॥३५॥

संसारे च घोरेऽनेकभवशतसहस्रसम्बन्धे । उद्वर्तन-परिवर्तनं कुर्वन्ति जीवाः स्वकर्मभिः ॥३६॥

एवं मुनिवरभणितं श्रुत्वा दशरथो भयोद्विग्नः । अथ संयमाभिलाषी जातश्चैव तत्क्षणमेव ॥३७॥

सर्वादरेण चरणयो गुरोर्नत्वा दशरथो राजा । प्रविशति निजनगरीं साकेतां जन-घनाकीर्णाम् ॥३८॥

---

१. धण-कणाइण्णं-प्रत्य० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

चिन्तेइ तो मणेणं, रज्जं दाऊण पउमनाभस्स । तो सव्वसङ्गरहिओ, मुत्तिसुहं चेव पत्थेमो ॥३९॥

मेरु व्व धीरगरुओ, रामो तिसमुद्दमेहलं पुहइं । पालेऊण समत्थो, परिकिण्णो बन्धवजणेणं ॥४०॥

## हेमन्तवर्णनम् –

चिन्तावरस्स एवं, नरेन्दवसभस्स रज्जविमुहस्स । अभिलङ्घिओ य सरओ, हेमन्तो चेव संपत्तो ॥४१॥

हेमन्तवायविहवो, लोगो परिफुडियअहर-कर-चरणो । रयरेणुपडलछन्नो, ससी व मन्दच्छविं वहइ ॥४२॥

आकुञ्चियकर-गीवा, पुरिसा सीएण फुडियसव्वङ्गा । सुमरन्ति अग्गिनिवहं, दीणा वि य मन्दपाउरणा ॥४३॥

आवडियदसणवीणा, दारु-तणाजीवया थरथरेन्ता । दारिद्दसमभिभूया, गमेन्ति कालं अकयपुण्णा ॥४४॥

पासायतलत्था वि य, अन्ने पुण गीय-वाइयरवेणं । वरवत्थपाउयङ्गा, कालागरुधूवसुसुयन्धा ॥४५॥

भुञ्जन्ति सया रसियं, आहारं कणयभायणविदिन्नं । कुंकुमकयङ्गरागा अक्खीणधणा सुकयपुण्णा ॥४६॥

कलमहुभासिणीहिं, संगयवरचारुवेसरूवाहिं । तरुणविलयाहि समयं, कीलन्ति चिरं सुकयपुण्णा ॥४७॥

धम्मेण लहइ जीवो, सुर-माणुसविविहभोगसामिद्धिं । नरय-तिरिक्खेसु पुणो, पावइ दुक्खं अहम्मेणं ॥४८॥

एव सुणिऊण राया, कम्मविवागं जणस्स सयलस्स । संसारगमणभीओ, इच्छइ घेत्तूण पव्वज्जं ॥४९॥

सद्दाविया य सिग्घं, सामन्ता आगया समन्तिजणा । काऊण सिरपणामं, उवविट्ठा आसणवरेसु ॥५०॥

सामिय ! देहाऽऽणत्तिं, किं करणिज्जं ? भडेहि संलवियं । भणिया य दसरहेणं, पव्वज्जं गिण्हिमो अज्जं ॥५१॥

---

चिन्तयति तदा मनसा राज्यं दत्वा पद्मनाभस्य । ततः सर्वसङ्गरहितो मुक्तिसुखमेव प्रार्थयामि ॥३९॥

मेरुरिव धीरगुरुको रामस्त्रिसमुद्रमेखलां पृथिवीम् । पालयितुं समर्थं परिकीर्णो बान्धवजनेन ॥४०॥

## हेमन्तवर्णनम् -

चिन्तापरस्यैवं नरेन्द्रवृषभस्य राज्यविमुखस्य । अभिलङ्घितश्च शरद्धेमन्तश्चैव संप्राप्तः ॥४१॥

हेमन्तवातविभवो लोकः परिस्फुटिताधर-कर-चरणः । रजोरेणुपटलच्छन्नः शशीव मन्दच्छविं वहति ॥४२॥

आकुञ्चितकरग्रीवाः पुरुषाः शीतेन स्फुटितसर्वाङ्गाः । स्मरन्त्यग्निनिवहं दीना अपि च मन्दप्रावरणाः ॥४३॥

आपतितदशनवीणादारुतृणाजीवकाथरथरन्तः । दारिद्र्यसमभिभूता गमयन्ति कालमकृतपुण्याः ॥४४॥

प्रासादतलस्था अपि चान्ये पुन गीतवादितरवेण । वरवस्त्रप्रावृताङ्गाः कालागरुधूपसुसुगन्धाः ॥४५॥

भुञ्जते सदा रसिकमाहारं कनकभाजनवितीर्णम् । कुंकुमकृताङ्गरागा अक्षीणधनाः सुकृतपुण्याः ॥४६॥

कलमधुरभाषिणिभिः संगतवरचारूवेशरूपाभिः । तरुणवनिताभिः समकं क्रीडन्ति चिरं सुकृतपुण्याः ॥४७॥

धर्मेण लभते जीवः सुर-मनुष्यविविधभोगसमृद्धिम् । नरक-तिर्यक्षु पुनः प्राप्नोति दुःखमधर्मेण ॥४८॥

एवं श्रुत्वा राजा कर्मविपाकं जनस्य सकलस्य । संसारगमनभीत इच्छति ग्रहितुं प्रव्रज्याम् ॥४९॥

शब्दिताश्च शीघ्रं सामन्ता आगता समन्त्रिजनाः । कृत्वा शिरः प्रणाममुपविष्ट्य आसनवरेषु ॥५०॥

स्वामिन् ! देह्याज्ञेति किं कर्त्तव्यं ? भटैः संलप्तम् । भणिता च दशरथेन प्रव्रज्यां गृह्णाम्यद्यः ॥५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अह तं भणन्ति मन्ती, सामिय ! किं अज्ज कारणं जायं। धणसयलजुवइवग्गं, जेण तुमं ववसिओ मोत्तुं ? ॥५२॥
तो भणइ नरवरेन्दो, पच्चक्खं तो जयं निरवसेसं। सुक्कं व तणमसारं, डज्झइ मरणग्गिणा [1] धणियं ॥५३॥
भवियाण जं सुगिज्झं, अग्गिज्झं अभवियाण जीवाणं। तियसाण पत्थणिज्जं, सिवगमणसुहावहं धम्मं ॥५४॥
तं अज्ज मुणिसयासे, धम्मं सुणिऊण जायसंवेगो। संसारभवसमुद्दं, इच्छामि अहं समुत्तरिउं ॥५५॥
अहिसिञ्चह मे पुत्तं, पढमं चिय रज्जपालणसमत्थं। पव्वज्जामि अविग्घं, जेणाहं अज्ज वीसत्थो ॥५६॥
सुणिऊण वयणमेयं, पव्वज्जानिच्छियं नरवरिन्दं। सुहडा-ऽमच्च-पुरोहिय, पडिया सोयण्णवे सहसा ॥५७॥
नाऊण निच्छियमई, दिक्खाभिमुहं नराहिवं एत्तो। अन्तेउरजुवइजणो, सव्वो रुविउं समाढत्तो ॥५८॥
दट्ठूण तारिसं चिय, पियरं भरहो खणेण पडिबुद्धो। चिन्तेइ नेहबन्धो, दुच्छेज्जो जीवलोगम्मि ॥५९॥
तायस्स किं व कीरइ, पव्वज्जाववसियस्स पुहईए ?। पुत्तं ठवेइ रज्जे, जेणं चिय पालणट्ठाए ॥६०॥
आसन्नेण किमेत्थं, इमेण खणभङ्गुरेण देहेणं। दूरट्ठिएसु अहियं, काऽवत्था बन्धवेसु भवे ? ॥६१॥
एक्कोऽत्थ एस जीवो, दुहपायवसंकुले भवारण्णे। भमइ च्चिय मोहन्धो, पुणरवि तत्थेव तत्थेव ॥६२॥
तो सव्वकलाकुसला, भरहं नाऊण तत्थ पडिबुद्धं। सोगसमुत्थयहियया, परिचिन्तेइ केगई देवी ॥६३॥

### भरतस्य राज्यं रामस्य च वनवासः—

न य मे पई न पुत्तो, दोण्णि वि दिक्खाभिलासिणो जाया। चिन्तेमि तं उवायं, जेण सुयं वो नियत्तेमि ॥६४॥

---

अथ तं भणन्ति मन्त्रिणः स्वामिन् ! किमद्य कारणं जातम्। धनसकलयुवतिवर्गं येन त्वं व्यवसितमोक्तुम् ? ॥५२॥
तदा भणति नरवरेन्द्रः प्रत्यक्षं वो जगन्निरवशेषम्। शुष्कमिव तृणमसारं दह्यते मरणाग्निनात्यन्तम् ॥५३॥
भव्यानां यत्सुग्राह्यमग्राह्यमभव्यानां जीवानाम्। त्रिदशानां प्रार्थनीयं शिवगमनसुखावहं धर्मम् ॥५४॥
तमद्य मुनिसकाशे धर्मं श्रुत्वा जातसंवेगः। संसारभवसमुद्रमिच्छाम्यहं समुत्तरितुम् ॥५५॥
अभिषिञ्चत मम पुत्रं प्रथममेव राज्यपालनसमर्थम्। प्रव्रज्याम्यविघ्नं येनाहमद्य विश्वस्तः ॥५६॥
श्रुत्वा वचनमेतत्प्रव्रज्यानिश्चितं नरवरेन्द्रम्। सुभटामात्यपुरोहिताः पतिताः शोकार्णवे सहसा ॥५७॥
ज्ञात्वा निश्चितमतिं दिक्षाभिमुखं नराधिपमितः। अन्तःपुरयुवतिजनः सर्वो रोदितुं समारब्धः ॥५८॥
दृष्ट्वा तादृशमेव पितरं भरतः क्षणेन प्रतिबुद्धः। चिन्तयति स्नेहबन्धो दुच्छेद्यो जीवलोके ॥५९॥
तातस्य किं वा क्रियते प्रव्रज्याव्यवसितस्य पृथिव्या ?। पुत्रं स्थापयति राज्ये येनैव पालनार्थे ॥६०॥
आसन्नेन किमर्थमनेन क्षणभङ्गुरेण देहेन। दुरस्थितेष्वधिकं काऽवस्था बान्धवेषु भवेत् ? ॥६१॥
एकोऽत्रैष जीवो दुःखपादपसंकुले भवारण्ये। भ्रमत्येव मोहान्धः पुनरपि तत्रैव तत्रैव ॥६२॥
तदा सर्वकलाकुशला भरतं ज्ञात्वा तत्र प्रतिबुद्धम्। शोकसमवस्तृतहृदयाः परिचिन्तयति कैकयी देवी ॥६३॥

### भरतस्य राज्यं रामस्य च वनवासः -

न च मे पति र्न पुत्रो द्वावपि दिक्षाभिलाषिणौ जातौ। चिन्तयामि तदुपायं येन सुतं वा निवर्तयामि ॥६४॥

---

१. निययं-मु०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तो सा विणओवगया, भणइ निवं केगई महादेवी । तं मे वरं पयच्छसु, जो भणिओ सुहडसामक्खं ॥६५॥
भणइ तओ नरवसभो, दिक्खं मोत्तूण जं पिए भणसि । तं अज्ज तुज्झ सुन्दरि ! सव्वं संपाडइस्सामि ॥६६॥
सुणिऊण वयणमेयं, रोवन्ती केगई भणइ कन्तं । दढनेहबन्धणं चिय, विरागखग्गेण छिन्नं ते ॥६७॥
एसा दुद्धरचरिया, उवइट्ठा जिणवरेहि सव्वेहिं । कह अज्ज तक्खणं चिय, उप्पन्ना संजमे बुद्धी ? ॥६८॥
सुरवइसमेसु सामिय ! निययं भोगेसु लालियं देहं । खर-फरुस-कक्कसयरे, कह अरिहसि परिसहे जेउं ? ॥६९॥
चलणङ्गुलीए भूमिं, विलिहन्ती केगई समुल्लवइ । पुत्तस्स मज्झ सामिय ! देहि समत्थं इमं रज्जं ॥७०॥
तो दसरहो पवुत्तो, सुन्दरि ! पुत्तस्स तुज्झ रज्जं ते । दिन्नं मए समत्थं, गेण्हसु मा णे चिरावेहि ॥७१॥
तो दसरहेण सिग्घं, पउमो सोमित्तिणा समं पुत्तो । वाहरिओ वसहगई, समागओ कयपणामो य ॥७२॥
वच्छ ! महासंगामे, सारत्थं केगईए मज्झ कयं । तुट्ठेण वरो दिन्नो, सव्वनरेन्दाण पच्चक्खं ॥७३॥
तो केगईए रज्जं, पुत्तस्स विमग्गियं इमं सयलं । किं वा करेमि वच्छय ! पडिओ चिन्तासमुद्दे हं ॥७४॥
भरहो गिण्हइ दिक्खं, तस्स विओगम्मि केगई मरइ । अहमवि य निच्छएणं, होहामि जए अलियवाई ॥७५॥
तो भणइ पउमनाहो, ताय ! तुमं रक्ख अत्तणो वयणं । न य भोगकारणं मे, तुज्झ अकित्तीए लोगम्मि ॥७६॥
जाएण सुएण पहू ! चिन्तेयव्वं हियं निययकालं । जेण पिया न य सोगं, गच्छइ एक्कं पि य मुहुत्तं ॥७७॥
जाव च्चिय एस कहा, वट्टइ परिसाणुरञ्जणी ताव । पत्तो भरहकुमारो, संवेगमणो पिउसगासं ॥७८॥

---

तदा सा विनयोपगता भणति नृपं कैकयी महादेवी । तन्मे वरं प्रयच्छ यो भणितः सुभटसमक्षम् ॥६५॥
भणति ततो नरवृषभो दिक्षां मुक्त्वा यत्प्रियो भणसि । तमद्य तव सुन्दरि ! सर्वं संपादयिष्यामि ॥६६॥
श्रुत्वा वचनमेतद्रुदन्ती कैकयी भणति कान्तम् । दृढस्नेहबन्धनमेव विरागखड्गेन छिन्नं ते ॥६७॥
एषा दुर्धरचर्योपदिष्या जिनवरैः सर्वैः । कथमद्य तत्क्षणमेवोत्पन्ना संयमे बुद्धिः ? ॥६८॥
सुरपतिसमैः स्वामिन्नित्यं भोगै र्लालितं देहम् । खर-परुष-कर्कशतरान्कथमर्हसि परिषहान् जेतुम् ? ॥६९॥
चरणाङ्गुल्या भूमिं विलिखन्ती कैकयी समुल्लपति । पुत्राय मम स्वामिन्देहि समस्तमिदं राज्यम् ॥७०॥
तदा दशरथः प्रोक्तः सुन्दरि ! पुत्राय तव राज्यं ते । दत्तं मया समस्तं गृहाण मा चिराय ॥७१॥
ततो दशरथेन शीघ्रं पद्मः सौमित्रिणा समं पुत्रः । व्याहृतो वृषभगतिः समागतः कृतप्रणामश्च ॥७२॥
वत्स ! महासंग्रामे सारथ्यं केकय्या मम कृतम् । तुष्टेन वरो दत्तः सर्वनरेन्द्राणां प्रत्यक्षम् ॥७३॥
तदा कैकय्या राज्यं पुत्रस्य विमार्गितमिदं सकलम् । किं वा करोमि वत्सक ! पतितश्चिन्तासमुद्रेऽहम् ॥७४॥
भरतो गृह्णाति दिक्षां तस्य वियोगे कैकयी म्रियते । अहमपि च निश्चयेन भविष्यामि जगत्यलीकवादी ॥७५॥
ततो भणति पद्मनाभस्तात ! त्वं रक्षात्मनो वचनम् । न च भोगकारणं मे तवाकीर्त्या लोके ॥७६॥
योग्येन सुतेन प्रभो ! चिन्तितव्यं हितं नित्यकालम् । येन पिता न शोकं गच्छत्येकमपि च मुहूर्तम् ॥७७॥
यावदेवैषा कथा वर्तते पर्षदनुरञ्जनी तावत् । प्राप्तो भरतकुमारः संवेगमनाः पितृसकाशम् ॥७८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**भणिओ य दसरहेणं, वच्छ ! तुमं होहि रज्जसाहारो । अहयं पुण निस्सङ्गो, जिणवरदिक्खं पवज्जामि ॥७९॥**
**सो भणइ नत्थि कज्जं, रज्जेण महं करेमि पव्वज्जं । मा तिव्वदुक्खपउरे, ताय ! भमिस्सामि संसारे ॥८०॥**
**अणुभवसु पुत्त ! सोक्खं, सारं माणुस्सयस्स जम्मस्स । ता पच्छिमम्मि काले, जिणवरदिक्खं करेज्जासि ॥८१॥**
**पुणरवि एव पवुत्तो, भरहो किं ताय मोहसि अकज्जे ? । न य बाल-विद्ध-तरुणं, मच्चू पडिवालई कोई ॥८२॥**
**गेहासमे वि धम्मो, पुत्त ! महागुणकरो समक्खाओ । तम्हा गिहिधम्मरओ, होहि तुमं सयलरज्जवई ॥८३॥**
**जइ लहइ मुत्तिसोक्खं, पुरिसो गिहधम्मसंठिओ सन्तो । तो कीस मुञ्चसि तुमं, गेहं संसारपरिभीओ ? ॥८४॥**
**मोत्तूण सयणवग्गं, धण-धन्नं मायरं च पियरं च । सुह-दुक्खं वेयन्तो, एगागी हिण्डई जीवो ॥८५॥**
**सुणिऊण पुत्तवयणं, परितुट्ठो दसरहो भणइ एवं । साहु त्ति साहु अहियं, पडिबुद्धो भवियसद्दूलो ॥८६॥**
**तह वि तुमे मह वयणं, पुत्तय ! कायव्वयं अविमणेणं । निसुणेहि कहिज्जन्तं, भूयत्थं सारसब्भावं ॥८७॥**
**सारत्थतोसिएणं, संगामे जो वरो मए दिन्नो । सो अज्ज तुज्झ पुत्तय ! जणणीए मग्गिओ इहइं ॥८८॥**
**रज्जे ठवेहि पुत्तं, भणिओ हं केगईए देवीए । तो अणुपालेहि तुमं, सयलसमत्थं इमं वसुहं ॥८९॥**
**पउमो वि तं कुमारं, हत्थे घेत्तूण भणइ नेहेणं । निक्कण्टयमणुकूलं, करेहि रज्जं सुचिरकालं ॥९०॥**
**तायस्स विमलकित्ती, करेहि परिपालणं च जणणीए । भरहेण य पडिभणिओ, न य तुज्झ वइक्कमं काहं ॥९१॥**
**अडविनईसु गिरीसु य, तत्थाऽऽवासं करेमि एगन्ते । जह मे न मुणइ कोई, कुणसु य रज्जं सुचिरकालं ॥९२॥**

---

भणितश्च दशरथेन वत्स ! त्वं भव राज्यस्याधारः । अहं पुनर्निःसङ्गो जिनवरदिक्षां प्रव्रजामि ॥७९॥
स भणति नास्ति कार्यं राज्येन मम करोमि प्रव्रज्याम् । मा तीव्रदुःखप्रचुरे तात ! भ्रमिष्यामि संसारे ॥८०॥
अनुभव पुत्र ! सुखं सारं मनुष्यस्य जन्मनः । ततः पश्चिमे काले जिनवरदीक्षां कुर्याः ॥८१॥
पुनरप्येवं प्रोक्तो भरतः किं तात ! मोहयत्यकार्ये ? । न च बाल-वृद्ध-तरुणं मृत्युः प्रतिपालयति कोऽपि ॥८२॥
गृहाश्रमेऽपि धर्मः पुत्र ! महागुणकरः समाख्यातः । तस्माद्गृहधर्मरतो भव त्वं सकलराज्यपतिः ॥८३॥
यदि लभते मुक्तिसुखं पुरुषो गृहधर्मसंस्थितः सन् । तदा कथं मुञ्चसि त्वं गृहं संसारपरिभीतः ? ॥८४॥
मुक्त्वा स्वजनवर्गं धन-धान्यं मातरं च पितरं च । सुख दुःखं वेदयन्नेकाकी हिण्डते जीवः ॥८५॥
श्रुत्वा पुत्रवचनं परितुष्ठो दशरथो भणत्येवम् । साध्विति साध्वधिकं प्रतिबुद्धो भविकशार्दुलः ॥८६॥
तथापि त्वया मम वचनं पुत्र ! कर्त्तव्यमविमनसा । निश्रुणु कथयन्तं भूतार्थं सारसद्भावम् ॥८७॥
सारथ्यतोषितेन संग्रामे यो वरो मया दत्तः । सोऽद्य तव पुत्र ! जनन्या मार्गित इदानीम् ॥८८॥
राज्ये स्थापय पुत्रं भणितोऽहं कैकय्या देव्या । ततोऽनुपालय त्वं सकलसमस्तामिमां वसुधाम् ॥८९॥
पद्मोऽपि तं कुमारं हस्ते गृहीत्वा भणति स्नेहेन । निष्कण्टकमनुकूलं कुरु राज्यं सुचिरकालम् ॥९०॥
तातस्य विमलकीर्त्तिः कुरु परिपालनं च जनन्याः । भरतेन च प्रतिभणितो न च तव व्यतीक्रमं करिष्यामि ॥९१॥
अटवीनदीषु गिरिषु च तत्रावासं करोम्येकान्ते । यथा मे न जानाति कोऽपि कुरुष्व च राज्यं सुचिरकालम् ॥९२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भणिऊण वयणमेयं, पणमिय पिउपायपङ्कज सिरसा । रामो वरगयगामी, विणिग्गओ रायपरिसाओ ॥९३॥
एत्थन्तरम्मि [1]मुच्छा, राया गन्तूण तत्थ पडिबुद्धो । नज्जइ आलेक्खगओ, अणिमिसनयणो पलोएइ ॥९४॥
गन्तूण नियय[2]जणणी, आउच्छइ राहवो कयपणामो । अम्मो ! वच्चामि अहं, दूरपवासं खमेज्जासु ॥९५॥
सुणिऊण वयणमेयं, सहसा तो मुच्छिऊण पडिबुद्धा । भणइ सुयं रोवन्ती, पुत्तय !किं मे परिच्चयसि ? ॥९६॥
कह कह वि [3]अणाहाए, लद्धो सि मणोरहेहि बहुएहिं । होहिसि पुत्ताऽऽलम्बो, पारोहो चेव साहाए ॥९७॥
भरहस्स मही दिन्ना, ताएणं केगईवरनिमित्तं । सन्तेण मए नेच्छइ, एस कुमारो महिं भोत्तुं ॥७८॥
दिक्खाभिमुहो राया, पुत्तय ! दूरं तुमं पि वच्चिहिसि । पइ-पुत्तविरहिया इह, कं सरणमहं पवज्जामि ? ॥९९॥
विज्झगिरिमत्थए वा, मलए वा सायरस्स वाऽऽसन्ने । काऊण पइट्ठाणं, तुज्झ फुडं आगमिस्से हं ॥१००॥
जणणीए सिरपणामं, काऊणं सेसमाइवग्गस्स । पुणरवि य नरवरिन्दं, पणमइ रामो गमणसज्जो ॥१०१॥
आपुच्छिया य सव्वे, पुरोहिया-ऽमच्च-बन्धवा सुहडा । रह-गय-तुरङ्गमा वि य, पलोइया निद्धदिट्ठीए ॥१०२॥
चाउव्वण्णं च जणं, आपुच्छेऊण निग्गओ रामो । वइदेही वि य ससुरं, पणमइ परमेण विणएणं ॥१०३॥
सव्वाण सासुयाणं, काऊणं चलणवन्दणं सीया । सहियायणं च नियय, आपुच्छिय निग्गया एत्तो ॥१०४॥
गन्तूण समाढत्तं, रामं दट्ठूण लक्खणो रुट्ठो । ताएण अयसबहुलं, कह एयं पत्थियं कज्जं ? ॥१०५॥

---

भणित्वा वचनमेतत्प्रणम्य पितृपादपङ्कजे शिरसा । रामो वरगजगामी विनिर्गतो राजपर्षदः ॥९३॥
अत्रान्तरे मूर्च्छां राजा गत्वा तत्र प्रतिबुद्धः । ज्ञायत आलेखगतोऽनिमिषनयनः प्रलोकयति ॥९४॥
गत्वा निजजननीमापृच्छति राघवः कृतप्रणामः । मात ! व्रजाम्यहं दूरप्रवासं क्षमस्व ॥९५॥
श्रुत्वा वचनमेतत्सहसा तो मूर्च्छित्वा प्रतिबुद्धा । भणति सुतं रुदन्ती पुत्र ! किं मां परित्यजसि ? ॥९६॥
कथंकथमप्यनाथया लब्धोऽसि मनोरथैर्बहुभिः । भविष्यसि पुत्राऽलम्बनः प्ररोह इव शाखायाः ॥९७॥
भरताय मही दत्ता तातेन कैकयीवरनिमित्तम् । सता मया नेच्छत्येष कुमारो महीं भोक्तुम् ॥९८॥
दिक्षाभिमुखो राजा पुत्र ! दूरं त्वमपि गमिष्यसि । पति-पुत्रविरहितेह कं शरणमहं प्रपद्ये ? ॥९९॥
विंध्यगिरिमस्तके वा मलये वा सागरस्य वाऽऽसन्ने । कृत्वा प्रतिष्ठानं तव स्फुटमागमस्याम्यहम् ॥१००॥
जनन्याः शिरःप्रणामं कृत्वा शेषमातृवर्गस्य । पुनरपि च नरवरेन्द्रं प्रणमति रामो गमनसज्जः ॥१०१॥
आपृष्टश्च सर्वे पुरोहिताऽमात्यबान्धवाः सुभटाः । रथ-गज-तुरङ्गमा अपि च प्रलोकिताः स्निग्धदृष्ट्या ॥१०२॥
चातुर्वर्णं च जनमापृच्छ्य निर्गतो रामः । वेदैह्यापि च श्वसुरं प्रणमति परमेण विनयेन ॥१०३॥
सर्वासां श्वश्रूणां कृत्वा चरणवन्दनं सीता । सखीजनं च निजकमापृच्छ्य निर्गतेतः ॥१०४॥
गंतुं समारब्धं रामं दृष्टवा लक्ष्मणो रुष्टः । तातेनाऽयशोबहुलं कथमेतत्प्रस्थितं कार्यम् ? ॥१०५॥

---

१. मुच्छं-प्रत्य० । २. जणणिं-प्रत्य० । ३. अहन्नाए-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एत्थ नरिन्दाण जए, परिवाडीआगयं हवइ रज्जं । विवरीयं चिय रइयं, ताएण अदीहपेहीणं ॥१०६॥

रामस्स को गुणाणं, अन्तं पावेज्ज धीरगरुयस्स ? । लोभेण जस्स रहियं, चित्तं चिय मुणिवरस्सेव ॥१०७॥

अहवा रज्जधुरधरं, सव्वं फेडेमि अज्ज भरहस्स । ठावेमि कुलाणीए, पुहइवइं आसणे रामं ॥१०८॥

एएण किं व मज्झं, हवइ वियारेण ववसिएणऽज्जं ? । नवरं पुण तच्चत्थं, ताओ जेट्ठो य जाणन्ति ॥१०९॥

कोवं च उवसमेउं, पणमिय पियरं परेण विणएणं । आपुच्छइ दढचित्तो, सोमित्ती अत्तणो [1]जणणी ॥११०॥

संभासिऊण भिच्चे, वज्जावत्तं च धणुवरं घेत्तुं । घणपीइसंपउत्तो, पउमसयासं समल्लीणो ॥१११॥

पियरेण बन्धवेहि य, सामन्तसएसु [2]परिमिया सन्ता । रायभवणाओ एत्तो, विणिग्गया सुरकुमार व्व ॥११२॥

सुयसोगतावियाओ, धरणियलोसित्तअंसुनिवहाओ । कह कह वि पणमिऊणं, नियत्तियाओ य जणणीओ ॥११३॥

काऊण सिरपणामं, नियत्तिओ दसरहो य रामेणं । सहवड्डिया य बन्धू, कलुणपलावं च कुणमाणा ॥११४॥

जंपन्ति एक्कमेक्कं, एस पुरी जइ वि [3]जणवयाइण्णा । जाया रामविओगे, दीसइ विज्झाडवी चेव ॥११५॥

लोगो वि उस्सुगमणो, जंपइ धन्ना इमा जणयधूया । जा वच्चइ परदेसं, रामेण समं महामहिला ॥११६॥

नयणजलसित्तगत्तं, पेच्छह जणणिं इमं पमोत्तूणं । चलिओ रामेण समं, एसो च्चिय लक्खणकुमारो ॥११७॥

तेसु कुमारेसु समं, सामन्तजणेण वच्चमाणेणं । सुन्ना साएयपुरी, जाया छणवज्जिया तइया ॥११८॥

---

अत्र नरेन्द्राणां जगति परिपाट्यागतं भवति राज्यम् । विपरितमेव रचितं तातेनादीर्घप्रेक्षिणा ॥१०६॥

रामस्य को गुणानामन्तं प्राप्नुयाद् धीर गुरुकस्य ? । लोभेन यस्य रहितं चित्तमेव मुनिवरस्येव ॥१०७॥

अथवा राज्यधुरंधरं सर्वं स्फोट्याम्यद्य भरतस्य । स्थापयामि कुलानीते पृथिवीपतिमासने रामम् ॥१०८॥

एतेन किं वा मम भवति विचारेण व्यसितेनाद्य ? । नवरं पुनस्तथ्यार्थं तातो ज्येष्टश्च जानाति ॥१०९॥

कोपमुपशम्य प्रणम्य पितरं परेण विनयेन । आपृच्छति दृढचित्तः सौमित्र्यात्मनो जननीम् ॥११०॥

संभाष्य भृत्यान्वज्रावर्त्तं च धनुर्वरं गृहीत्वा । घनप्रीतिसंप्रयुक्तः पद्मसकाशं समालीनः ॥१११॥

पित्रा बान्धवैश्च सामन्तशतैः परिमितौ सन्तौ । राजभवनादितो विनिर्गतौ सुरकुमाराविव ॥११२॥

सुतशोकतप्ता धरणितलाबसिक्तांशुनिवहाः । कथं कथमपि प्रणम्य निवर्त्तिताश्च जनन्यः ॥११३॥

कृत्वा शिरः प्रणामं निवर्त्तितो दशरथश्च रामेण । सहवर्धिताश्च बान्धवः करुणप्रलापं च क्रियमाणाः ॥११४॥

जल्पन्त्येकैकमेषा पुरी यद्यपि जनपदाकीर्णा । जाता रामवियोगे दृश्यते विन्ध्याटवीव ॥११५॥

लोकोऽप्युत्सुकमना जल्पति धन्येमा जनकसुता । या व्रजति परदेशं रामेण समं महामहिला ॥११६॥

नयनजलसिक्तगात्रां पश्यत जननीमिमां प्रमुच्य । चलितो रामेण सममेष एव लक्ष्मणकुमारः ॥११७॥

तयोः कुमारयोः समं सामन्तजनेन गच्छता । शून्या साकेतपुरी जाता क्षणवर्जिता तदा ॥११८॥

---

१. जणणिं-प्रत्य० । २. परिवृता इत्यर्थः । ३. धणकणाइण्णा-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न नियत्तइ नयरजणो, धाडिज्जन्तो वि दण्डपुरिसेहिं । ताव य दिवसवसाणे, सूरो अत्थं समल्लीणो ॥११९॥
नयरीए मज्झयारे, दिट्ठं चिय जिणहरं मणभिरामं । हरिसियरोमञ्चइया, तत्थ पविट्ठा परमतुट्ठा ॥१२०॥
थोऊण अच्चिऊण य, जिणपडिमाओ परेण भावेणं । तत्थेव सन्निविट्ठा, समयं चिय जणसमूहेणं ॥१२१॥
ते तत्थ वरकुमारा, वसिया सोऊण ताण जणणीहिं । आगन्तूण जिणहरे, दोहिं वि पुत्ता समागूढा ॥१२२॥
सव्वाण वि सुद्धीणं, मणसुद्धी चेव उत्तमा लोए । आलिङ्गइ भत्तारं, भावेणऽन्नेण पुत्तं च ॥१२३॥
पुत्तेहि समं ताओ, सम्मन्तेऊण पडिणियत्ताओ । डोलावियहियायाओ, [1]दइयसमीवं उवगयाओ ॥१२४॥
नमिऊण य भत्तारं, भणन्ति रामं ससीय-सोमित्तिं । पल्लट्टेहि महायस ! मा उव्वेक्खं कुणसु धीर ? ॥१२५॥
तो भणइ दसरहनिवो, न य मे इह अत्थि किंचि सायत्तं । जं जस्स पुव्वविहियं, तं तस्स नरस्स उवणमइ ॥१२६॥
ववगयरज्जभरो हं, विरओ पावस्स संजमाभिमुहो । न य नज्जइ कं वेलं, मुणिवरचरियं पवज्जामि ॥१२७॥

एवं नरिन्दो जिणसासणुज्जओ, अहो य राओ य सिवाभिलासिणो ।
सुहं पबुद्धो मिह भव्वकेसरी, विमुत्तिमग्गे विमले सुहालए ॥१२८॥

॥ इय पउमचरिए दसरहपव्वज्जानिच्छयविहाणो नाम एक्कतीसइमो उद्देसओ समत्तो ॥

---

न निवर्तते नगरजनो निसार्यमाणोऽपि दण्डपुरुषैः । तावच्च दिवसावसाने सूर्योऽस्तं समालीनः ॥११९॥
नगर्यां मध्ये दृष्टमेव जिनगृहं मनोभिरामम् । हर्षितरोमाञ्चितास्तत्र प्रविष्टाः परमतुष्टाः ॥१२०॥
स्तुत्वा अर्चित्वा च जिनप्रतिमाः परेण भावेन । तत्रैव सन्निविष्टाः समकमेव जनसमूहेन ॥१२१॥
तौ तत्र वरकुमारावुषितौ श्रुत्वा तयो र्जननीभिः । आगत्य जिनगृहे द्वावपि पुत्रौ समालिङ्गितौ ॥१२२॥
सर्वासामपि शुद्धीनां मनःशुद्धिरेवोत्तमा लोके । आलिङ्गति भर्तारं भावेनान्येन पुत्रं च ॥१२३॥
पुत्रैः समं ताः सम्मन्त्र्य प्रतिनिवृत्ताः । दोलायितहृदया दयितसमीपमुपागताः ॥१२४॥
नत्वा च भर्तारं भणन्ति रामं ससीत-सौमित्रिम् । पर्यस्य महायशः ! मोपेक्षां कुरु धीर ? ॥१२५॥
तदा भणति दशरथनृपो न च ममेहास्ति किंचित्स्वायत्तम् । यद्यस्य पूर्वविहितं तत्तस्य नरस्योपनमति ।१२६॥
व्यपगतराज्यभारोऽहं विरतः पापात् संयमाभिमुखः । न च ज्ञायते कां वेलां मुनिवरचरित्रं प्रव्रजामि ॥१२७॥

एवं नरेन्द्रो जिनशासनोद्यतोऽहश्च रात्रिं च शिवाभिलाषी ॥
सुखं प्रबुद्ध इह भव्यकेसरी विमुक्तिमार्गे विमले सुखालये ॥१२८॥

॥ इति पद्मचरित्रे दशरथप्रव्रज्यानिश्चयविधानो नामैकत्रिंशत्तम उद्देशः समाप्तः ॥

---

१. पईसमीवं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३२. दसरहपवज्जज्जा-रामनिग्गमण-भरहरज्जविहाणं

अह तत्थ जिणायतणे, निद्दं गमिऊण अड्ढरत्तम्मि । लोगे सुत्तपसुत्ते, नीसंचारे विगयसद्दे ॥१॥

घेत्तुं धणुवररयणं, सीयासहिया जिणं [1]नमंसित्ता । सणियं विणिग्गया ते, दो चेव जणं पलोयन्ता ॥२॥

को वेत्थ सुरयखीणो, गाढं उवगूहिउं सुवइ कन्तं । पुव्वं कयावराहो, अन्नो महिलं पसाएइ ॥३॥

अवरो पुण परगेहिं, गन्तूणं कुञ्चिएसु अङ्गेसु । उव्वासइ मज्जारं, जालगवक्खन्तरे धुत्तो ॥४॥

अन्नो सुन्नायतणे, संकेय[2]यदिन्नकन्नसब्भावो । अहियं आकुलियमणो, कुणइ निविट्ठुट्ठियं पुरिसो ॥५॥

एवं चिय सुणमाणा, पेच्छन्ता जणवयस्स विणियोगं । अह निग्गया पुरीओ, सणियं ते गूढदारेणं ॥६॥

अवरदिसं वच्चन्ता, दिट्ठा सुहडेहि मग्गमाणेहिं । गन्तूण पणमिया ते, भावेण ससेन्नसहिएहिं ॥७॥

सीहा सहावमन्थरगईए, सणियं तु तत्थ नरवसहा । गाऊयमेत्तठाणं, वच्चन्ति सुहं बलसमग्गा ॥८॥

गामेसु पट्टणेसु य, पूइज्जन्ता जणेण बहुएणं । पेच्छन्ति वच्चमाणा, खेड-मडम्बा-ऽऽगरं वसुहं ॥९॥

अह ते कमेण पत्ता, हरि-गय-रुरु-चमर-सरहसद्दालं । घणपायवसंछन्नं, अडविं चिय पारियत्तस्स ॥१०॥

[3]पेच्छन्ति तत्थ भीमा, बहुगाहसमाउला जलसमिद्धा । गम्भीरा नाम नदी, कल्लोलुच्छलियसंघाया ॥११॥

---

## ३२. दशरथ प्रव्रज्या-रामनिर्गमन-भरतराज्यविधानम्

अथ तत्र जिनायतने निद्रां गमयित्वाऽर्धरात्रे । लोके सुप्तप्रसुप्ते निःसंचारे विगतशब्दे ॥१॥

गृहीत्वा धनुर्वररत्नं सीतासहितौ जिनं नत्वा । शनैर्विनिर्गतौ तौ द्वावेव जनं प्रलोकमानौ ॥२॥

को वात्र सुरतक्षीणो गाढमालिङ्ग्य शेते कान्तम् । पूर्वं कृतापराधोऽन्यो महिलां प्रसादयति ॥३॥

अपरः पुनः परगृहं गत्वा कुञ्चितैरङ्गैः । उद्वासयति मार्जारं जालगवाक्षान्तरे धूर्तः ॥४॥

अन्यः शून्यायतने संकेतकदत्तकन्यासद्भावः । अधिकमाकुलितमनाः करोति निविष्टोत्थितं पुरुषः ॥५॥

एवमेव श्रृण्वन्तौ पश्यन्तौ जनपदस्य विनिर्गतम् । अथ निर्गतौ पुराच्छनैस्तौ गुप्तद्वारेण ॥६॥

अपरदिग्व्रजन्तौ दृष्टौः सुभटैर्मार्ग्यमाणैः । गत्वा प्रणमितौ तौ भावेन ससैन्यसहितैः ॥७॥

सिंहौ स्वभावमन्थरगत्या शनैस्तु तत्र नरवृषभौ । गव्युतिमात्रस्थानं गच्छतः सुखं बलसमग्रौ ॥८॥

ग्रामेषु पत्तनेषु च पूज्यमानौ जनेन बहुना । पश्यन्तौ व्रजन्तौ खेट-मडम्बाऽऽकारां वसुधाम् ॥९॥

अथ तौ क्रमेण प्राप्तौ हरि-गज-रुरु-चमर-शरभशब्दालाम् । घनपादपसंच्छन्नामटवीमेव पारियात्रस्य ॥१०॥

पश्यतस्तत्र भीमां बहुग्राहसमाकुलां जलसमृद्धाम् । गम्भीरां नामा नदीं कल्लोलोच्छलितसंघाताम् ॥११॥

---

१. नमेऊण-प्रत्य० । २. संकेयट्ठाणदिन्नसब्भावो-प्रत्य० । ३. पेच्छन्ति तत्थ भीमं बहुगाहसमाउलं जलसमिद्धं । गंभीरं नाम नइं कल्लोलुच्छलियसंघायं-प्रत्य० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

तो राघवेण भणिया, सुहडा सव्वे वि साहणसमग्गा । तुम्हे नियत्तियव्वं, एयं रण्णं महाभीमं ॥१२॥

ताएण भरहसामी, ठविओ रज्जम्मि सयलपुहईए । गच्छामि दक्खिणपहं, अवस्स तुब्भे नियत्तेह ॥१३॥

अह ते भणन्ति सुहडा, सामि ! तुमे विरहियाण किं अम्हं । रज्जेण साहणेण य, विविहेण य देहसोक्खेणं ? ॥१४॥

सीह-ऽच्छभल्ल-चित्तय-घणपायव-गिरिविराउले रण्णे । समयं तुमे वसामो, कुणसु दयं असरणाणऽम्हं ॥१५॥

आउच्छिऊण सुहडे, सीयं भुयावगूहियं काउं । रामो उत्तरइ नइं, गम्भीरं लक्खणसमग्गो ॥१६॥

रामं सलक्खणं ते, परतीरावट्ठियं पलोएउं । हाहारवं करेन्ता, सव्वे वि भडा पडिनियत्ता ॥१७॥

तेहि नियत्तेहि तहिं, दिट्ठं चिय जिणहरं महातुङ्गं । समणेहि संपरिवुडं, तत्थ पविट्ठा सुहडसीहा ॥१८॥

काऊण नमोक्कारं, जिणपडिमाणं विसुद्धभावेणं । पणमन्ति मुणिवरिन्दे, अणुपरिवाडीए तिविहेणं ॥१९॥

पुच्छन्ति साहवं ते, भयवं ! संसारसायरं भीमं । उत्तारेहि महायस ! अम्हे जिणधम्मपोएणं ॥२०॥

तो साहवेण धम्मो, कहिओ संखेवओ जिणुद्दिट्ठो । जह तक्खणेण जाया, संवेगपरायणा बहवे ॥२१॥

निद्दड्ढो विजओ वि य, मेहकुमारो तहेव रणलोलो । नागदमणो य [1]वीरो, सढो य सत्तूदमधरो य ॥२२॥

तह कङ्कडो विणोदो, सव्वो पियवद्धमो कढोरो य । एवंविहा नरेन्दा, निग्गन्थसि[2]रिं समणुपत्ता ॥२३॥

अन्ने पुण गिहधम्मं, घेत्तूण नराहिवा विसयहुत्ता । पत्ता साएयपुरी, भरहस्स फुडं निवेएन्ति ॥२४॥

---

तदा राघवेन भणिताः सुभटाः सर्वेऽपि साधनसमग्राः । युष्माभि र्निवर्त्तितव्यमेतदरण्यं महाभीमम् ॥१२॥

तातेन भरतस्वामी स्थापितो राज्ये सकलपृथिव्याः । गच्छामि दक्षिणपथमवश्यं यूयं निवर्तध्वम् ॥१३॥

अथ ते भणन्ति सुभटाः स्वामिंस्त्वया विरहितानां किमस्माकम् । राज्येन साधनेन च विविधेन च देहसुखेन ? ॥१४॥

सिंहाच्छभल्लचित्रकघनपादपगिरिविराकुलेऽरण्ये । समकं त्वया वसामः कुरु दयामशरणानामस्माकम् ॥१५॥

आपृच्छ्य सुभटान् सीतां भुजालिङ्गनं कृत्वा । राम उत्तरति नदीं गम्भीरां लक्ष्मणसमग्रः ॥१६॥

रामं सलक्ष्मणं ते परतीरावस्थितं प्रलोक्य । हाहारवं कुर्वन्तः सर्वेऽपि भटाः प्रतिनिवृत्ताः ॥१७॥

तैर्निवर्तमानैस्तत्र दृष्टमेव जिनगृहं महातुङ्गम् । श्रमणैः संपरिवृत्तं तत्र प्रविष्टाः सुभटसिंहाः ॥१८॥

कृत्वा नमस्कारं जिनप्रतिमानां विशुद्धभावेन । प्रणमन्ति मुनिवरेन्द्राननुपरिपाट्या त्रिविधेन ॥१९॥

पृच्छन्ति साधूंस्ते भगवन् ! संसारसागरं भीमम् । उत्तारय महायशः ! अस्माञ्जिनधर्मपोतेन ॥२०॥

तदा साधुना धर्मः कथितः संक्षेपतो जिनोदिष्टः । यथा तत्क्षणेन जाताः संवेगपरायणा बहवः ॥२१॥

निर्दग्धो विजयोऽपि च मेघकुमारस्तथैव रणलोलः । नागदमनश्च वीरः शठश्च शत्रुदमोधरश्च ॥२२॥

तथा कङ्कटो विनोदः सर्वः प्रियवर्द्धनः कठोरश्च । एवंविधा नरेन्द्रा निग्रंथश्रियं समनुप्राप्ताः ॥२३॥

अन्ये पुन गृहिधर्मं गृहीत्वा नराधिपा विषयाभिमुखाः । प्राप्ताः साकेतपुरीं भरतस्य स्फुटं निवेदयन्ति ॥२४॥

---

१. धीरो-प्रत्य० । २. सिरिं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सीया-लक्खणसहिओ, न नियत्तो राघवो गओ रण्णं। सोऊण वयणमेयं, भरहो अइदुक्खिओ जाओ ॥२५॥

तो दसरहो वि राया, पुत्तविओए अईवसंविग्गो। ठावेइ तक्खणं चिय, विसए रज्जहिवं भरहं ॥२६॥

संवेगजणियकरणो, भडाण बावत्तरीए समसहिओ। दिक्खं गओ नरिन्दो, पासे च्चिय भूयसरणस्स ॥२७॥

**दशरथप्रव्रज्या—**

तत्थ वि एगविहारी, अणरण्णसुओ तवं पकुव्वन्तो। मणसा दूमियहियओ, पुत्तसिणेहं समुव्वहइ ॥२८॥

अह अन्नया कयाई, धीरो आरुहिय सुहयरं झाणं। चिन्तेइ तो मणेणं, नेहो च्चिय बन्धणं गाढं ॥२९॥

धण-सयण-पुत्त-दारा, जे अन्नभवेसु आसि णेगविहा। ते कत्थ गयाऽणाईसंसारे परिभमन्तस्स ॥३०॥

परिभुत्तं विसयसुहं, सुरलोए वरविमाणवसहीसु। नरयाणलदाहा चिय, संपत्ता भोगहेउम्मि ॥३१॥

अन्नोन्नभक्खणं पुण, तिरिक्खजोणीसु समणुभूयं मे।
पुढवि-जल-जलण-मारुय भणिओ य वणस्सईसु चिरं ॥३२॥

मणुयत्तणे वि भोगा, भुत्ता संजोय-विप्पओगा य। बहुरोग-सोगमाई, बन्धवनेहाणुरत्तेणं ॥३३॥

तम्हा पुत्तसिणेहं, एयं छड्डेमि दोसआमूलं। मुणिवरदिट्ठेण पुणो, झाणेण मणं विसोहेमि ॥३४॥

विविहं तवं करेन्तो, अहियासेन्तो परीसहे सव्वे। दसरहमुणी महप्पा, विहरइ एगन्तदेसेसु ॥३५॥

पुत्तेसु परविदेसं, गतेसु अवराइया य सोमित्ती। भत्तारे पव्वइए, सोगसमुद्दम्मि पडियाओ ॥३६॥

---

सीता-लक्ष्मणसहितो न निवृत्तो राघवो गतोऽरण्यम्। श्रुत्वा वचनमेद्भरतोऽतिदुःखितो जातः ॥२५॥

तदा दशरथोऽपि राजा पुत्रवियोगेऽतिवसंविग्नः। स्थापयति तत्क्षणमेव विषये राज्याधिपं भरतम् ॥२६॥

संवेगजनितकरणो भटानां द्वासप्ततिभिः समसहितः। दिक्षां गतो नरेन्द्रः पार्श्व एव भूतशरणस्य ॥२७॥

**दशरथ प्रव्रज्या –**

तत्राप्येकविहार्यनरण्यसुतस्तपः प्रकुर्वन्। मनसा दवितहृदयः पुत्र स्नेहं समुद्वहति ॥२८॥

अथान्यदा कदाचिद्धीर आरुह्य शुभतरं ध्यानम्। चिन्तयति तदा मनसा स्नेह एव बन्धनं गाढम् ॥२९॥

धन-स्वजन-पुत्र-दारा येऽन्यभवेष्वासन्ननेकविधाः। ते कुत्रगता अनादिसंसारे परिभ्रमता ॥३०॥

परिभुक्तं विषयसुखं सुरलोके वरविमानवसतिषु। नरकानलदाहा अपि च संप्राप्ता भोगहेतौ ॥३१॥

अन्योन्यभक्षणं पुनस्तिर्यग्योनिषु समनुभूतं मे। पृथिवी-जल-ज्वलन-मारुतभ्रान्तश्च वनस्पतिषु चिरम् ॥३२॥

मनुष्यत्वेऽपि भोगा भुक्ताः संयोग-विप्रयोगाश्च। बहुरोगशोकादयो बान्धवस्नेहानुरक्तेन ॥३३॥

तस्मात्पुत्रस्नेहमेतत्मुञ्चामि दोषामूलम्। मुनिवरदृष्टेन पुनर्ध्यानेन मनो विशोधयामि ॥३४॥

विविधं तपः कुर्वन्नध्यासन् परिषहान्सर्वान्। दशरथमुनि र्महात्मा विहरत्येकान्तदेशेषु ॥३५॥

पुत्रेषु परविदेशं गतेष्वपराजिता च सौमित्री। भर्त्तरि प्रव्रजिते शोकसमुद्रे पतिते ॥३६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सुयसोगदुक्खियाओ, ताओ दट्ठूण केगई देवी । तो भणइ निययपुत्तं, वयणमिणं मे निसामेहि ॥३७॥**
**निक्कण्टयमणुकूलं, पुत्त ! तुमे पावियं महारज्जं । पउमेण लक्खणेण य, रहियं न उ सोहए एयं ॥३८॥**
**ताणं चिय जणणीओ, पुत्तविओगम्मि जायदुक्खाओ । काहिन्ति मा हु कालं, आणेहि लहुं वरकुमारे ॥३९॥**
**जणणीए वयणमेयं, सुणिऊण तुरंगमं समारूढो । तूरन्तो च्चिय भरहो, ताणं अणुमग्गओ लग्गो ॥४०॥**
**इय दिट्ठा वि य समयं, महिलाए ते कुमारवरसीहा । पुच्छन्तो पहियजणं, वच्चइ भरहो पवणवेगो ॥४१॥**
**अह ते नईए तीरे, वीसममाणा महावणे भीमे । सीयाए समं पेच्छइ, भरहो पासत्थवरधणुया ॥४२॥**
**बहुयदिवसेसु देसो, जो वोलीणो कुमारसीहेहिं । सो भरहेण पवन्नो, दिवसेहिं छहि अयत्तेणं ॥४३॥**
**सो चक्खुगोयराओ, तुरगं मोत्तूण केकईपुत्तो । चलणेसु पउमणाहं, पणमिय मुच्छं समणुपत्तो ॥४४॥**
**पडिबोहिओ य भरहो, रामेणालिङ्गिओ सिणेहेणं । सीयाए लक्खणेण य, [1]बाढं संभासिओ विहिणा ॥४५॥**
**भरहो नमियसरीरो, काऊण सिरञ्जलिं भणइ रामं । रज्जं करेहि सुपुरिस ! सयलं आणागुणविसालं ॥४६॥**
**अहयं धरेमि छत्तं, चामरधारो य हवइ सत्तुंजो । लच्छीहरो य मन्ती, तुज्झऽन्नं सुविहियं किं वा ? ॥४७॥**
**जाव इमो आलावो, वट्टइ तावं रहेण तूरन्ती । तं चेव समुद्देसं, संपत्ता केगई देवी ॥४८॥**
**ओयरिय रहवराओ, पउमं आलिङ्गिऊण रोवन्ती । संभासेइ कमेणं, सीयासहियं च सोमित्तिं ॥४९॥**
**तो केकई पवुत्ता, पुत्त, ! विणीयापुरिम्मि वच्चामो । रज्जं करेहि निययं, भरहो वि य सिक्खणीओ ते ॥५०॥**

---

सुतशोकदु:खिते ते दृष्ट्वा कैकयी देवी । तदा भणति निजपुत्रं वचनमिदं मे निशामय ॥३७॥
निष्कण्टकमनुकूलं पुत्र ! त्वया प्राप्तं महाराज्यम् । पद्मेन लक्ष्मणेन च रहितं न तु शोभत एतत् ॥३८॥
तयोरेव जनन्यौ पुत्रवियोगे जातदु:खे । करिष्यतो मा हु कालमानय लघुं वरकुमारौ ॥३९॥
जनन्या वचनमेतच्छ्रुत्वा तुरंगमं समारुढः । त्वरमाणैव भरतस्तयोरनुमार्गतो लग्नः ॥४०॥
इति दृष्टावपि च समकं महिलया तौ कुमारवरसिंहौ । पृच्छन्पथिकजनं व्रजति भरतः पवनवेगः ॥४१॥
अथ तौ नद्या तीरे विश्राम्यन्तौ महावने भीमे । सीतया समं पश्यति भरतः पार्श्वस्थवरधनुष्यौ ॥४२॥
बहुदिवसै र्देशो यो व्यतीतः कुमारसिंहाभ्याम् । स भरतेन प्रपन्नो दिवसैः षडिभरयत्नेन ॥४३॥
स चक्षुर्गोचरात्तुरगं मुक्त्वा कैकयीपुत्रः । चरणयोः पद्मनाभं प्रणम्य मूर्च्छां समनुप्राप्तः ॥४४॥
प्रतिबोधितश्च भरतो रामेणालिङ्गितः स्नेहेन । सीतया लक्ष्मणेन चात्यन्तं संभाषितो विधिना ॥४५॥
भरतो नतशरीरः कृत्वा शिरोऽञ्जलिं भणति रामम् । राज्यं कुरु सत्पुरुष ! सकलमाज्ञागुणविशालम् ॥४६॥
अहं धरेमि छत्रं चामरधरश्च भवति शत्रुघ्नः । लक्ष्मीधरश्च मन्त्री तवान्यं सुविहितं किं वा ? ॥४७॥
यावदयमालापो वर्त्तते तावद्रयेन त्वरथे माणा । तमेव समुद्देशं संप्राप्ता कैकयी देवी ॥४८॥
अवतीर्य रथवरात्पद्ममालिङ्ग्य रुदन्ती । संभाषते क्रमेण सीतासहितं च सौमित्रिम् ॥४९॥
तदा कैकयी प्रोक्ता पुत्र ! विनितापूर्यां व्रजामः । राज्यं कुरु निजकं भरतोऽपि च शिक्षणीयस्तव: ॥५०॥

---

१. गाढं-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महिला सहावचवला, अदीहपेही सढाय माइल्ला । तं मे खमाहि पुत्तय ! जं पडिकूलं कयं तुज्झ ॥५१॥

तो भणइ पउमणाहो, अम्मो ! किं खत्तिया अलियवाई । होन्ति महाकुलजाया ? तम्हा भरहो कुणउ रज्जं ॥५२॥

तत्थेव काणणवणे, पच्चक्खं सव्वनरवरिन्दाणं । भरहं ठवेइ रज्जे, रामो सोमित्तिणा सहिओ ॥५३॥

नमिऊण केगईए, भुयासु उवगूहिउं भरहसामिं । अह ते सीयासहिया, संभासिय सव्वसामन्ते ॥५४॥

दक्खिणदेसाभिमुहा, चलिया भरहो वि निययपुरहुत्तो । पत्तो करेइ रज्जं, इन्दो जह देवनयरीए ॥५५॥

सो एरिसम्मि रज्जे, न करेइ धिइं खणं पि सोएणं । नवरं पुण अङ्गसुहं, हवइ च्चिय जिणपणामेणं ॥५६॥

भरहो जिणिन्दभवणं, वन्दणहेउं गओ सपरिवारो । थोऊण पेच्छइ [1]मुणी, नामेण जुतिं सह गणेणं ॥५७॥

भरहो नमिऊण [2]मुणी, तस्स य पुरओ अभिग्गहं धीरो । गेण्हइ रामदरिसणे, पव्वज्जा हं करिस्सामि ॥५८॥

भरहेण धम्मनिहसं, समणो परिपुच्छिओ भणइ एवं । जाव य न एइ रामो, ताव गिहत्थो कुणसु धम्मं ॥५९॥

## विविधव्रतनियमजिनपूजादानादीनां फलम्—

अच्चन्तदुद्धरधरा, चरिया निग्गन्थमहरिसीणं तु । परिकम्मविसुद्धस्स उ, होही सुहसाहणा नियमा ॥६०॥

रयणद्दीवम्मि गओ, गेण्हइ एक्कं पि जो महारयणं । तं तस्स इहाणीयं, महग्घमोल्लं हवइ लोए ॥६१॥

जिणधम्मरयणदीवे, जइ नियममणिं [3]लएइ एक्कं पि । तं तस्स अणग्घेयं, होही पुण्णं परभवम्मि ॥६२॥

---

महिला स्वभावचपलाऽदीर्घप्रेक्षिणी शठा च मायावती । तन्मे क्षमस्व पुत्र ! यत्प्रतिकूलं कृतं तव ॥५१॥

तदा भणति पद्मनाभोऽम्बे ! किं क्षत्रिया अलिकवादिनः । भवन्ति महाकुलजाताः ? तस्माद्भरतः करोतु राज्यम् ॥५२॥

तत्रैव काननवने प्रत्यक्षं सर्वनरेन्द्राणाम् । भरतं स्थापयति राज्ये रामः सौमित्रिणा सहितः ॥५३॥

नत्वा कैकयीं भुजाभ्यालिङ्ग्य भरतस्वामिनम् । अथ तौ सीतासहितौ संभाष्य सर्वसामन्तान् ॥५४॥

दक्षिणदेशाभिमुखौ चलितौ भरतोऽपि निजपुराभिमुखः । प्राप्तः करोति राज्यमिन्द्रो यथा देवनगर्याम् ॥५५॥

स एतादृशे राज्ये न करोति धृतिं क्षणमपि शोकेन । नवरं पुनरङ्गसुखं भवत्येव जिनप्रणामेन ॥५६॥

भरतो जिनेन्द्रभवनं वन्दनहेतु गतः सपरिवारः । स्तुत्वा पश्यति मुनिं नाम्ना द्युतिं सह गणेन ॥५७॥

भरतो नत्वा मुनिं तस्य च पुरतोऽभिग्रहं धीरः । गृह्णाति रामदर्शने प्रव्रज्यामहं करिष्यामि ॥५८॥

भरतेन धर्मनिकषः श्रमणः परिपृष्टो भणत्येवम् । यावच्चनैति रामस्तावद्गृहस्थः कुरु धर्मम् ॥५९॥

## विविधव्रतनियमजिनपूजादानादीनां फलम् -

अत्यन्तदुर्धरधरा चर्या निर्ग्रन्थमहर्षीणां तु । परिकर्मविशुद्धस्य तु भवति सुखसाधना नियमा ॥६०॥

रत्नद्वीपे गतो गृह्णात्येकमपि यो महारत्नम् । तत्तस्येहानीतं महार्घ्यमूल्यं भवति लोके ॥६१॥

जिनधर्मरत्नद्वीपे यदि नियममणिं लभत एकमपि । तत्तस्यानर्घ्येयं भवति पुण्यं परभवे ॥६२॥

---

१. मुणिं नामेण जुइं-प्रत्य० । २. मुणिं-प्रत्य० । ३. लहेइ-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पढममहिंसारयणं, गेण्हेउं जो जिणं समच्चेइ । सो भुञ्जइ सुरलोए, इन्दियसोक्खं अणोवमियं ॥६३॥

सच्चव्वयनियमधरो, जो पूयइ जिणवरं पयत्तेणं । सो होइ महुरवयणो भुञ्जइ य परंपरसुहाइं ॥६४॥

परिहरिऊण अदत्तं, जो जिणनाहस्स कुणइ वरपूयं । सो नवनिहीण सामी, होही मणि-रयणपुण्णाणं ॥६५॥

परनारीसु पसङ्गं, न कुणइ जो जिणमयासिओ पुरिसो । सो पावइ सोहग्गं, नयणाणन्दो वरतणूणं ॥६६॥

संतोसवयामूलं, धारइ य जिणिन्दवयणकयभावो । सो विविहधणसमिद्धो, होइ नरो सव्वजणपुज्जो ॥६७॥

आहारपयाणेणं, जायइ भोगस्स आलओ निययं । जइ वि य जाइ विएसं, तहवि य सोक्खं हवइ तस्स ॥६८॥

अभयपयाणेण नरो, जायइ भयवज्जिओ निरोगो य । नाणस्स यदाणेणं, सव्वकलापारओ होइ ॥६९॥

आहारवज्जणं जो, करेइ रयणीसु जिणमयाभिमुहो । आरम्भपवत्तो वि य, लहइ नरो सो वि सुगइपहं ॥७०॥

अरहन्तनमोक्कारं, तिण्णि वि काले करेइ जो पुरिसो । तस्स बहुयं वि पावं, नासइ वरसुद्धभावस्स ॥७१॥

जल-थलयसुरहिनिम्मलकुसुमेसु य जो जिणं समच्चेइ । सो दिव्वविमाणठिओ, कीलइ पवरच्छराहि समं ॥७२॥

भावकुसुमेसु नियं, विमलेसु जिणं समच्चए जो उ । सो होइ सुन्दरतणू, लोए पूयारिहो पुरिसो ॥७३॥

धूयं अगरु-तुरुक्कं, कुंकुम-वरचन्दणं जिणवरस्स । [1]जो देइ भावियमई, सो सुरहिसुरो समुब्भवइ ॥७४॥

जो जिणभवणे दीवं, देइ नरो तिव्वभावसंजुत्तो । सो दिणयरसमतेओ, देवो उप्पज्जइ विमाणे ॥७५॥

---

प्रथममहिंसा रत्नं गृहीत्वा यो जिनं समर्च्यति । स भुनक्ति सुरलोक इन्द्रियसुखमनोपमितम् ॥६३॥

सत्यव्रतनियमधरो यः पूजयति जिनवरं प्रयत्नेन । स भवति मधुरवचनो भुनक्ति च परंपरसुखानि ॥६४॥

परिहृत्यादत्तं यो जिननाथस्य करोति वरपूजाम् । स नवनिधीनां स्वामी भवति मणि-रत्नपूर्णानाम् ॥६५॥

परनारिभिः प्रसङ्गं न करोति यो जिनमताश्रितः पुरुषः । प्राप्नोति सौभाग्यं नयनानन्दो वरतनूनाम् ॥६६॥

संतोषव्रतामूलं धारयति च जिनेन्द्रवचनकृतभावः । स विविधधनसमृद्धो भवति नरः सर्वजनपूज्यः ॥६७॥

आहारप्रदानेन जायते भोगस्यालयो नित्यम् । यद्यपि च याति विदेशं तथापि च सौख्यं भवति तस्य ॥६८॥

अभयप्रदानेन नरो जायते भयवर्जितो निरोगश्च । ज्ञानस्य च दानेन सर्वकलापारगो भवति ॥६९॥

आहारवर्जनं यः करोति रजनीषु जिनमताभिमुखः । आरम्भप्रवृत्तोऽपि लभते नरः सोऽपि सुगतिपथम् ॥७०॥

अर्हन् नमस्कारं त्रिष्वपि कालेषु करोति यः पुरुषः । तस्य बहुकमपि पापं नश्यति वरशुद्धभावस्य ॥७१॥

जल-स्थलसुरभिनिर्मलकुसुमै र्यो जिनं समर्चयति । स दिव्यविमानस्थितः क्रीडति प्रवराप्सरोभिः समम् ॥७२॥

भावकुसुमै र्नित्यं विमलै र्जिनं समर्चयति यस्तु । स भवति सुन्दरतनु र्लोके पूजार्हः पुरुषः ॥७३॥

धूपमगरु-तुरुष्कं, कुंकुमवरचन्दनं जिनवरस्य । यो ददाति भावितमतिः स सुराधिसुरः समुद्भवति ॥७४॥

यो जिनभवने दीपं ददाति नरस्तीव्रभावसंयुक्तः । स दिनकरसमतेजा देव उत्पद्यते विमाने ॥७५॥

---

१. दिव्वामलहारधरो-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**छत्तं चमर-[1] पडाया, दप्पण-लम्बूसया वियाणं च। जो देइ जिणाययणे, सो परमसिरिं समुव्वहइ ॥७६॥**

**गन्धेहि जिणवरतणू[2], जो हु समालभइ भावियमईओ। सो सुरभिगन्धपउरे, रमइ विमाणे सुचिरकालं ॥७७॥**

**काऊण जिणवराणं, अभिसेयं सुरहिगन्धसलिलेणं। सो पावइ अभिसेयं, उप्पज्जइ जत्थ जत्थ नरो ॥७८॥**

**खीरेण जोऽभिसेयं, कुणइ जिणिन्दस्स भत्तिराएणं। सो खीरविमलधवले, रमइ विमाणे सुचिरकालं ॥७९॥**

**दहिकुम्भेसु जिणं जो, ण्हवेइ दहिकोट्टिमे सुरविमाणे। उप्पज्जइ लच्छिधरो, देवो दिव्वेण रूवेणं ॥८०॥**

**एत्तो घियाभिसेयं, जो कुणइ जिणेसरस्स पययमणो। सो होइ सुरहिदेहो, सुरपवरो वरविमाणम्मि ॥८१॥**

**अभिसेयपभावेणं, बहवे सुव्वन्तिऽणन्तविरियाई। लद्धाहिसेयरिद्धी, सुरवरसोक्खं अणुहवन्ति ॥८२॥**

**भत्तीए निवेयणयं, बलिं च जो जिणहरे पउञ्जेइ। परमविभूई[3] पावइ, आरोग्गं चेव सो पुरिसो ॥८३॥**

**गन्धव्व-तूर-नट्टं, जो कुणइ महुस्सवं जिणायतणे। सो वरविमाणवासे, पावइ परमुस्सवं देवो ॥८४॥**

**जो जिणवराण भवणं, कुणइ जहाविहवसारसंजुत्तं। सो पावइ परमसुहं, सुरगणअभिणन्दिओ सुइरं ॥८५॥**

**जिणपडिमा[4] कुणइ नरो, जो दढधम्मो अणन्नदिट्ठीओ। सो सुर-माणुसभोगे, भोत्तूण सिवं पि पाउणइ ॥८६॥**

**काऊण एवमाई, धम्मं जिणदेसियं सुरविमाणे। उप्पज्जिऊण चविओ, चक्कहरत्तं पुणो लहइ ॥८७॥**

**पुणरवि काऊण तवं, पावइ सिद्धिं विमुक्ककम्मरओ। एत्तो सुणसु विभत्तिं, जिणवन्दणभत्तिरायस्स ॥८८॥**

---

छत्र-चामर-पताका-दर्पण-लम्बुषकान् विमानं च। यो ददाति जिनायतने स परमश्रियं समुद्वहति ॥७६॥

गन्धै र्जिनवरतनुं यो हु समालभते भावितमतिः। स सुरभिगन्धप्रचुरे रमते विमाने सुचिरकालम् ॥७७॥

कृत्वा जिनवराणामभिषेकं सुरभिगन्धसलिलेन। स प्राप्नोत्यभिषेकमुत्पद्यते यत्र यत्र नरः ॥७८॥

क्षीरेण योऽभिषेकं करोति जिनेन्द्रस्य भक्तिरागेण। स क्षीरविमलधवले रमते विमाने सुचिरकालम् ॥७९॥

दधिकुम्भै र्जिनं यः स्नापयति दधिकुट्टिमे सुरविमाने। उत्पद्यते लक्ष्मीधरो देवो दिव्येन रूपेण ॥८०॥

इतो घृताभिषेकं यः करोति जिनेश्वरस्य प्रयतमनाः। स भवति सुरभिदेहः सुरप्रवरो वरविमाने ॥८१॥

अभिषेकप्रभावेण बहवः श्रूयन्तेऽनन्तवीर्यादयः। लब्धाभिषेकर्द्धयः सुरवरसौख्यमनुभवन्ति ॥८२॥

भक्त्या नैवेद्यं बलिं च यो जिनगृहे प्रयुञ्जति। परमविभूतिं प्राप्नोत्यारोग्यं चैव स पुरुषः ॥८३॥

गान्धर्व-तूर्य-नाट्यं यः करोति महोत्सवं जिनायतने। स वरविमानवासे प्राप्नोति परमोत्सवं देवः ॥८४॥

यो जिनवराणां भवनं करोति यथाविभवसारसंयुक्तम्। स प्राप्नोति परमसुखं सुरगणाभिनन्दितः सुचिरम् ॥८५॥

जिनप्रतिमां करोति नरो यो दृढधर्मोऽनन्यदृष्टिकः। स सुर-मनुष्यभोगान्भुक्त्वा शिवमपि प्राप्नोति ॥८६॥

कृत्वेवमादि धर्मं जिनदेशितं सुरविमाने। उत्पद्य च्युतश्चक्रधरत्वं पुनर्लभते ॥८७॥

पुनरपि कृत्वा तपः प्राप्नोति सिद्धिं विमुक्तकर्मरजाः। इतः श्रुणु विभक्तिं जिनवन्दनभक्तिरागस्य ॥८८॥

---

१. पडायं दप्पण लम्बूसयं-प्रत्य०। २. तणुं-प्रत्य०। ३. बिभूइं-प्रत्य०। ४. पडिमं-प्रत्य०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मणसा होइ चउत्थं, छट्ठफलं उट्ठियस्स संभवइ । गमणस्स उ आरम्भे, हवइ फलं अट्ठमोवासे ॥८९॥
गमणे दसमं तु भवे, तह चेव दुवालसं गए किंचि । मज्झे पक्खोवासं, मासोवासं तु दिट्ठेणं ॥९०॥
संपत्तो जिणभवणं, लहई यछम्मासियं फलं पुरिसो । संवच्छरियं तु फलं दारुद्देसे ठिओ लहइ ॥९१॥
पयक्खिण्णे लहइ य, वरिससयफलं जिणे तओ दिट्ठे । पावइ वरिससहस्सं, अणन्तपुण्णं जिणथुईए ॥९२॥
जिणवन्दणभत्तीए, न हु अन्नो अत्थि उत्तमो धम्मो । तम्हा करेहि [१]भत्ती, भरह ! तुमं जिणवरेन्दाणं ॥९३॥
पच्छा निग्गन्थरिसी, भविऊण सिवं पि जाहिसि कयत्थो । भरहो मुणिस्स पासे, सायारं गेण्हई धम्मं ॥९४॥
दरिसणविसुद्धभावो, साहुपयाणुज्जओ विणीओ य । जुवइसयद्धेण समं, करेइ रज्जं गुणविसालं ॥९५॥
एवंविहे वि रज्जे, नियएण उवेइ भोगमणुबन्धं । चिन्तेइ तग्गयमणो, कइया दिक्खं पवज्जे हं ? ॥९६॥

एवं तु राया भरहो विणीओ, जिणिन्दनिग्गन्थकहाभिसत्तो ।
सकम्मविद्धंसणहेउभूयं, करेइ चित्तं विमलं विसुद्धं ॥९७॥

॥ इय पउमचरिए दसरहपव्वज्जारामनिग्गमणभरहरज्जविहाणो नाम बत्तीसइमो उद्देसओ समत्तो ॥

---

मनसा भवति चतुर्थं षष्टफलमुत्थितस्य संभवति । गमनस्य त्वारम्भे भवति फलमष्टमोपवासम् ॥८९॥
गमने दशमं तु भवेत्तथैव द्वादशं गते किंचित् । मध्ये पक्षोपवासं मासोपवासं तु दृष्टेन ॥९०॥
संप्राप्तो जिनभवनं लभते च षण्मासिकं फलं पुरुषः । सांवत्सरिकं तु फलं द्वारोद्देशे स्थितो लभते ॥९१॥
प्रदक्षिणायां लभते च वर्षशतफलं जिने ततो दृष्टे । प्राप्नोति वर्षसहस्रमनन्तपुण्यं जिनस्तुत्या ॥९२॥
जिनवन्दनभक्त्या न खल्वन्याऽस्त्युत्तमो धर्मः । तस्मात्कुरु भक्तिं भरत ! त्वं जिनवरेन्द्राणाम् ॥९३॥
पश्चान्निग्रन्थर्षि भूत्वा शिवमपि यास्यसि कृतार्थः । भरतो मुनेः पार्श्वे साकारं गृह्णाति धर्मम् ॥९४॥
दर्शनविशुद्धभावः साधुप्रदानोद्यतो विनीतश्च । युवतिशतार्द्धेन समं करोति राज्यं गुणविशालम् ॥९५॥
एवं विधेऽपि राज्ये निजकेनोपैति भोगमनुबन्धम् । चिन्तयति तद्गतमनाः कदा दिक्षां प्रव्रजाम्यहम् ॥९६॥

एवं तु राजा भरतो विनीतो जिनेन्द्रनिर्ग्रन्थकथाभिसक्तः ।
स्वकर्मविध्वंसनहेतुभूतं करोति चित्तं विमलं विशुद्धम् ॥९७॥

॥ इति पद्मचरित्रे दशरथप्रव्रज्या रामनिर्गमनभरतराज्यविधानो नाम द्वात्रिंशत्तम उद्देशः समाप्तः ॥

---

१. भत्ति-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३३. वज्जयण्णउवक्खाणं

तत्तो ते दो वि जणा, सीयासहिया कमेण वच्चन्ता । पत्ता य तावसकुलं, वक्कल-जडधारिणो जत्थ ॥१॥
नाणासंगहियफलं, अकिट्ठधण्णेण रुद्धपहमग्गं । उम्बर-फणस-वडाणं, समिहासंघायकयपुञ्जं ॥२॥
पविसन्ति तावसकुलं, आसण-विणओवयारकुसलेहिं। संभासिया य पयया, सव्वेहिं वितावसगणेहिं ॥३॥
वसिऊण तत्थ रयणी, पुणरवि वच्चन्ति अडविपहमग्गं । दूरुन्नयसिहरोहं, पेच्छन्ति उ चित्तकूडं ते ॥४॥
नाणाविहदुमछन्नं, नाणाविहसावयाण आवासं । नाणापक्खिसमिद्धं, गिरिनइयारुद्धसंचारं ॥५॥
कत्थइ सीहविदारित-गयवररुहिरच्छडारुणं भीमं । कत्थइ सरभुत्तासिय-हत्थिउलविभग्गतरुनिवहं ॥६॥
कत्थइ वराह-केसरिदढदप्पावडियजुज्झसंघट्टं । कत्थइ कढिणोरत्थल-वग्घचवेडाहयं महिसं ॥७॥
वाणरबुक्काररवं, कत्थइ किलिकिलिकिलन्तपक्खिगणं । कत्थइ सीहभयद्दुय-हरिणपलायन्तसंघायं ॥८॥
कत्थइ मत्तमहागय-गण्डालीणालिगुमगुमायन्तं । एयारिसविणिओगं, पेच्छन्ति य चित्तकूडं ते ॥९॥
नाणातरुब्भवाइं, नाणाविहसुरहिगन्धकलियाइं । खायन्ति जहिच्छाए, फलाइं वरसाउकलियाइं ॥१०॥
लीलाए वच्चमाणा, चउसु वि मासेसु साइरेगेसु । पत्ता अवन्तिविसयं, काणण-वणमण्डियं रम्मं ॥११॥
जण-धणसमाउलं ते, केत्तियमेत्तं पि वोलिया विसयं । अन्नं पुण उद्देसं, पेच्छन्ति जणुज्झियं सहसा ॥१२॥

---

## ३३. वज्रकर्णोपाख्यानम्

ततस्तौ द्वावपि जनौ सीतासहितौ क्रमेण व्रजन्तौ । प्राप्तौ च तापसकुलं वल्कल-जटाधारिणो यत्र ॥१॥
नानासंगृहीतफलमकृष्टधान्येन रुद्धपथमार्गम् । उदुम्बर-पनस-वटानां समिध-संघातकृतपुञ्जम् ॥२॥
प्रविशतस्तापसकुलमासनविनयोपचारकुशलैः । संभाषितौ च प्रयतौ सर्वैरपितापसगणैः ॥३॥
उषित्वा तत्र रजनीं पुनरपि व्रजतौऽटवीं पथमार्गम् । दूरोन्नतशिखरौघं पश्यतस्तु चित्रकूटं तौ ॥४॥
नानाविधद्रुमच्छन्नं नानाविधश्वापदानामावासम् । नानापक्षिसमृद्धं गिरिनदीकारुद्धसञ्चारम् ॥५॥
कुत्रचित्सिंहविदारितगजवररुधिरच्छटारुणं भीमम् । कुत्रचिच्छरभोत्त्रासितहस्तिकुलविभग्नतरुनिवहम् ॥६॥
पञ्चसु पञ्चसु पञ्चसु भरतैरवतेषु च तथा विदेहेषु । एतेषु च जातानां नमो जिनेभ्यो जितभयेभ्यः ॥५७॥

जिनधर्मनिश्चितमना एवं तु बिभिषिकां व्यतीत्य । प्राप्तो रामपुरीं स कान्तासहितो मनोभिरामाम्॥५८॥

अभ्यन्तरं प्रविष्टो दर्शयन्महिलां भवनवरान् । राजाङ्गणं च प्राप्तो ऽवलोकयति लक्ष्मणं विप्रः ॥५९॥

पश्यता स्मृत एष स रुपकान्तिप्रतिपूर्णः । यः कटु-कर्कशैस्तदा वचनैर्मया सक्तः ॥६०॥

तस्य भयेन त्वरमानोमुक्त्वा ब्राह्मणीं पलायमानः । लक्ष्मीधरेण दृष्टः शीघ्रं शब्दायितो विप्रः ॥६१॥

व्याहृतश्च निवृत्तो दृष्ट्वा द्वावपि तौ महापुरुषौ । स्वस्ति करोति कपिलो मुञ्चति पुष्पाञ्जलिं पुरतः ॥६२॥

पद्मेन ब्राह्मणः स भणितः कुतोऽस्यागतस्त्वम् ? । तदाभणत्यागतोऽहमरुणग्रामात्तवपार्श्वम् ॥६३॥

कपिलो नाम्नाहं भवति सुशर्मा च गृहिण्येषा । तदा मया न ज्ञातः प्रच्छन्नमहेश्वरोऽसित्वम् ॥६४॥

---

१. बंभणि-प्रत्य० । २. पंचसु भरहेसु सया एरवएसु य तहा विदेहेसु-मु० । ३. रामपुरिं-प्रत्य० । ४. बंभणिं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जइ वि य सयं नरिन्दो, परविसयगओ हवेज्ज एगागी । तह वि य परिहवठाणं, पावइ लोए ठिई एसा ॥६५॥**

**जस्सऽत्थो तस्स सुहं, जस्सऽत्थो पण्डिओ य सो लोए । जस्सऽत्थो सो गुरुओ, अत्थविहूणो य लहुओ उ ॥६६॥**

**तस्स महत्थो य जसो, धम्मो वि य तस्स होइ साहीणो । धम्मो वि सो समत्थो, जस्स अहिंसा समुद्दिट्ठा ॥६७॥**

**अहवा किं न सुयं ते ?, सणंकुमारो समन्तभरहवई । रूवस्स दरिसणट्ठे, जस्स सुरा आगया इहइं ॥६८॥**

**संवेगजणियकरुणो, पव्वज्जं गेण्हिउं परिभमन्तो । भिक्खं च अलभमाणो, विजयपुरं पाविओ कमसो ॥६९॥**

**पडिलाहिओ महप्पा, कयाइ दारिद्दसमभिभूयाए । पडिया य रयणवुट्ठी, गन्धोदय-पुप्फवरिसं च ॥७०॥**

**एवंविहा वि समणा, सुर-नरमहिय-ऽच्चिया दढचरित्ता । परविसयं विहन्ता, परिभूया दुट्ठलोएणं ॥७१॥**

**फरुसाणि अणिट्ठाणि य, जं भणिया राग-दोस-मूढेणं । तं खमह अविणयं मे, जो तुम्ह पहू ! कओ तइया ॥७२॥**

**कविलं एव रुयन्तं, संथावइ राघवो महुरभासी । सीया वि सुसम्मं संभमेण परिनिव्वुई कुणइ ॥७३॥**

**कणयकलसेसु कविलो, किंकरपुरिसेहि पउमआणाए । साधम्मिओ त्ति काउं, कन्ताए समं तओ ण्हविओ ॥७४॥**

**भुञ्जाविओ विचित्तं, आहारं भूसिओ य रयणेहिं । दिन्नं च धणं बहुयं, ताहे गेहं गओ विप्पो ॥७५॥**

**आजम्मधणविहीणो, पत्तो जणविम्हयं महाभोगं । तह वि न करेइ धिइं, [1]सम्माणपराहयसरीरो ॥७६॥**

**पुव्वं विहडिय-पडियं, मज्झ घरं आसि विभवपरिहीणं । रामस्स पसाएणं, जायं धण-रयणपरिपुण्णं ॥७७॥**

---

यद्यपि च स्वयं नरेन्द्रः परविषयगतो भवेदेकाकी । तथापि च परिभवस्थानं प्राप्नोति लोकस्थितिरेषा ॥६५॥

यस्यार्थस्तस्य सुखं यस्यार्थः पण्डितश्च स लोके । यस्यार्थः स गुरुकोऽर्थविहीनश्च लघुकस्तु ॥६६॥

तस्य महार्थश्च यशोधर्मोऽपि च तस्य भवति स्वाधीनः । धर्मोऽपि स समर्थो यस्याहिंसा समुद्दिष्य ॥६७॥

अथवा किं न श्रुतं त्वया ? सनत्कुमारः समस्तभरताधिपतिः । रुपस्य दर्शनार्थे यस्य सुरा आगताऽत्र ॥६८॥

संवेगजनितकारुण्यः प्रव्रज्यां गृहीत्वा परिभ्रमन् । भिक्षां चालभमानो विजयपुरं प्राप्तः क्रमशः ॥६९॥

प्रतिलाभितो महात्मा कदाचिद्दारिद्रसमभिभूतया । पतिताश्च रत्नवृष्टि र्गन्धोदकपुष्पवर्षा च ॥७०॥

एवंविधा अपि श्रमणाः सुर-नरमहितार्चिता दृढचारित्राः । परविषयं विहरन्तः परिभूता दुष्टलोकेन ॥७१॥

परुषाण्यनिष्टानि च यद्भणिता रागद्वेषमूढेन । तत्क्षमस्वाविनयं मम यस्तवप्रभो ! कृतस्तदा ॥७२॥

कपिलमेवं रुदन्तं संस्थापयति राघवो मधुरभाषी । सीताऽपि सुशर्मा ससंभ्रमेण परिनिवृत्तिं करोति ॥७३॥

कनककलशैः कपिलः किंकरपुरुषैः पद्माज्ञया । साधर्मिक इतिकृत्वा कान्तायाः समं ततः स्नापितः ॥७४॥

भोजितो विचित्रमाहारं भूषितश्च रत्नैः । दत्तं च धनं बहुकं तदा गृहं गतो विप्रः ॥७५॥

आजन्मधनविहीनः प्राप्त जनविस्मितं महाभोगम् । तथापि न करोति धृतिं सन्मानपराहतशरीरः ॥७६॥

पूर्वं विघटितपतितं मम गृहमासीद्विभवपरिहीणम् । रामस्य प्रसादेन जातं धनरत्नपरिपूर्णम् ॥७७॥

---

१. सम्माणसराहय-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हा ! कट्ठं सप्पुरिसा, जं मे [1]निब्भच्छिया अलज्जेणं । तं मे दहइ सरीरं, सल्लं च अवट्ठियं हियए ॥७८॥
अट्ठारस य सहस्सा, धेणूणं तं च गेहिणी[2] मोत्तुं । [3]नन्दजइस्स सयासे, कविलो दिक्खं समणुपत्तो ॥७९॥
बारसविहं तवं सो, कुणमाणो मारुओ व्व नीसङ्गो । विहरइ मुणी महप्पा, गामा-ऽऽगरमण्डिया वसुहंधा ॥८०॥

जो कविलस्स इमं तु पयत्थं, एक्कमणो निसुणेइ मणुस्सो ।
सो उववाससहस्सविहायं, भुञ्जइ दिव्वसुहं विमलङ्गो ॥८१॥

॥ इय पउमचरिए कविलोवक्खाणं नाम पञ्चतीसइमो उद्देसओ समत्तो ॥

---

हा ! कष्टं सत्पुरुषा यन्मया निर्भत्सिता अलज्जेन । तन्मे दहति शरीरं शल्यं चावस्थितं हृदये ॥७८॥
अष्टादश च सहस्राणि धेनूनां तां च गृहिणीं त्यक्त्वा । नन्दपतेः सकाशे कपिलो दीक्षां समनुप्राप्तः ॥७९॥
द्वादशविधं तपः स क्रियमाणो मरुदिव निसङ्गः । विहरति मुनि र्महात्मा ग्रामाऽऽकरमण्डितां वसुधाम् ॥८०॥
यः कपिलस्येदं तु पदार्थमेकमना निश्रुणोति मनुष्यः । स उपवाससहस्रविहिते भुनक्ति दिव्यसुखं विमलाङ्गः ॥८१॥

॥ इति पद्मचरित्रे कपिलोपाख्यानं नाम पञ्चत्रिंशत्तम उद्देशः समाप्तः ॥

---

१. निब्भत्थिया सकज्जेणं-प्रत्य० । २. गेहिणि-प्रत्य० । ३. नन्दवइस्स-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३६. वणमालापव्व

तत्तो कमेण ताणं, तत्थऽच्छन्ताण पाउसो कालो । [1]अहिलङ्घिओ सुहेणं, ताव य सरओ समणुपत्तो ॥१॥
भणइ तओ जक्खवई, पउमं पत्थाणववसिउच्छाहं । जो कोइ अविणओ मे, सो देव तुमे खमेयव्वो ॥२॥
एव भणिओ पवुत्तो, पउमो जक्खाहिवं महुरभासी । अम्हाण वि दुच्चरियं, खमाहि सव्वं निरवसेसं ॥३॥
अहिययरं परितुट्ठो, इमेहि वयणेहि रामदेवस्स । चलणेसु पणमिऊणं, हारं च सयंपभं देइ ॥४॥
मणिकुण्डलं च दिव्वं, देवो उवणेइ लच्छिनिलयस्स । सीयाए सुकल्लाणं तुट्ठो चूडामणिं देई ॥५॥
वीणा य इच्छियसरा, दाऊणं ताण उस्सुगमणेणं । मायाविणिम्मिया सा, अवहरिया तक्खणं नयरी ॥६॥
तत्तो विणिग्गया ते, वच्चन्ति फलासिणो जहिच्छाए । रण्णं वइक्कमेउं, विजयपुरं चेव संपत्ता ॥७॥
अत्थमिए दिवसयरे, जाए तमसाउले दिसायक्के । नयरस्स समब्भासे, अवट्ठिया उत्तरवरेणं ॥८॥
तम्मि पुरे नरवसभो, महीहरो नाम निग्गयपयावो । महिला से इन्दाणी, धूया वि य तस्स वणमाला ॥९॥
बालत्तणमाईए, सा कण्णा लक्खणाणुगुणरत्ता । दिज्जन्ती वि हु नेच्छइ, अन्नं पुरिसं सुरूवं पि ॥१०॥
पव्वइयम्मि दसरहे, विणिग्गए राम-लक्खणे सोउं । पुहईधरो विसण्णो, दुहियाए वरं विचिन्तेइ ॥११॥
मुणिओ य इन्दनयरे, नरिन्दवसहस्स बालमित्तस्स । पुत्तो सुन्दररूवो, निरूविया तस्स सा कन्ना ॥१२॥

---

## ३६. वनमालापर्वः

ततः क्रमेण तेषां तत्रासनानां प्रावृट् कालः । अधिलङ्घितः सुखेन तावच्च शरत् समनुप्राप्तः ॥१॥
भणति ततो यक्षपतिः पद्मं प्रस्थानव्यवसितोत्साहम् । यः कोऽप्यविनयो मे स देव त्वया क्षन्तव्यः॥२॥
एवं भणितः प्रोक्तः पद्मो यक्षाधिपं मधुरभाषी । अस्माकमपि दुश्चरितं क्षमस्व सर्वं निरवशेषम् ॥३॥
अधिकतरं परितुष्ट एभि र्वचनै रामदेवस्य । चरणयोः प्रणम्य हारं च स्वयंप्रभं ददाति ॥४॥
मणिकुण्डलं च दिव्यं देव उपनयति लक्ष्मीनिलयाय । सीतायै सुकल्याणं तुष्टश्चूडामणिं ददाति ॥५॥
वीणा चेच्छितस्वरा दत्वा तेषामुत्सुकमनसा । मायाविनिर्मिता साऽपहृता तत्क्षणं नगरी ॥६॥
ततो विनिर्गतास्ते व्रजन्ति फलाशिनो यथेच्छया । अरण्यं व्यतिक्रम्य विजयपुरमेव संप्राप्ताः ॥७॥
अस्तमिते दिवाकरे जाते तम आकुले दिक्चक्रे । नगरस्य समभ्यासेऽवस्थिता उत्तरवरेण ॥८॥
तस्मिन्पुरे नरवृषभो महीधरो नाम निर्गतप्रतापः । महिला तस्येन्द्राणी दुहिताऽपि च तस्य वनमाला ॥९॥
बालत्त्वादिना सा कन्या लक्ष्मणानुगुणरक्ता । दीयमानापि हु नेच्छत्यन्यं पुरुषं सुरुपमपि ॥१०॥
प्रव्रजिते दशरथे विनिर्गतयो रामलक्ष्मणयोः श्रुत्वा । पृथिवीधरो विषण्णो दुहितु र्वरं विचिन्तयति ॥११॥
मुणितश्चेन्द्रनगरे नरेन्द्रवृषभस्य बालमित्रस्य । पुत्र ! सुन्दररुपो निरुपिता तस्य सा कन्या ॥१२॥

---

१. अह लंघिओ-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तं वित्तन्तं नाऊण, बालिया लक्खणं अणुसरन्ती । भणइ य मरणं पि वरं, न य मे कज्जं तु अन्नेणं ॥१३॥
अन्नस्स दिज्जमाणी, काऊणं मरणनिच्छयं हिययं । गन्तूण भणइ पियरं, करेमि वणदेवयापूयं ॥१४॥
अणुमन्निया य तेणं, [1]पोसहियानिग्गया सह जणेणं । रयणिसमयम्मि पत्ता, जत्थुद्देसं ठिया ते उ ॥१५॥
वणदेवयाए पूयं, काऊणं जणवए पसुत्तम्मि । सिबिराउ विणिग्गन्तुं, तं चिय वडपायवं पत्ता ॥१६॥
एक्कुद्देसम्मि ठिया, तम्मि य वडपायवे अइमहन्ते । लच्छीहरेण दिट्ठा, इमाणि वयणाणि जंपन्ती ॥१७॥
जा एत्थ तरुनिवासी, सुणेउ वणदेवया इमं वयणं । लच्छीहरस्स गन्तुं, कहेज्ज मह मरणसंबन्धं ॥१८॥
जह तुज्झ विओगेणं, वणमाला दुक्खिया अणन्नमणा । [2]उल्लम्बिऊण कण्ठं, कालगया रण्णमज्झम्मि ॥१९॥
भणिऊण वयणमेयं, वत्थमयं पासयं करिय कण्ठे । साहाए बन्धमाणी, गन्तुं सोमित्तिणा गहिया ॥२०॥
अवगूहिऊण जंपइ, अहयं सो लक्खणो विसालच्छी । समदिट्ठीयऽवलोयसु, अधिइं सोगं च मोत्तूणं ॥२१॥
सो लक्खणेण पासो, कण्ठाओ फेडिओ तुरन्तेणं । आसासिया य बाला, धणियं वयणामएणं तु ॥२२॥
सुन्दररूवेण तओ, मुणेइ सा लक्खणं सुविम्हइया । किं वणदेवीए इमो, तुट्ठाए कओ पसाओ मे ? ॥२३॥
तो लक्खणेण नीया, वणमाला राघवस्स पामूले । पणमइ कयञ्जलिउडा, सीयासहियं पउमनाहं ॥२४॥
दट्ठूण अप्पबीयं, विहसन्ती लक्खणं भणइ सीया । किं चन्देण समाणं, कुमार ! जणिओ य समवाओ ?. ॥२५॥
कह जाणसि वइदेही !, णिया रामेण जंपई सीया । चेट्ठाए नवरि सामिय ! अहयं जाणामि निसुणेहि ॥२६॥
जोण्हाए समं चन्दो, जम्मि य वेलाए उग्गओ गयणे । तव्वेलम्मिह पत्तो, सहिओ बालाए सोमित्ती ॥२७॥

---

तद्वृतान्तं ज्ञात्वा बालिका लक्ष्मणमनुस्मरन्ती । भणति च मरणमपि वरं न च मे कार्यं त्वन्येन ॥१३॥
अन्यस्य दीयमाना कृत्वा मरणनिश्चयं हृदयम् । गत्वा भणति पितरं करोमि वनदेवतापूजाम् ॥१४॥
अनुमता च तेन निगृहीता निर्गता सह जनेन । रजनी समये प्राप्ता यत्रोद्देशं स्थितास्ते तु ॥१५॥
वनदेवतायाः पूजां कृत्वा जनपदे प्रसुप्ते । शिबिराद्विनिर्गत्य तदेव वटपादपं प्राप्ता ॥१६॥
एकोद्देशे स्थिता तस्मिंश्च वटपादपेऽतिमहति । लक्ष्मीधरेण दृष्टेमानि वचनानि जल्पन्ती ॥१७॥
याऽत्र तरुनिवासिनी श्रृणोतु वनदेवतेदं वचनम् । लक्ष्मीधरस्य गत्वा कथय मम मरणसम्बन्धम् ॥१८॥
यथा तव वियोगेन वनमाला दुखिताऽनन्यमनाः । अवलम्ब्य कण्ठं कालगताऽरण्य मध्ये ॥१९॥
भणित्वा वचनमेतद्वस्त्रमयं पाशकं कृत्वा कण्ठे । शाखायां बध्नन्ती गत्वा सौमित्रिणा गृहीता ॥२०॥
अवगूह्य जल्पत्यहं स लक्ष्मणो विशालाक्षि ! । समदृष्ट्या प्रलोकयाधृतिं शोकं च मुक्त्वा ॥२१॥
स लक्ष्मणेन पाशः कण्ठात्स्फेटितस्त्वरमाणेन । आश्वसिता च बालाऽत्यन्तं वचनामृतेन तु ॥२२॥
सुन्दररूपेण ततो मुणति सा लक्ष्मणं सुविस्मिता । किं वनदेव्याऽयं तुष्टया कृतः प्रसादो मे ? ॥२३॥
तदा लक्ष्मणेन नीता वनमाला राघवस्य पादमूले । प्रणमति कृताञ्जलिपुटा सीतासहितं पद्मनाभम् ॥२४॥
दृष्ट्वाऽत्मद्वितीयं विहसन्ती लक्ष्मणं भणति सीता । किं चन्दनेन समानं कुमार ! जनितश्च समवायः ? ॥२५॥
कथं जानासि वैदेहि ! भविता रामेण जल्पति सीता । चेष्टया नवरि स्वामिन् ! अहं जानामि निश्रृणु ॥२६॥
ज्योत्स्नया समं चन्द्रो यस्मिंश्च वेलायामुद्गतो गगने । तद्वेलायामिह प्राप्तः सहितो बालया सौमित्रिः ॥२७॥

---

१. निग्गहिया निग्गया-प्रत्य० । २. उब्बन्धिऊण-प्रत्य० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

जह आणवेसि भद्दे !, एव इमं जंपिऊण सोमित्ती । वणमालासमहिओ, उवविट्ठो सन्निगासम्मि ॥२८॥
ते तत्थ समुल्लावं, वणमालासंसियं पकुव्वन्ता । अच्छन्ति सुरसरिच्छा, नग्गोहदुमस्स हेट्ठम्मि ॥२९॥
ताव य वणमालाए, सहीओ निद्दक्खए विउद्धाओ । दट्ठूण ताए सयणं, सुन्नं ताहे गवेसन्ति ॥३०॥
सद्देण ताण सुहडा, समुट्ठिया विविहपहरणविहत्था । पायालबलसमग्गा, ते वि गवेसन्ति वणमालं ॥३१॥
दिट्ठा य भमन्तेहिं, वणमाला राम-लक्खणा य तहिं । परिमुणियकारणेहिं, नरेहि सिट्ठा महिहरस्स ॥३२॥
दिट्ठा नरवइ विद्धी, तुह सामिय ! सयलबन्धुसहियस्स । इह लक्खणो य रामो, समागया पुरिसमीवम्मि ॥३३॥
सा तुज्झ सामि ! दुहिया, वणमाला अप्पयं विवायन्ती । रुद्धा य लक्खणेणं, सा वि तहिं अच्छई बाला ॥३४॥
सुणिऊण वयणमेयं, ताण धणं देइ नरवई तुट्ठो । चिन्तेइ य दुहियाए, जं इट्ठसमागमो जाओ ॥३५॥
सव्वाण वि जीवाणं, इह इट्ठसमागमो सुहावेइ । जो पुण हवेज्ज सहसा, सो सुरलोगं विसेसेइ ॥३६॥
एवं महीहरनिवो, भज्जाए परिजणेण समसहिओ । गन्तूण रामदेवं, अवगूहइ लक्खणसमग्गं ॥३७॥
सीया य समालत्ता, कुसलं परिपुच्छिया सरीराइ । तत्थेव ण्हाण-भोयण-आभरणविही कया ताणं ॥३८॥
पडुपडह-तूरसद्दो, महूसवो कारिओ नरवईणं । नच्चन्तवरविलासिणि-जणेण बहुमङ्गलाडोवो ॥३९॥
कुङ्कुमकयङ्गरागा, सीयासहिया रहेसु आरूढा । नयरं महीहरेणं, पवेसिया जण-धणाइण्णं ॥४०॥
ते तम्मि य विजयपुरे, भुञ्जन्ता उत्तमं विसयसोक्खं । अच्छन्ति जहिच्छाए, दसरहपुत्ता गुणमहन्ता ॥४१॥
एवं तु पुण्णेण समज्जिएणं, अन्नन्नदेसेसु वि संचरन्ता । पावन्ति सम्माण परं मणुस्सा, तम्हा खु धम्मं विमलं करेह ॥४२॥

॥ इय पउमचरिए वणमालानामं छत्तीसइमं पव्वं समत्तं ॥

---

यथाऽऽज्ञापयसि भद्रे ! एवमिदं जल्पित्वा सौमित्रिः । वनमालासमसहित उपविष्टः सन्निकर्षे ॥२८॥
ते तत्र समुल्लापं वनमालाशंसित प्रकुर्वन्तः । आसते सुरसदृशा न्यग्रोधद्रुमस्याधस्तात् ॥२९॥
तावच्च वनमालायाः सखायो निद्राक्षये विबुद्धाः । दृष्ट्वा तस्याः शयनं शून्यं तदा गवेषयन्ति ॥३०॥
शब्देन तेषां सुभटाः समुत्थिता विविधप्रहरणविहस्ताः । पातालबलसमग्रास्तेऽपि गवेषयन्ति वनमालाम् ॥३१॥
दृष्टाश्च भ्रमद्भिर्वनमाला राम-लक्ष्मणौ च तत्र । परिमुणितकारणै नरैः शिष्टौ महीधरस्य ॥३२॥
दृष्टौ नरपते ! वृद्धिस्तव स्वामिन् ! सकलत्रबन्धुसहितस्य । इह लक्ष्मणश्च रामः समागतौ पुरिसमीपे ॥३३॥
सा तव स्वामिन् ! दुहिता वनमालाऽऽत्मानं व्यापादयन्ती । रुद्धा च लक्ष्मणेन सापि तत्रास्ते बाला ॥३४॥
श्रुत्वा वचनमेतत्तेभ्यो धनं ददाति नरपतिस्तुष्टः । चिन्तयति च दुहितु र्यदिष्टसमागमो जातः ॥३५॥
सर्वेषामपि जीवानामिहेष्टसमागमः सुखायति । यः पुन र्भवेत्सहसा स सुरलोकं विशेषयति ॥३६॥
एवं महीधरनृपो भार्यया परिजनेन समसहितः । गत्वा रामदेवअवगूहति लक्ष्मणसमग्रम् ॥३७॥
सीता च समालप्ता कुशलं परिपृष्टा शरीरादि । तत्रैव स्नान-भोजनाभरणविधिः कृतस्तेषाम् ॥३८॥
पटुपटहतूर्यशब्दो महोत्सवः कारितो नरपतिना । नृत्यद्वरविलासिनि-जनेन बहुमङ्गलाटोपः ॥३९॥
कुङ्कुमकृताङ्गरागौ सीतासहितौ रथमारुढौ । नगरं महीधरेण प्रवेशितौ जनधनाकीर्णम् ॥४०॥
तौ तस्मिन्विजयपुरे भुञ्जन्तावुत्तमं विषयसुखम् । आसाते यथेच्छया दशरथपुत्रौ गुणमहन्तौ ॥४१॥
एवं तु पुण्येन समर्जितेनान्योन्यदेशेष्वपि संचरन्तः । प्राप्नुवन्ति सन्मानं परं मनुष्यास्तस्मात्खलु धर्मं विमलं कुरुत ॥४२॥

॥ इति पद्मचरित्रे वनमालानाम षष्टिंशत्तम उद्देशः समाप्तः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३७. अइवीरियनिक्खमणपव्वं

**अह अन्नया सहाए, राहव-लच्छीहराण पच्चक्खं। तुरियं च लेहवाहो, समागओ महिहरं नमइ ॥१॥**
**लेहं समप्पिऊणं, सो चेव य आसणे सुहनिविट्ठो। नरवइदिन्नाएसो, वायइ सेणावई लेहं ॥२॥**
**अत्थि सिरीअइविरिओ, नन्दावत्ते पुरे महाराया। पणउत्तमङ्गनरवइ-मउडतडोहट्ठचलणजुओ ॥३॥**
**भरहेण सह विरोहो, महीहरं आणवेइ विजयपुरे। अइविरियमहाराया, कुसलेणाऽऽभासणं कुणइ ॥४॥**
**जे केइह सामन्ता, सव्वे वि समागया मह समीवं। चउरङ्गबलसमग्गा, वट्टन्ति अणारिया य वसे ॥५॥**
**अञ्जणगिरिसरिसाणं, मत्ताण गयाण अट्ठहि सएहिं। तिहि तुरयसहस्सेहिं, समागओ विजयसद्दूलो ॥६॥**
**कलहे केसरिसहिओ, महाधओ तह रणम्मिमाईया। अङ्गाहिवइनरिन्दो, सएहि छहि मत्तहत्थीणं ॥७॥**
**तुरयाण सहस्सेहिं, सत्तहि एए लहुं समणुपत्ता। पञ्चालवई पत्थो, समागओ करिसहस्सेणं ॥८॥**
**पुण्डपुरसामिओ वि य, समागओ साहणेणं बहुएणं। पत्तो य मगहराया, अट्ठहिं दन्तीसहस्सेहिं ॥९॥**
**वज्जहरो य सुकेसो, मुणिभद्दो तह सुभद्दनामो य। नन्दणमाई, एए, जउणाहिवई समणुपत्ता ॥१०॥**
**अणिवारियविरिओ वि य, केसरिविरिओ य सीहरहमाई। एए साहणसहिया, समागया नियमाउलगा ॥११॥**

---

## ३७. अतिवीर्य निष्क्रमणपर्वम्

अथान्यदा सभायां राघवलक्ष्मीधरयोः प्रत्यक्षम्। त्वरितं च लेखवाहः समागतो महीधरं नमति ॥१॥
लेखं समर्प्य स एव चासने सुखनिविष्टः। नरपतिदत्तादेशो वाचयति सेनापति र्लेखम् ॥२॥
अस्ति श्रीअतिवीर्यो नन्दावर्त्ते पुरे महाराजा। प्रणतोत्तमाङ्गनरपतिमुकुटतटावधृष्टचरणयुगः ॥३॥
भरतेन सह विरोधो महीधरमाज्ञापयति विजयपुरे। अतिवीर्यमहाराजः कुशलेनाभाषणं करोति ॥४॥
ये केऽपि सामन्ताः सर्वेऽपि समागता मम समीपम्। चतुरङ्गबलसमग्रा वर्तन्तेऽनार्याश्च वशे ॥५॥
अञ्जनगिरिसदृशानां मत्तानां गजानामष्टाभिः शतैः। त्रिभि स्तुरगसहस्रैः समागतो विजयशार्दुलः ॥६॥
कलभः केसरिसहितो महाधनस्तथा रणे आगतः। अङ्गाधिपतिनरेन्द्रः शतैः षड्भिर्मत्तहस्तीनाम् ॥७॥
तुरगाणां सहस्रैः सप्तभिरेते लघुं समनुप्राप्ताः। पञ्चालपतिः प्रस्थः समागतः करिसहस्रेण ॥८॥
पुण्डपुरस्वाम्यपि च समागतः साधनेन बहुना। प्राप्तश्च मगधराजा अष्टाभिर्दन्तिसहस्रैः ॥९॥
वज्रधरश्च सुकेशो मुनिभद्रस्तथा सुभद्रनामा च। नन्दनादय एते यमुनाधिपतयः समनुप्राप्ताः ॥१०॥
अनिवारितवीर्योऽपि च केसरिवीर्यश्च सिंहरथादयः। एते साधनसहिताः समागता निजमातुलाः ॥११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वसुसामि मारिदत्तो, अम्बट्ठो पोट्टिलो य सोवीरो । मन्दरमाई एए, समागया तिव्वबलसहिया ॥१२॥
एए अन्ने य बहू, दससु य अक्खोहिणीसु परिपुण्णा । सिग्घं च समणुपत्ता, तियसा विय भोगदुल्ललिया ॥१३॥
एएसु [1]परिमिओ हं, भरहं इच्छामि रणमुहे जेउं । महिहर ! लेहदरिसणे, आगन्तव्वं तए सिग्घं ॥१४॥
परिवाइयम्मि लेहे, जाव च्चिय महिहरो न उल्लवइ । ताव च्चिय तं पुरिसं, वयणमिणं लक्खणो भणइ ॥१५॥
अइविरियस्स किमत्थं, भरहस्स य जेण विग्गहो जाओ । एयं साहेहि फुडं, भद्द ! महं कोउगं परमं ॥१६॥
एवं च भणियमेत्ते, वाउगई साहिउं अह पवत्तो । मह सामिएण दूओ, विसज्जिओ भरहरायस्स ॥१७॥
अह सो सुबुद्धिनामो, भरहं गन्तूण भणइ वयणाइं । अइविरिएण सुणिज्जउ, दूओ हं पेसिओ तुज्झ ॥१८॥
सो आणवेइ देवो, भरह ! तुमं मज्झ कुणसु भिच्चत्तं । अहवा पुरिं अओज्झं, मोत्तूणं वच्चसु विदेसं ॥१९॥
सुणिऊण वयणेयं, सत्तुग्घो रोसपूरियामरिसो । अह उट्ठिओ तुरन्तो, जंपन्तो फरुसवयणाइं ॥२०॥
न य तस्स भरहसामी, कुणई भिच्चत्तणं कुपुरिसस्स । किं केसरि भयभीओ, वच्चइ पासं सियालस्स ? ॥२१॥
अहवा तस्साऽऽसन्नं, मरणं जेणेरिसाइं भासेइ । पित्तजरेण व गहिओ, अणप्पवसगो दुवं जाओ ॥२२॥
दूएण वि पडिभणिओ, किं गज्जसि एत्थ अत्तणो गेहे ? । जाव च्चिय अइविरियं, न पेच्छसी रणमुहे रुट्ठं ॥२३॥
एवं च भणियमेत्ते, घेत्तुं चलणेसु कड्ढिओ दूओ । सुहडेसु नयरमज्झे, नीओ च्चिय हम्ममाणो सो ॥२४॥

---

वसुस्वामी मारिदत्तो ऽम्बष्टः पोट्टिलश्च सौवीरः । मन्दरादय एते समागतास्तीव्रबलसहिताः ॥१२॥
एतेऽन्ये च बहवो दशभिश्चाक्षौहिणिभिः परिपूर्णाः । शीघ्रं च समनुप्राप्तास्त्रिदशा इव भोगदुर्ललिताः ॥१३॥
एतैः परिमितोऽहं भरतमिच्छामि रणमुखे जेतुम् । महीधर ! लेखदर्शन आगन्तव्यं त्वया शीघ्रम् ॥१४॥
परिवाचिते लेखे यावदेव महीधरो नोल्लपति । तावदेव तं पुरुषं वचनमिदं लक्ष्मणो भणति ॥१५॥
अतिवीर्यस्य किमर्थं भरतस्य च येन विग्रहो जातः । एतत्कथय स्फुटं भद्र ! मम कौतुकं परमम् ॥१६॥
एवं च भणितमात्रे वायुगतिः कथयितुमथ प्रवृत्तः । मम स्वामिना दूतो विसर्जितो भरतराज्ञः ॥१७॥
अथ स सुबुद्धिनामा भरतं गत्वा भणति वचनानि । अतिवीर्येण श्रुणोतु दूतोऽहं प्रेषितस्तव ॥१८॥
स आज्ञापयति देवो भरत ! त्वं मम कुरु भृत्यत्वम् । अथवा पुरिमयोध्यां मुक्त्वा व्रज विदेशम् ॥१९॥
श्रुत्वा वचनमेतत्शत्रुघ्नो रोषपूरितामर्षः । अथोत्थितस्त्वरमाणोजल्पन्परुषवचनानि ॥२०॥
न च तस्य भरतस्वामी करोति भृत्यत्वं कुपुरुषस्य । किं केसरि भयभीतो व्रजति पार्श्वे शृगालस्य ? ॥२१॥
अथवा तस्यासन्नं मरणं येनेदृशानि भाषते । पित्तज्वरेण वा गृहीतोऽनात्मवशको ध्रुवं जातः ॥२२॥
दूतेनापि प्रतिभणितः किं गर्जस्यत्रात्मनो गृहे ? । यावदेवातिवीर्यं न पश्यसि रणमुखे रुष्टम् ॥२३॥
एवं च भणितमात्रे गृहीत्वा चरणयोः कृष्टो दूतः । सुभटैर्नगरमध्ये नीत एव हन्यमानः सः ॥२४॥

---

१. परिमिओ परिवृत्त इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सो तेहि विमाणेउं, मुक्को रयरेणुधूलियसरीरो । गन्तूण सव्वमेयं, कहेइ नियगस्स सामिस्स ॥२५॥

महया बलेण भरहो, विणिग्गओ तक्खणं पुरिवरीओ ।
अइविरियस्स अभिमुहो, [1]रणरसकण्डुं च वहमाणो ॥२६॥

सोऊण मिहिलसामी, कणगो सह साहणेण संपत्तो । सीहोयरमाईया, सुहडा भरहं समल्लीणा ॥२७॥

अहविरिओ वि नरिन्दो, दूएण विमाणिएण आरुट्ठो । भरहस्स सवडहुत्तो, विणिग्गओ निययनयराओ ॥२८॥

आगच्छामि लहुं चिय, एत्तो लेहारियं विसज्जेउं । सो महिहरो नरिन्दो, भणिओ रामेण एगन्ते ॥२९॥

भरहस्स जं सकज्जं, तं चिय अम्हाण साहणीयं तु । पच्छन्नएहि गन्तुं, अहविरिओ चेव हन्तव्वो ॥३०॥

अच्छ सुहं वीसत्थो, महिहर ! पुत्तेहि तुज्झ सहिओ हं । वच्चामि तस्स पासं, तेण वि अणुमन्निओ रामो ॥३१॥

एव भणिऊण तो सो, आरूढो रहवरं सह पियाए । महिहरसुएहि समयं, वच्चइ तो लक्खणसमग्गो ॥३२॥

नन्दावत्तपुरं ते, महिहरपुत्ता गया सह बलेणं । आवासिया य एत्तो, पउमो वि तहिं सुहासीणो ॥३॥

तिण्हं पि समुल्लावो, अइविरियपराजए निसासमए । तो भणइ जणयतणया, राघव ! वयणं निसामेहि ॥३४॥

अइविरिओ वि हु सुव्वइ, बहुसुहडसहस्सजणियपरिवारो । किह तं जिणेइ भरहो, थेवेण बलेण संगामे ? ॥३५॥

चिन्तेहि तं उवायं, अइविरिओ जेण जिप्पई पावो । एवं च परिगणेउं, अदीहसुत्तं कुणह कज्जं ॥३६॥

तो भणइ लच्छिनिलओ, किं दीणं एव जंपसे भद्दे ! । पायं तु अप्पविरियं, विणिज्जियं पेच्छसू अचिरा ॥३७॥

---

स तैर्विमन्य मुक्तो रजोरेणुधूलितशरीरः । गत्वा सर्वमेतत्कथयति निजस्य स्वामिनः ॥२५॥

महता बलेन भरतो विनिर्गतस्तत्क्षणं पुरवरात् । अतिवीर्यस्याभिमुखो रणरसकण्डुं च वहन् ॥२६॥

श्रुत्वा मिथिलास्वामी कनकः सहसाधनेन संप्राप्तः । सिंहोदरादयः सुभटा भरतं समालीनाः ॥२७॥

अतिवीर्योऽपि नरेन्द्रो दूतेन विमानितेनारुष्टः । भरतस्याभिमुखो विनिर्गतो निजनगरात् ॥२८॥

आगच्छामि लघ्वेवेतो लेखहारिकं विसर्ज्य । स महीधरो नरेन्द्रो भणितो रामेणेकान्ते ॥२९॥

भरतस्य यत्स्वकार्यं तदेवास्माभिः साधनीयं तु । प्रच्छन्नैर्गत्वातिवीर्य एव हन्तव्यः ॥३०॥

आस्स्व सुखं विश्वस्तो महीधर ! पुत्रैस्तव सहितोऽहम् । व्रजामि तस्य पार्श्वं तेनाप्यनुमतो रामः ॥३१॥

एवं भणित्वा तदा स आरुढो रथवरं सह प्रियया । महीधरसुतैः समकं व्रजति ततो लक्ष्मणसमग्रः ॥३२॥

नन्दावर्तपुरं ते महीधरपुत्रा गताः सहबलेन । आवासिताश्चेतः पद्मोऽपि तत्र सुखासीनः ॥३३॥

तिसृणामपि समुल्लापोऽतिवीर्यपराजये निशासमये । तदा भणति जनकतनया राघव ! वचनं निश्रुणु ॥३४॥

अतिवीर्योऽपि खलु श्रूयते बहुसुभटसहस्रजनितपरिवारः । कथं तं जीयाद्भरतः स्तोकेन बलेन संग्रामे ? ॥३५॥

चिन्तयत तदुपायमतिवीर्यो येन जीयते पापः । एवं च परिगण्यादीर्घसूत्रं कुरुत कार्यम् ॥३६॥

तदा भणति लक्ष्मीनिलयः किं दीनमेव जल्पसि भद्रे ! । प्रायस्त्वचाल्पवीर्यं विनिर्जितं पश्यस्यचिरात् ॥३७॥

---

१. रवणकण्डुं चेव वहमाणो-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अह भणइ पउमनाहो, लक्खण ! निसुणेहि रणमुहे भरहो ।
अइविरिएण जइ जिओ, तो अम्हं किं व जीएणं ? ।।३८।।

अन्नं पि सुणसु लक्खण !, सत्तुग्घेणं तु जं कयं कज्जं । दाऊण य उक्खन्दं, सिबिराओ साहणं हरइ ।।३९।।
सहसा निसासु गन्तुं, समयंचिय रुद्दभूइणा सिबिरं । हयविहयविप्परद्धं, काऊण भडे विगयजीए ।।४०।।
चउसट्ठिसहस्साइं, तुरयाणं गयवराण सत्तसया । भुयबलविणिज्जिया ते, नीया भरहस्स पासम्मि ।।४१।।
एवं कयसामत्था, रयणी गमिऊण तत्थ पडिबुद्धा । गन्तूण जिणहरं ते पयओ वन्दन्ति परितुट्ठा ।।४२।।
जाव जिणवन्दणं ते, कुणन्ति तावाऽऽगया भवणपाली । दिट्ठा असिवरहत्था, देवी दिव्वेण रूवेणं ।।४३।।
सा भणइ तुज्झ राघव ! अइविरियं तक्खणे वसे काउं । करयलकयञ्जलिउडं, सिग्घं चलणेसु पाडेमि ।।४४।।
तो देवयाए एत्तो, सिग्घं पुरिसाण मिहिलियारूवं । लक्खणसहियाण कयं, सुरवहुसरिसं मणभिरामं ।।४५।।
पुणरवि नमिऊण जिणं, रामो तं नट्टियाजणं घेत्तुं । पच्छन्नदेहधारी, रायहरं पत्थिओ सहसा ।।४६।।
दिट्ठो सभाए राया, आढत्ता नच्चिउं ठिया समुहा । तग्गयमणेण एत्तो, दिट्ठा लोगेण अइरूवा ।।४७।।
गन्धव्वं तु पगीयं, महुरं सत्तसरगमयसंजुत्तं । बहुविहवियप्पकुहरं हरइ मणं मुणिवराणं पि ।।४८।।
अह नच्चिउं पवत्ता, एत्तो सा नट्टिया ललियरूवा । रत्तुप्पलबलियम्मं व देइ चलणेसु वियरन्ती ।।४९।।
नयणकडक्खुक्खेवण-लीलापवियम्भमाणकर-चरणा । इसिहसियथणुक्कम्पण-भमुहासंचार[1]रसभावा ।।५०।।

---

अथ भणति पद्मनाभो लक्ष्मण ! निश्रुणु रणमुखे भरतः । अतिवीर्येण यदि जितस्तदास्माकं किं वा जीवितेन ? ।।३८।।
अन्यदपि श्रुणु लक्ष्मण ! शत्रुघ्नेन तु यत्कृतं कार्यम् । दत्वा चावस्कन्दं शिबिरात्साधनं हरति ।।३९।।
सहसा निशासु गत्वा समकमेव रुद्रभूतिना शिबिरम् । हतविहतविपीडितं कृत्वा भटान्विगतजीवान् ।।४०।।
चतुष्षष्टिसहस्राणि तुरगाणां गजवराणां सप्तशताः । भुजबलविनिर्जितास्ते नीता भरतस्य पार्श्वे ।।४१।।
एवं कृतसामर्थ्या रजनीं गमयित्वा तत्र प्रतिबुद्धाः । गत्वा जिनगृहं ते प्रयतो वन्दन्ते परितुष्टाः ।।४२।।
यावज्जिनवन्दनं ते कुर्वन्ति तावदागता भवनपालिनी । दृष्ट्याऽसिवरहस्ता देवी दिव्येन रुपेण ।।४३।।
सा भणति तव राघव ! अतिवीर्यं तत्क्षणे वशे कृत्वा । करतलकृताञ्जलिपुटं शीघ्रं चरणयोः पातयामि ।।४४।।
तदा देवतयेतः शीघ्रं पुरुषाणां महिलारुपम् । लक्ष्मणसहितानां कृतं सुरवधुसदृशं मनोभिरामम् ।।४५।।
पुनरपि नत्वा जिनं रामस्तं नर्तकीजनं गृहीत्वा । प्रच्छन्नदेहधारी राजगृहं प्रस्थितः सहसा ।।४६।।
दृष्टः सभायां राजाऽऽरब्धा नर्तितुं स्थिता सन्मुखा । तद्गतमनसेतः दृष्टा लोकेनातिरुपाः ।।४७।।
गान्धर्वं तु प्रगीतं मधुरं सप्तस्वरगमकसंयुक्तम् । बहुविधविकल्पकुहरं, हरति मनो मुनिवराणामपि ।।४८।।
अथ नर्तितुं प्रवृत्तेतः सा नर्तिका ललितरुपा । रक्तोत्पलबलिकर्मेव ददाति चरणयो विचरन्ती ।।४९।।
नयनकटाक्षोत्क्षेपणलीलाप्रविजृम्भमानकरचरणा । इषद्धसितस्तनकम्पनभ्रमरसंचाररसभावाः ।।५०।।

---

१. संचारसब्भावा-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**परिभमइ जत्थ जत्थ य, नच्चन्ती नट्टिया मणभिरामा । कुणइ जणो एगमणो, दिट्ठिं तत्थेव तत्थेव ॥५१॥**

**गायइ उसभाईणं, जिणाण चरियाइं तिण्णसङ्गाणं । परिओसिओ य लोगो, सव्वो वि य नरवईण समं ॥५२॥**

**तो नट्टिया पवुत्ता, अइविरिय किं तुमे समाढत्तं । भरहेण सह विरोहो, अकित्तिकरणो य लोगम्मि ? ॥५३॥**

**एवं गए वि विणयं, भरहस्स तुमं करेहि गन्तूणं । भिच्चत्तणं च ववससु, जइ इच्छसि अत्तणो जीयं ॥५४॥**

**सुणिऊण नट्टियाए, इमाणि वयणाणि नरवई रुट्ठो । खुहिया य सुहडपुरिसा, वेला इव लवणतोयस्स ॥५५॥**

**जाव च्चिय अइविरिओ, आयड्ढइ असिवरं वहत्थाए । तो नट्टियाए गहिओ, खग्गं हरिऊण केसेसु ॥५६॥**

**नीलुप्पलसंकासं, खग्गं सा नट्टिया समुग्गिरिउं । जंपइ जो मह पुरओ, ठाई सो होइ हन्तव्वो ॥५७॥**

**सो नट्टियाएँ भणिओ, जइ पणमसि भरहसामियं गन्तुं । तो होही जीयं ते, न पुणो अन्नेण भेएणं ॥५८॥**

**हाहाकारमुहरवो, लोगो भयविहलवेविरसरीरो । भणइ महच्छेरमिणं, चारणकन्नाए ववहरियं ॥५९॥**

**तो करिवरं विलग्गो, अइविरियं गेण्हिउं पउमणाहो । गन्तूण चेइयहरं, तत्थोइण्णो कुणइ पूयं ॥६०॥**

**सीयाए समं रामो, थोऊण जिणं विसुद्धभावेणं । वरधम्मं आयरियं, पणमइ य पुणो पयत्तेणं ॥६१॥**

**तं लक्खणकरगहियं, अइविरियं पेच्छिऊण जणयसुया । भणइ य मेल्लेहि लहुं, एस ठिई होइ सुहडाणं ॥६२॥**

**जे सव्वभूयसरणा, साहू तव-नियम-संजमाभिरया ।**
**ताण वि खलो खलायइ, का सण्णा पत्थिवजणेणं ? ॥६३॥**

---

परिभ्रमति यत्र यत्र च नृत्यन्ती नर्तिका मनोभिरामा । करोति जन एकाग्रमना दृष्टिं तत्रैव तत्रैव ॥५१॥

गायति ऋषभादीनां जिनानां चरित्राणि तीर्णसङ्गानाम् । परितोषितश्च लोकः सर्वोऽपि च नरपतिना समम् ॥५२॥

तदा नर्तिका प्रोक्ताऽतिवीर्य किं त्वया समारब्धम् । भरतेन सह विरोधोऽकीर्तिकरणश्च लोके ? ॥५३॥

एवं गतेऽपि विनयं भरतस्य त्वं कुरु गत्वा । भृत्यत्वं च व्यवसय यदीच्छस्यात्मनो जीवितम् ॥५४॥

श्रुत्वा नर्तिकाया इमानि वचनानि नरपती रुष्टः । क्षुब्धाश्च सुभटपुरुषा वेला इव लवणतोयस्य ॥५५॥

यावदेवातिवीर्य आकर्षत्यसिवरं वधार्थे । तदा नर्तिकया गृहीतः खड्गं हृत्वा केशैः ॥५६॥

नीलोत्पलसंकाशं खड्गं सा नर्तिका समुद्गीर्य । जल्पति यो मम पुरतः स्थास्यति स भवति हन्तव्यः ॥५७॥

स नर्तिकया भणितो यदि प्रणमसि भवतस्वामिनं गत्वा । तदाभविष्यति जीवितम् ते न पुनरन्येन भेदेन ॥५८॥

हाहाकारमुखरवो लोको भयविह्वलवेपितशरीरः । भणति महाश्चर्यमिदं चारणकन्यया व्यवहृतम् ॥५९॥

ततः करिवरं विलग्नोऽतिवीर्यं गृहीत्वा पद्मनाभः । गत्वा चैत्यगृहं तत्रावतीर्णः करोति पूजाम् ॥६०॥

सीतायाः समं रामः स्तुत्वा जिनं विशुद्धभावेन । वरधर्ममाचरितं प्रणमति च पुनः प्रयत्नेन ॥६१॥

तं लक्ष्मणकरगृहीतमतिवीर्यं प्रेक्ष्य जनकसुता । भणति च मुञ्च लघ्वेषा स्थिति र्भवति सुभटानाम् ॥६२॥

ये सर्वभूतशरणाः साधवस्तपोनियमसंयमाभिरताः । तेषामपि खलः खलायति का संज्ञा पार्थिवजनेन ? ॥६३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवभणिए विमुक्को, अइविरिओ लक्खणेण कयसमओ । भरहस्स होहि भिच्चो, गच्छ तुमं कोसला[१] नयरी ॥६४॥

एवं विमुक्क सन्तो, अइविरिओ राघवं पणमिऊणं । संवेगसमावन्नो, पडिबुद्धो तक्खणं चेव ॥६५॥

पउमेण तओ भणिओ, मा गेण्हसु[२] एस दुक्करा चरिया । भरहस्स वसे होउं, भुञ्जसु य तुमं महाभोगे ॥६६॥

अइविरिएण वि य भणिओ, दिट्ठो रज्जस्स अज्ज परमत्थो । संसारभउव्विग्गो, गेण्हामिह देव ! पव्वज्जं ॥६७॥

रज्जे विजयरहं सो, पुत्तं ठविऊण विगयसुयनेहो । आयरियपायमूले, अइविरिओ गेण्हई दिक्खं ॥६८॥

कुणइ तवं नीसङ्गो, जत्थऽत्थमिओ जिइन्दिओ धीरो । विहरइ वसुंधरं सो, सीहो इव निब्भओ समणो ॥६९॥

चारित्त-नाण-तव-संजम-सीलजुत्तो, छट्ठऽट्ठमेसु नियय परिखीणदेहो ।
रण्णे गुहासु वसहिं च करेइ धीरो, एवंगुणो विमलनाणधरो तिविज्जो ॥७०॥

॥ इय पउमचरिए अइविरियनिक्खमणं नाम सत्ततीसइमं पव्वं समत्तं ॥

---

एवं भणिते विमुक्तोऽतिवीर्यो लक्ष्मणेन कृतसमयः । भरतस्य भव भृत्यो गच्छ त्वं कोशलां नगरीम् ॥६४॥

एवं विमुक्तः सन्नतिवीर्यो राघवं प्रणम्य । संवेगसमापन्नः प्रतिबुद्धस्तत्क्षणमेव ॥६५॥

पद्मेन ततो भणितो मा गृहाणैषा दुष्करा चर्या । भरतस्य वशे भूत्वा भुङ्ग्धि च त्वं महाभोगान् ॥६६॥

अतिवीर्येणा च भणितो दृष्टो राज्यस्याद्य परमार्थः । संसारभयोद्विग्नो गृह्णामीह देव ! प्रव्रज्याम् ॥६७॥

राज्ये विजयरथं स पुत्रं स्थापयित्वा विगतसुतस्नेहः । आचार्यपादमूलेऽतिवीर्यो गृह्णाति दीक्षाम् ॥६८॥

करोति तपो निसङ्गो यत्राऽस्तमितो जितेन्द्रियो धीरः । विहरति वसुंधरां स सिंह इव निर्भयः श्रमणः ॥६९॥

चारित्रज्ञानतपःसंयमशीलयुक्तः षष्ठाष्टमै नित्यं परिक्षीणदेहः ।
अरण्ये गुहासु वसतिं च करोति धीर एवंगुणो विमलज्ञानधरोऽतिवीर्यः ॥७०॥

॥ इति पद्मचरित्रेऽतिवीर्यनिष्क्रमणं नाम सप्तत्रिंशत्तम उद्देशः समाप्तः ॥

---

१. नयरिं-प्रत्य । २. गेण्हसु दुक्करं जईचरियं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३८. जियपउमावक्खाणं

अह एत्तो विजयरहो, [1]रइमाला नाम अत्तणो [2]बहिणी । सुरवहुसमाणरूवा[3], देइ च्चिय लच्छिनिलयस्स ॥१॥
तं इच्छिऊण कंता, विणिग्गया दो वि सीयसंजुत्ता । संपत्ता विजयपुरं, चिट्ठन्ति तहिं जहिच्छाए ॥२॥
अइविरियं पव्वइयं, सोऊणं नट्टियानिमित्तं च । सत्तुग्घयं हसन्तं, भरहो वारेइ मइकुसलो ॥३॥
धन्नो सो अइविरिओ, मा हससु कुमार ! मूढभावेणं । मोत्तूण विसयसुक्खं, जो जिणदिक्खं समणुपत्तो ॥४॥
जाव च्चिय एस कहा, वट्टइ तावाऽऽगओ सह बलेणं । पविसइ नरिन्दभवणं, विजयरहो पेच्छई भरहं ॥५॥
काऊण सिरपणामं, उवविट्ठो तस्स पायमूलम्मि । सम्माणलद्धपसरो, विजयरहो पत्थिवं भणइ ॥६॥
रइमालाए कणिट्ठा, नामेणं विजयसुन्दरी कन्ना । सा तुज्झ मए दिन्ना, कुणसु अविग्घेण कल्लाणं ॥७॥
तीए पाणिग्गहणं, भरहो काऊण परमरिद्धीए । अइविरियस्स सयासं, वच्चइ तुरएसु वेगेणं ॥८॥
संपत्तो नरवसभो, पेच्छइ गिरिकन्दरे समणसीहं । समसत्तु-बन्धुहियय, समसुह-दुक्खं भयविमुक्कं ॥९॥
पाएसु तस्स पडिओ, भरहो सामन्त-जणवयसमेओ । थोवन्तरे निविट्ठो, तस्स गुणुक्कित्तणं कुणइ ॥१०॥
नाह ! तुमं अइविरिओ, एक्को च्चिय एत्थ तिहुयणे सयले । जो निययरायरिद्धिं, अवहत्थेऊण पव्वइओ ॥११॥

# ३८. जितपद्माख्यानम्

अथेतो विजयरथो रतिमालां नामात्मनो भगिनीम् । सुरवधुसमानरूपां ददात्येव लक्ष्मीनिलायाय ॥१॥
तामिष्ट्वा कान्तां विनिर्गतौ द्वावपि सीतासंयुक्तौ । संप्राप्तौ विजयपुरं तिष्ठतस्तत्र यथेच्छया ॥२॥
अतिवीर्यं प्रव्रजितं श्रुत्वा नर्तिका निमित्तं च । शत्रुघ्नं हसन्तं भरतो वारयति मतिकुशलः ॥३॥
धन्यः सोऽतिवीर्यो मा हस कुमार ! मूढभावेन । मुक्त्वा विषयसुखं यो जिनदीक्षां समनुप्राप्तः ॥४॥
यानदेवैषा कथा वर्तते तावदागतः सह बलेन । प्रविशति नरेन्द्रभवनं विजयरथः पश्यति भरतम् ॥५॥
कृत्वा शिरः प्रणाममुपविष्टस्तस्य पादमूले । सन्मानलब्धप्रसरो विजयरथः पार्थिवं भणति ॥६॥
रतिमालया कनिष्ठा नाम्ना विजयसुन्दरीकन्या । सा तुभ्यं मया दत्ता कुर्वविघ्नेन कल्याणम् ॥७॥
तस्याः पाणिग्रहणं भरतः कृत्वा परमर्द्धया । अतिवीर्यस्य सकाशं गच्छति तुरगै र्वेगेन ॥८॥
संप्राप्तो नरवृषभः पश्यति गिरिकन्दरायां श्रमणसिंहम् । समशत्रुबन्धुहृदयं समसुखदुःखं भयविमुक्तम् ॥९॥
पादयोस्तस्य पतितो भरतः सामन्तजनपदसमेतः । स्तोकान्तरे निविष्टस्तस्य गुणकीर्तनं करोति ॥१०॥
नाथ ! त्वमतिवीर्य एकैवात्र त्रिभुवने सकले । यो निजराजर्द्धिमपहस्त्य प्रव्रजितः ॥११॥

१. रइमालं-प्रत्य० । २. बहिणिं-प्रत्य० । ३. रूवं-प्रत्य० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

माणुसजम्मस्स फलं, धीर ! तुमे पावियं निरवसेसं । तं खमसु मज्झ सुपुरिस !, जं दुच्चरियं कयं किंचि ॥१२॥
तं पणमिऊण समणं, भरहो पडियागओ पसंसन्तो । पविसरइ निययनयरिं, पुरजणअभिणन्दिओ मुइओ ॥१३॥
सो विजयसुन्दरीए, सहिओ रज्जं महागुणं भरहो । भुञ्जइ सुरो व्व सग्गे, पणमियसामन्तपावीढो ॥१४॥
गमिऊण किंचि कालं, विजयपुरे महिहरं भणइ रामो । हियइच्छियं पएसं, अवस्स अम्हेहि गन्तव्वं ॥१५॥
सोऊण गमणसज्जे, वणमाला लक्खणं भणइ मुद्धा । पूरेहि मज्झ सुपुरिस !, मणोरहा जे कया पुव्वं ॥१६॥
लच्छीहरो पवुत्तो, मा हु विसायस्स देहि अत्ताणं । काऊण अहिट्ठाणं, जाव अहं पडिनियत्तामि ॥१७॥
सम्मत्तवज्जियाणं, जा हवइ गई नराण ससिवयणे ! । तमहं वच्चेज्ज पिए !, जइ ! नाऽऽगच्छामि तुह पासं ॥१८॥
अम्हेहि रक्खियव्वं, वयणं तायस्स निच्छियमणेहिं । नवरं पुण गन्तूणं, तत्थ अवस्सं नियत्ते हं ॥१९॥
सो एवमाइएहिं, वयणसहस्सेहि तत्थ वणमालं । संथावेऊण गओ, सोमित्ती राघवसमीवं ॥२०॥
तत्तो ते सुत्तजणे, सीयाए समं विणिग्गया सणियं । अडविपहेण पयट्टा, भुञ्जन्ता तरुवरफलाइं ॥२१॥
तं वोलिऊण रण्णं, त्ता विसयस्स मज्झयारेऽत्थ । खेमञ्जलीपुरं ते, तत्थुज्जाणे सुहनिविट्ठा ॥२२॥
तं लक्खणमुवणीयं, आहारं भुञ्जिउं जहिच्छाए । समयं जणयसुयाए, चिट्ठइ य हलाउहो गामे ॥२३॥
अह लक्खणो अणुज्जं, मग्गेऊणं सहोयरं एत्तो । वरभवणसमाइण्णं, पविसइ खेमञ्जलीनयरं ॥२४॥
तत्थ सभावुल्लवियं, नरस्स सुणिऊण लक्खणो वयणं । को सहइ सत्तिपहरं, नरिन्दमुक्कं महिलियत्थे ? ॥२५॥

---

मनुष्यजन्मफलं धीर ! त्वया प्राप्तं निरवशेषम् । तं क्षमस्व मम सत्पुरुष ! यद्दुश्चरितं कृतं किंचित् ॥१२॥
तं प्रणम्य श्रमणं भरतः प्रत्यागतः प्रशंसनम् । प्रविशति निजनगरिं पुरजनाभिनन्दितो मुदितः ॥१३॥
स विजयसुन्दर्या सहितो राज्यं महागुणं भरतः । भुनक्ति सुर इव स्वर्गे प्रणतसामन्तपादपीठः ॥१४॥
गमयित्वा किञ्चित्कालं विजयपुरे महीधरं भणति रामः । हृदयेच्छितं प्रदेशमवश्यमस्माभिर्गन्तव्यम् ॥१५॥
श्रुत्वा गमनसज्जान्वनमाला लक्ष्मणं भणति मुग्धा । पूरय मम सत्पुरुष ! मनोरथान्यान् कृतान् पूर्वम् ॥१६॥
लक्ष्मीधरः प्रोक्तो मा खलु विषादस्य देह्यात्मानम् । कृत्वाधिष्ठानं यावदहं प्रतिनिवर्ते ॥१७॥
सम्यक्त्ववर्जितानां या भवति गति र्नराणां शशिवदने ! । तामहं व्रजेयं प्रिये ! यदि नाऽऽगच्छामि तव पार्श्वम् ॥१८॥
अस्माभी रक्षितव्यं वचनं तातस्य निश्चितमनोभिः । नवरं पुनर्गत्वा तत्रावश्यं निवर्तेऽहम् ॥१९॥
स एवमादिभिर्वचनसहस्रैस्तत्र वनमालाम् । संस्थाप्य गतः सौमित्री राघवसमीपम् ॥२०॥
ततस्तौ सुप्तजने सीतायाः समं विनिर्गतौ शनैः । अटवीपथेन प्रवृत्तौ भुञ्जानौ तरुवरफलानि ॥२१॥
तद्व्युत्क्रम्यऽरण्यं प्राप्ता विषयस्य मध्येऽत्र । क्षेमाञ्जलिपुरं ते तत्रोद्याने सुखनिविष्टाः ॥२२॥
तं लक्ष्मणोपनीतमाहारं भुक्त्वा यथेच्छया । समकं जनकसुतायास्तिष्ठति च हलायुधो ग्रामे ॥२३॥
अथ लक्ष्मणोऽनुज्ञां मार्गयित्वा सहोदरमितः । वरभवनसमाकीर्णं प्रविशति क्षेमाञ्जलिनगरम् ॥२४॥
तत्र स्वभावोल्लपितं नरस्य श्रुत्वा लक्ष्मणो वचनम् । कः सहते शक्तिप्रहारं नरेन्द्रमुक्तं महिलार्थे ? ॥२५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोऊण वयणमेयं, पुच्छइ लच्छीहरो तयं पुरिसं। को वि हु देइ पहारं ?, का सत्ती ? का व सा महिला ? ॥२६॥**

**सो भणइ सत्तुदमणो, राया भज्जा य तस्स कणयाभा। जियपउमा वि य धूया, विसकन्ना सा इहं नयरे ॥२७॥**

**जो सहइ सत्तिपहरं, इमस्स रायस्स कढिणकरमुक्कं। [1]तस्सेसा जियपउमा, देइ च्चिय किं तुमे न सुयं ? ॥२८॥**

**सोऊण तं सरोसो, विम्हियहियओ य लक्खणो तुरियं। पविसइ नरिन्दभवणं, तीए कए पवरकन्नाए ॥२९॥**

**इन्दीवरघणसामं, जियसत्तू पेच्छिऊण सिरिनिलयं। भणइ य उवणेह लहुं, एयस्स वरासणं एत्तो ॥३०॥**

**भणिओ य नरवईणं, कत्थ तुमं आगओ सि ? किं नामं ?। केणेव कारणेणं, भमसि महिं जेण एगागी ? ॥३१॥**

**भरहस्स अहं दूओ, पत्तो हं एत्थ कारणवसेणं। तुह दुहियमाणभङ्गं, करेमि गव्वं वहन्तीए ॥३२॥**

**जो मज्झ सत्तिपहरं, सहइ नरो गाढकरयलविमुक्कं। सो नवरि माणभङ्गं, कुणइ य नत्थेत्थ संदेहो ॥३३॥**

**भणइ तओ लच्छिहरो, एक्काए किं व मज्झ सत्तीए ?। मुञ्चसु पञ्च नराहिव !, सत्तीओ मा चिरावेहि ॥३४॥**

**वट्टइ जावुल्लाओ, ताव गवक्खन्तरेण जियपउमा। अह पुरिसवेसिणी तं, मोत्तूण निएइ लच्छिहरं ॥३५॥**

**रइऊण अञ्जलिपुडं, कुणइ पणामं पसन्नहियया सा। सन्नाए लक्खणो च्चिय, भणइ भयं मुञ्च पसयच्छि ! ॥३६॥**

**लच्छीहरेण भणिओ, किं पडिवालेसि अज्ज वि थिरत्तं ?।**
**मुञ्चसु अरिदमण ! तुमं, मह सत्ती विउलवच्छयले ॥३७॥**

**एवभणिओ नरिन्दो, रुट्ठो आबन्धिऊण परिवेढं। जलियाणलसंकासं, उग्गिरइ तओ महासत्तिं ॥ ३८॥**

---

श्रुत्वा वचनमेतत्पृच्छति लक्ष्मीधरस्तं पुरुषम्। कोऽपि खलु ददाति प्रहारं ? का शक्तिः ? का वा सा महिला ? ॥२६॥

स भणति शत्रुदमनो राजा भार्या च तस्य कनकाभा। जितपद्माऽपि दुहिता विषकन्या सेहं नगरे ॥२७॥

यः सहते शक्तिप्रहारमेतस्य राज्ञः कठिनकरमुक्तम्। तस्मा एषा जितपद्मा ददात्येव किं त्वया न श्रुतम् ? ॥२८॥

श्रुत्वा तं सरोषो विस्मितहृदयश्च लक्ष्मणस्त्वरितम्। प्रविशति नरेन्द्रभवनं तस्याः कृते प्रवरकन्यायाः ॥२९॥

इन्दीवरघनश्यामं जितशत्रु दृष्ट्वा श्रीनिलयम्। भणति चोपानयत लघ्वेतस्य वरासनमितः ॥३०॥

भणितश्च नरपतिना कुतस्त्वमागतोऽसि ? किं नाम ?। केनैव कारणेन भ्रमसि महीं येनैकाकी ? ॥३१॥

भरतस्याहं दूतः प्राप्तोऽहमत्र कारणवशेन। तव दुहितृमानभङ्गं करोमि गर्वं वहन्त्याः ॥३२॥

यो मम शक्तिप्रहारं सहते नरो गाढकरतलविमुक्तम्। स नवरि मानभङ्गं करोति च नास्त्यत्र संदेहः ॥३३॥

भणति ततो लक्ष्मीधर एकया किं वा मम शक्त्या ?। मुञ्च पञ्च नराधिप ! शक्तयो मा चिरय ॥३४॥

वर्तते यावदुल्लापस्तावद्गवाक्षान्तरेण जितपद्मा। अथ पुरुषद्वेषिणी तं मुक्त्वा पश्यति लक्ष्मीधरम् ॥३५॥

रचयित्वाऽञ्जलिपूटं करोति प्रणामं प्रसन्नहृदया सा। सञ्ज्ञया लक्ष्मण एवं भणति भयं मुञ्च प्रसन्नाक्षि ! ॥३६॥

लक्ष्मीधरेण भणितः किं प्रतिपालयस्यद्यापि स्थिरत्वम् ?। मुञ्चारिदमन ! त्वं मम शक्तिं विपुलवक्षःस्थले ॥३७॥

एवं भणितो नरेन्द्रो रुष्ट आबध्य परिवेष्टम्। ज्वलितानलसंकाशामुद्गीरति ततो महाशक्तिम् ॥३८॥

---

१. तस्सेयं जियपउमं-प्रत्य०।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रइऊण य वइसाहं, ठाणं सत्तुंदमो मुयइ सत्तिं । दाहिणकरेण सो वि य, गेण्हइ एंती अयत्तेणं ॥३९॥

वामकरेण य बीयं, धरेइ कक्खन्तरेण दो अन्ना । सोहइ चउदन्तसमो, सरिसो एरावणो चेव ॥४०॥

संकुद्धाभोगिसमा, संपत्ता पञ्चमा महासत्ती । दसणेहिं सा वि गेण्हइ, मासं पिव सीहसरभेणं ॥४१॥

ततो गयणयलत्था, देवा मुञ्चन्ति कुसुमवरवासं । जयसद्दं कुणमाणा, पहणन्ति य दुन्दुही अन्ने ॥४२॥

भणिओ य लक्खणेणं, अरिदमण ! पडिच्छ सत्तिपहरं मे । सुणिऊण वयणमेयं, भीओ राया सह जणेणं ॥४३॥

तत्तो सा जियपउमा, अवट्ठिया लक्खणस्स पासम्मि । सोहइ सुराहिवस्स व, देवी दिव्वेण रूवेणं ॥४४॥

सुहडाण जणवयस्स य, पुरओ सत्तुंदमस्स कन्नाए । सुन्दररूवावयवो, सयंवरो लक्खणो गहिओ ॥४५॥

भणइ विणओणङ्गो, सोमित्ती नरवई ! खमेज्जासु । जं किंचि वि दुच्चरियं, माम ! तुमं ववसियं अम्हे ॥४६॥

सत्तुदमणो वि एवं, तं खामेऊण महुरवयणेहिं । भणइ य वरकल्लाणं, कुणसु इहं मज्झ धूयाए ॥४७॥

भणइय सोमित्ती, तओ मह जेट्ठो चिट्ठई वरुज्जाणे । सो जाणइ परमत्थं, तं पुच्छसु नरवई गन्तुं ॥४८॥

आरुहिऊण रहवरं, जियपउमा लक्खणेण समसहिया । पउमस्स सन्निगासे, राया य गओ समन्तिजणो ॥४९॥

जियपउमाए समाणं, सोमित्ती रहवराउ ओयरिउं । नमिऊण रामदेवं, सीयासहियं चिय निविट्ठो ॥५०॥

सत्तुदमणो वि राया, परियण-सामन्त-बन्धुजणसहिओ । पउमस्स चलणजुयलं, पणमिय तत्थेव उवविट्ठो ॥५१॥

---

रचयित्वा च वैशाखं स्थानं शत्रुंदमो मुञ्चति शक्तिम् । दक्षिणकरेण सोऽपि च गृह्णाति आयान्तीमयत्नेन ॥३९॥

वामकरेण च द्वितीयां धारयति कक्षान्तरेण द्वे अन्ये । शोभते चतुर्दन्तसमः सदृश ऐरावण इव ॥४०॥

संक्रुद्धा भोगिसमा संप्राप्ता पञ्चमा महाशक्तिः । दशनैः साऽपि गृह्णाति मांसमिव सिंह-शरभयोः ॥४१॥

ततो गगनतलस्था देवा मुञ्चन्ति कुसुमवरवासम् । जयशब्दं क्रियमाणाः प्रघ्नन्ति च दुन्दुभिरन्ये ॥४२॥

भणितश्च लक्ष्मणेनारिदमन ! प्रतीच्छ शक्तिप्रहरं मे । श्रुत्वा वचनमेतद्भीतो राजा सहजनेन ॥४३॥

ततः सा जितपद्माऽवस्थिता लक्ष्मणस्य पार्श्वे । शोभते सुराधिपस्येव देवी दिव्येन रुपेण ॥४४॥

सुभटानां जनपदस्य च पुरतः शत्रुंदमस्य कन्यया । सुन्दररुपावयवः स्वयंवरो लक्ष्मणो गृहीतः ॥४५॥

भणति विनयावनताङ्गः सौमित्रि र्नरपते ! क्षमस्व । यत्किञ्चिदपि दुश्चरितं माम् ! तव व्यवसितमस्माभिः ॥४६॥

शत्रुदमनोऽप्येवं तं क्षान्त्वा मधुरवचनैः । भवति च वरकल्याणं कुर्विह मम दुहितुः ॥४७॥

भणति च सौमित्रि स्ततो मम ज्येष्टस्तिष्ठति वरोद्याने । स जानाति परमार्थं तं पृच्छ नरपते ! गत्वा ॥४८॥

आरुह्य रथवरं जितपद्मा लक्ष्मणेन समसहिता । पद्मस्य समीपं राजा च गतः समन्त्रिजनः ॥४९॥

जितपद्मायाः समानं सौमित्री रथवरादवतीर्य । नत्वा रामदेवं सीतासहितमेव निविष्टः ॥५०॥

शत्रुदमनोऽपि राजा परिजनसामन्तबन्धुजनसहितः । पद्मस्य चरणयुगलं प्रणम्य तत्रैवोपविष्टः ॥५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्थऽच्छिउं खणेक्कं, परिपुच्छेऊण देहकुसलाई । पउमो सीयाए समं, पवेसिओ राइणा नयरं ॥५२॥

जणिओ य [1]महाणन्दो, नरवइणा हट्ठ-तुट्ठमणसेणं । तूरसहस्ससमाहय-नच्चन्तजणेण अइरम्भो ॥५३॥

तत्थऽच्छिऊण कालं, केत्तियमेत्तं पि भोगदुल्ललिया । काऊण संपहारं, गमणेक्कमणा वरकुमारा॥५४॥

जियपउमा विरहाणल-भीया दट्ठूण भणइ सोमित्ति । आसासिउं पयट्टो, जह वणमाला तहा सा वि ॥५५॥

सीया-लक्खणसहिओ, पउमो नगराउ निग्गओ रत्तिं । [2]दाऊण अद्धिइं सो, सव्वस्स वि नयरलोयस्स ॥५६॥

परभवसुकएणं ते महासत्तिमन्ता, जइ वि विहरमाणा जन्ति अन्नन्नदेसं ।

तह वि समणुहोन्ती सोक्ख-सम्माण-दाणं, जणियविमलकित्ती राम-सोमित्तिपुत्ता ॥५७॥

॥ इय पउमचरिए जियपउमावक्खाणं नाम अट्ठतीसइमं पव्वं समत्तं ॥

---

तत्रासित्वाक्षणमेकं परिपृच्छ्य देहकुशलादीन् । पद्मः सीतायाः समं प्रवेशितो राज्ञा नगरम् ॥५२॥

जनितश्च महानन्दो नरपतिना हृष्टतुष्टमनसा । तूर्यसहस्रसमाहतनृत्यज्जनेनातिरम्यः ॥५३॥

तत्रासित्वा कालं केचिन्मात्रमपि भोगदुर्ललितौ । कृत्वा सम्प्रहारं गमनैकमनसौ वरकुमारौ ॥५४॥

जितपद्मां विरहानलभीतां दृष्ट्वा भणति सौमित्रिः । आश्वसितुं प्रवृत्तो यथा वनमाला तथा साऽपि ॥५५॥

सीता-लक्ष्मणसहितः पद्मो नगरान्निर्गतो रात्रिम् । दत्वाऽधृतिं स सर्वस्यापि नगरलोकस्य ॥५६॥

परभवसुकृतेन तौ महाशक्तिमन्तौ यद्यपि विहरन्तौ यातोऽन्योन्यदेशम् ।

तथापि समनुभवतः सुखसन्मानदानं जनितविमलकीर्ती राम-सोमित्रिपुत्रौ ॥५७॥

॥ इति पद्मचरित्रे जितपद्मोपाख्यानं नामाष्टात्रिंशत्तम उद्देशः समाप्तः ॥

---

१. महाविवाहः । २. दाऊणं अधिइं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ३९. देसभूसण-कुलभूसणवक्खाणं

अह से बहुविहतरुवर-वल्लि-लयाकुसुमगन्धरिद्धिल्लं। वच्चन्ति दसरहसुया, लीलायन्ता महाअडविं ॥१॥

देवोवणीयभोगा, सरीरउवगरणजणियमाहप्पा। धणुरयणगहियहत्था, सीहा इव निब्भया धीरा ॥२॥

कत्थइ जलहरसामा, कत्थइ गिरिधाउविद्दुमावयवा। कत्थइ कुसुमभरेणं, धवलवलायच्छविं वहइ ॥३॥

एवं कमेण अडविं, वोलेंताणं च तत्थ संपत्ता। वंसइरिसन्नियासं, नयरं वंसत्थलं नामं ॥४॥

ताव च्चिय नयरजणो, आगच्छइ अभिमुहो अइबहुत्तो। अन्नोन्नतुरियवेगो, दिट्ठो सहसा पलायन्तो ॥५॥

तो राघवेण एक्को, पुरिसो परिच्छिओ इमो लोगो। कस्स भएण पलायइ ?, एयं साहेहि मे सिग्घं ॥६॥

सो भणइ अज्ज दिवसो, तइओवट्टइ इमम्मि गिरिसिहरे। निसुणिज्जइ अइघोरो, सद्दो लोगस्स भयजणणो ॥७॥

जइ कोइ अज्ज रत्तिं, एहिइ अम्हं वहुज्जयमईओ। तस्स भएण पलायइ, एस जणो नरवइसमग्गो ॥८॥

सुणिऊण वयणमेयं, जणयसुया भणइ राघवं एवं। अम्हे वि पलायामो, जत्थ इमो जाइ नयरजणो ॥९॥

भणिया य राघवेणं, सुन्दरि ! किं सुपुरिसा पलायन्ति ?। मरणन्तिए वि कज्जे, आवडिए अहिमुहा होन्ति ॥१०॥

एवं वारिज्जन्तो, पउमो सोमित्तिणा समं चलिओ। वंसइरिस्स अभिमुहो, जणयसुयं मग्गओ ठविउं ॥११॥

---

## ३९. देशभूषण-कुलभूषणव्याख्यानम्

अथ तौ बहुविधतरुवरवल्लिलताकुसुमगन्धर्द्धिवतीम्। गच्छतो दशरथसुतौ लीलायन्तौ महाटवीम् ॥१॥

देवोपनीतभोगौ शरीरोपकरणजनितमाहात्म्यौ। धनूरत्नगृहीतहस्तौ सिंहाविव निर्भयौ धीरौ ॥२॥

कुत्रचिज्जलधरश्यामां कुत्रचिद्गिरिधातुविद्रुमावयवाम्। कुत्रचित्कुसुमभारेण धवलातपत्रच्छविं वहति ॥३॥

एवं क्रमेणाटवीं विलङ्घतोश्च तत्र संप्राप्तौ। वंशगिरिसंनिकाशे नगरं वंशस्थलं नाम ॥४॥

तावदेव नगरजन आगच्छत्यभिमुखोऽतिबहुत्वः। अन्योन्यत्वरितवेगोदृष्टः सहसा पलायमानः ॥५॥

तदा राघवेनैकः पुरुषः परिपृष्टोऽयं लोकः। कस्य भयेन पलायते ? एतत्कथय मे शीघ्रम् ॥६॥

स भणत्यद्य दिवसस्तृतीयो वर्ततेऽस्मिन्गिरिशिखरे। निश्रूयतेऽतिघोरः शब्दो लोकस्य भयजननः ॥७॥

यदि कोऽप्यद्य रात्रिमैष्यत्यस्माकं वधोद्यतमतिः। तस्य भयेन पलायते एव जनो नरपतिसमग्रः ॥८॥

श्रुत्वा वचनमेतज्जनकसुता भणति राघवमेवम्। वयमपि पलायामहे यत्रायं याति नगरजनः ॥९॥

भणिता च राघवेन सुन्दरि ! किं सत्पुरुषाः पलायन्ते ?। मरणान्तिकेऽपि कार्य आपत्तितेऽभिमुखा भवन्ति ॥१०॥

एवं वार्यमाणः पद्मः सौमित्रिणा समं चलितः। वंशगिरेरभिमुखो जनकसुतां मार्गतः स्थापयित्वा ॥११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आरुहिऊण पवत्ता, विसमसिला-सिहर-निज्झराइण्णं । गयणयलमणुलिहन्तं, वंसगिरिं गहग[1]णासन्नं ॥१२॥

हत्थावलम्बियकरा, कत्थइ विसमे भुयासु उक्खिविउं । कहकह वि पव्वयवरं, रामेणं विलइया सीया ॥१३॥

ते तत्थ गिरिवरोवरि, नवरं पेच्छन्ति दोण्णि मुणिवसभे । लम्बियकरग्गजुयले, झाणोवगए विगयमोहे ॥१४॥

जणतणयाए सहिया, दोण्णि वि गन्तूण सव्वभावेणं । सीसकयञ्जलिमउला, अवट्ठिया ताण आसन्ने ॥१५॥

ताव य पेच्छन्ति बहू, समन्तओ भमरकज्जलसवण्णे । नागे उत्तासणए, घोररवं चेव कुणमाणे ॥१६॥

नाणावण्णेहि य विञ्छिएहिं तह घोणसेहि घोरेहिं । परिवेढिया मुणी ते, पलोइया दसरहसुएहिं ॥१७॥

धणुवग्गेहि विहडिउं, विञ्छिय नागे य सव्वओ दूरं । जाया लक्खणपउमा, पसन्नहियया तओ दो वि ॥१८॥

पक्खालिऊण रामो, निज्झरसलिलेण साहुचलणजुए । लक्खणसमप्पिएहिं, अच्चेइ य वल्लिकुसुमेहिं ॥१९॥

सत्तिसरिसं च एत्तो, कुणन्ति मुणिवन्दणं परमतुट्ठा । जणयतणयए समयं, हलहर-नारायणा दो वि ॥२०॥

[2]वीणा मणोहरसरा, पउमो घेत्तूण वायई विहिणा । साहुगुणसंपउत्तं, गायइ गेयं च बहुभेयं ॥२१॥

भावेण जणयतणया, मुणिपुरओ नच्चिउं समाढत्ता । लीला-विलास-अभिणय, दावेन्ती चलचलन्तोरू ॥२२॥

ताव च्चिय अत्थाओ, मइलेन्तो अम्बरं दिवसनाहो । उवसग्गस्स व भीओ, किरणबलेणं समं नट्ठो ॥२३॥

सहसा समोत्थयं चिय, गयणयलं भूयसयसहस्सेसु । दाढा संघट्टुट्ठिय-हुयवहजालं मुयन्तेसु ॥२४॥

---

आरोढुं प्रवृत्तौ विषमशीलाशिखरनिर्झराकीर्णम् । गगनतलमनुलिहन्तं वंशगिरिं ग्रहगणासन्नम् ॥१२॥

हस्तावलम्बितकरा कुत्रचिद्विषमे भुजाभ्यामुत्क्षेप्य । कथंकथमपि पर्वतवरं रामेण विलग्ना सीता ॥१३॥

ते तत्र गिरिवरोपरि नवरं पश्यन्ति द्वौ मुनिवृषभौ । लम्बितकराग्रयुगलौ ध्यानोपगतौ विगतमोहौ ॥१४॥

जनकतनयया सहितौ द्वावपि गत्वा सर्वभावेण । शीर्षकृताञ्जलिमुकुटावस्थितौ तयोरासन्ने ॥१५॥

तावच्च पश्यन्ति बहून् समन्ततो भ्रमरकज्जलसवर्णान् । नागानुत्त्रासनान्घोररवमेव क्रियमाणान् ॥१६॥

नानावर्णैश्चवृश्चिकैस्तथा गोनसैः घोरैः । परिवेष्टितौ मुनी तौ प्रलोकितौ दशरथसुताभ्याम् ॥१७॥

धनुवर्गै विघट्य वृश्चिकान्नागांश्च सर्वतो दूरम् । ज्ञातौ लक्ष्मणपद्मौ प्रसन्नहृदयौ ततो द्वावपि ॥१८॥

प्रक्षाल्य रामो निर्झरसलिलेन साधुचरणयुगान् । लक्ष्मणसमर्पितैरर्चयति च वरकुसुमैः ॥१९॥

शक्तिरसदृशं चेतः कुरुतो मुनिवन्दनं परमतुष्टौ । जनकतनयया समं हलधर-नारायणौ द्वावपि ॥२०॥

वीणा मनोहरस्वरा पद्मो गृहीत्वा वादयति विधिना । साधुगुणसंप्रयुक्तं गायति गेयं च बहुभेदम् ॥२१॥

भावेन जनकतनया मुनिपुरतो नर्तितुं समारब्धा । लीलाविलासाभिनयं दर्शयन्ती चलचलदुरुः ॥२२॥

तावच्चैवास्तो मलिनयन्नम्बरं दिवसनाथः । उपसर्गादिव भीतः किरणबलेन समं नष्टः ॥२३॥

सहसा समवस्तीर्णमेव गगनतलं भूतशतसहस्रैः । दंष्ट्रासंघट्टोत्थितहुतवहज्वालां मुञ्चद्भिः ॥२४॥

---

१. गणाइन्नं-प्रत्य० । २. वीणं मणोहरसरं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुञ्चन्ति सिर-कलेवर-जङ्घाई बहुविहाइं अङ्गाइं । घणविन्दुरुहिरवासं, वासन्ति य तडतडारावं ॥२५॥

केई तिसूलहत्था, अन्ने असि-कणय-तोमरकरग्गा । मुक्कट्टहासभीसण-संखोभियदसदिसायक्का ॥२६॥

गय-वग्घ-सीह-चित्तय-सिवामुहुज्जलियभीसणायारा । अह खोभिउं पवत्ता, भूया समणे समियपावे ॥२७॥

आलोइऊण सीया, अणेयवेयाल-भूयसंघट्टं । नच्चणविहिं पमोत्तुं, भीयारामं समल्लीणा ॥२८॥

भणिया य राधवेणं, चिट्ठसु भद्दे ! मुणीण पामूले । अहयं पुण उवसग्गं, लक्खणसहिओ पणासेमि ॥२९॥

घेत्तूण धणुवराइं, दोहि वि अप्फालियाइं अइगाढं । सद्देण तेण सेलो, नज्जइ आकम्पिओ सयलो ॥३०॥

अह सो जोइसवासी, देवो अणलप्पभो त्ति नामेणं । अवहिविसएण जाणइ, हलहर-नारायणा एए ॥३१॥

मायाविगुव्वियं तं, उवसग्गं मुणिवराण अवहरिउं । वच्चइ नियविमाणं, गयणं पि सुनिम्मलं जायं ॥३२॥

जणिए य पाडिहेरे, हलहर-नारायणेहि साहूणं । कम्मस्स खयवसेणं, उप्पन्नं केवलन्नाणं ॥३३॥

तत्तो य चउनिकाया, समागया सुरगणा नरगणा य । थोऊण समणसीहे, जहाविहं चेव उवविट्ठा ॥३४॥

काऊण केवलीणं, [1]पूया नमिऊण सव्वभावेणं । सीयाए दो वि पासे, उवविट्ठा राम-सोमित्ती ॥३५॥

तो सुरगणाण मज्झे, पउमो पुच्छि महामुणी एत्तो । अज्ज निसासुवसग्गो, केणकओ भे अपुण्णेणं ? ॥३६॥

अह साहिउं पवत्तो, केवलनाणी परब्भवसमूहं । अत्थि च्चिय विक्खाया, नयरी वि हु पउमिणी नामं ॥३७॥

---

मुञ्चन्ति शिरः कलेवर-जङ्घानि बहुविधान्यङ्गानि । घनबिन्दुरुधिरवर्षा वर्षन्ति च तडतडारावम् ॥२५॥

केऽपि त्रिशूलहस्ता, अन्येऽसि-कनकतोमरकराग्राः । मुक्ताट्टहास्यभीषणसंक्षोभितदशदिक्चक्राः ॥२६॥

गज-व्याघ्र-सिंह-चित्रक-शिवामुखोज्ज्वलितभीषणाकाराः । अथ क्षोभयितुं प्रवृत्ता भूताः श्रमणौ समितपापौ ॥२७॥

अवलोक्य सीताऽनेक वैतालभूतसंघट्टम् । नृत्यविधिं प्रमुच्य भीता रामं समालीना ॥२८॥

भणिता च राघवेन तिष्ठ भद्रे ! मुनीनां पादमूले । अहं पुनरुपसर्गं लक्ष्मणसहितः प्रणश्यामि ॥२९॥

गृहीत्वा धनुर्वराणि द्वाभ्याम्प्यास्फालितान्यतिगाढम् । शब्देन तेन शैलो ज्ञायत आकम्पितः सकलः ॥३०॥

अथ स ज्योतिषवासी देवोऽनलप्रभ इति नाम्ना । अवधिविषयेन जानाति हलधर-नारायणावेतौ ॥३१॥

मायाविकुर्वितं तमुपसर्गं मुनिवराणामपहृत्य । गच्छति निजविमानं गगनमपि सुनिर्मलं जातम् ॥३२॥

जनिते च प्रातिहार्ये हलधर-नारायणाभ्यां साधुनाम् । कर्म क्षयवशेनोत्पन्नं केवलज्ञानम् ॥३३॥

ततश्च चतुर्निकायाः समागताः सुरगणा नरगणाश्च । स्तुत्वा श्रमणसिंहान्यथाविधमेवोपविष्टः ॥३४॥

कृत्वा केवलीनां पूजा नत्वा सर्वभावेण । सीताया द्वावपि पार्श्वे उपविष्टौ रामसौमित्री ॥३५॥

ततः सुरगणानां मध्ये पद्मः पृच्छति महामुनिमितः । अद्य निशायामुपसर्गः केन कृतो भेऽपुण्येन ? ॥३६॥

अथ कथयितुं प्रवृत्तः केवलज्ञानी परभवसमूहम् । अस्त्येव विख्याता नगर्यपि खलु पद्मिनी नाम ॥३७॥

---

१. पूयं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तं भुञ्जइ वरनयरिं, नराहिवो विजयपव्वओ नामं । सुरवहुसमाणरूवा, महिला वि य धारिणी तस्स ॥३८॥
तत्थेव वसइ दूओ, अमयसरो विविहसत्थमइकुसलो । उवओगा से घरिणी, तीए दो सुन्दरा पुत्ता ॥३९॥
उदिओ त्थ हवइ एक्को, बिइओ मुइओ त्ति नाम नामेणं । सो नरवईण दूओ, पवेसिओ [1]दूयकज्जेणं ॥४०॥
वसुभूईण समाणं, मित्तेणं कवडपीइपमुहेणं । वच्चइ परविसयं सो, अणुदियहं देहसोक्खेणं ॥४१॥
विप्पो वि य वसुभूई, आसत्तो तस्स महिलियाए समं । दूयं हन्तूण तओ, रयणीसु छलेण विणियत्तो ॥४२॥
साहेइ य वसुभूई, जणस्स विणियत्तिओ अहं तेणं । दूयघरिणीए समयं, कुणइ य सो दुट्ठमन्तणयं ॥४३॥
उवओगा भणइ तओ, एए हन्तूण दो वि पुत्ते हं । भुञ्जामि तुमे समयं, भोगं निक्कण्टयं सुइरं ॥४४॥
तं बम्भणीए सव्वं, रइए वसुभूइमहिलियाए उ । ईसालुणीए सिट्ठं, उइयस्स य जं जहावत्तं ॥४५॥
तो रोसवसगएणं, उदिएणं असिवरेण तिक्खेणं । सो मारिओ कुविप्पो, मेच्छो पल्लिम्मि उप्पन्नो ॥४६॥
अह अन्नया कयाई, चाउव्वण्णेण समणसङ्घेणं । मइवद्धणो सुसाहू, समागओ पउमिणिं नयरिं ॥४७॥
आसि तया विक्खाया, अणुद्धरा नाम सयलगणपाली । धम्मज्झाणोवगया, वच्छल्लपभाणुज्जुत्ता ॥४८॥
सो समणसङ्घसहिओ, साहू मइवद्धणो वरुज्जाणे । उवविट्ठो गणजेट्ठो, तसपाणविवज्जिउद्देसे ॥४९॥
उज्जाणवालएणं, सिट्ठं गन्तूण नरवरिन्दस्स । सामिय वसन्ततिलए, उज्जाणे आगया समणा ॥५०॥

---

तां भुनक्ति वरनयरिं नराधिपो विजयपर्वतो नाम । सुरवधुसमानरूपा महिलापि धारिणी तस्य ॥३८॥
तत्रैव वसति दूतोऽमृतस्वरो विविधशास्त्र-मतिकुशलः । उपयोगा तस्य गृहिणी तस्या द्वौ सुन्दरौ पुत्रौ ॥३९॥
उदितोऽथ भवत्येको द्वितीयो मुदित इति नाम नाम्ना । स नरपतिना दूतः प्रेषितो दूतकार्येण ॥४०॥
वसुभूतिना समानं मित्रेण कपटप्रीतिमुखेन । व्रजति परविषयं सोऽनुदिवसं देहसुखेन ॥४१॥
विप्रोऽपि च वसुभूतिरासक्तस्तस्य महिलायाः समम् । दूतं हत्वा ततो रजन्यां छलेन विनिवृत्तः ॥४२॥
कथयति च वसुभूति र्जनस्य विनिवर्त्तितोऽहं तेन । दूतगृहिण्या समकं करोति च स दुष्टमन्त्रणाम् ॥४३॥
उपयोगा भणति तत एतौ हत्वा द्वावपि पुत्रावहम् । भुनज्मि त्वया समं भोगं निष्कण्टकं सुचिरम् ॥४४॥
तद्ब्राह्मण्या सर्वं रचिते तु वसुभूतिमहिलया तु । ईर्ष्यालुन्या शिष्टमुदितस्य च यद्यथावृत्तम् ॥४५॥
तदा रोषवशगतेनोदितेनासिवरेण तीक्ष्णेन । स मारितः कुविप्रो म्लेच्छः पल्यामुत्पन्नः ॥४६॥
अथान्यदा कदाचिच्चातुर्वर्णेन श्रमणसङ्घेन । मतिवर्धनः सुसाधुः समागतः पद्मिनीं नगरीम् ॥४७॥
आसीत्तदा विख्यातानुद्धरा नाम सकलगणपालिनी । धर्मध्यानोपगता वात्सल्यभावनोद्योता ॥४८॥
स श्रमणसङ्घसहितः साधु र्मतिवर्द्धनो वरोद्याने । उपविष्टो गणज्येष्ठस्त्रस-प्राणविवर्जितोद्देशे ॥४९॥
उद्यानपालकेन शिष्टं गत्वा नरवरेन्द्रस्य । स्वामिन् ! वसन्ततिलक उद्यान आगताः श्रमणाः ॥५०॥

---

1. नियमकज्जेणं-प्रत्य० ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऊण वयणमेयं, नराहिवो विजयपव्वओ गन्तुं । मइवद्धणाईए, पणमइ समणे समियपावे ॥५१॥
नमिऊण मुणिवरिन्दं, जंपइ भोगेसु मज्झ अहिलासो । भयवं ! साहवचरियं, असमत्थो धारिउं अहयं ॥५२॥
भणइ मुणी मुणियत्थो, नरवइ ! जा एस भोगतण्हा ते । भवसयसहस्सजणणी, संसारनिबन्धणकरी य ॥५३॥
गयकण्णतालसरिसं, विज्जुलयाचञ्चलं हवइ जीयं । सुमिणसमा होन्ति इमे, बन्धुसिणेहा य भोगा य ॥५४॥
खणभङ्गुरे सरीरे, का एत्थ रई सभावदुग्गन्धे । नरयसरिच्छे घोरे, दुगुञ्छिए किमिकुलावासे ॥५५॥
वस-कलल-सेम्भ-सोणिय-मुत्तासुइकद्दमे मलसभावे । वसिण गब्भवासे, पुणरवि तं चेव अहिलससि ॥५६॥
एवंविहम्मि देहे, जे पुरिसा विसयरागमणुरत्ता । ते दुहसहस्सपउरे, घोरे हिण्डन्ति संसारे ॥५७॥
एवं चिय मणहत्थिं, वच्चन्तं विसयसंकडपहेसु । वेरग्गबलसमग्गो, धरेहि नाणङ्कुसेण तुमं ॥५८॥
पणमसु जिणं नराहिव, भत्तिं काऊण वज्जिय [1]कुदिट्ठी । संसारसलिलनाहं, जेण अविग्घेण उत्तरसि ॥५९॥
मोहारिमहासेन्नं, हन्तूणं संजमासिणा सिग्घं । अज्झासिय सिद्धिपुरं, करेह रज्जं भयविमुक्कं ॥६०॥
जं एव मुणिवरेणं, भणिओ च्चिय विजयपव्वओ राया । संवेगसमावन्नो, मुणिस्स पासम्मि निक्खन्तो ॥६१॥
ते वि तहिं जिणविहियं, नाणं सोऊण भायरो दो वि । वेरग्गजणियकरुणा, समणत्तं जाव पडिवन्ना ॥६२॥
सम्मेयपव्वयं ते, वन्दणहेउम्मि तत्थ वच्चन्ता । मग्गाओ पब्भट्ठा, इसिणडपल्लिं समणुपत्ता ॥६३॥

---

श्रुत्वा वचनमेतन्नराधिपो विजयपर्वतो गत्वा । मतिवर्धनादिकान् प्रणमति श्रमणान्समितपापान् ॥५१॥
नत्वा मुनिवरेन्द्रं जल्पति भोगेषु ममाभिलाषः । भगवन् ! साधुचर्यामसमर्थो धर्तुमहम् ॥५२॥
भणति मुनि र्मुणितार्थो नरपते ! यैषा भोगतृषणा ते । भवशतसहस्रजननी संसारनिबन्धनकरी च ॥५३॥
गजकर्णतालसदृशं विद्युल्लताचञ्चलं भवति जीवितम् । स्वप्नसमा भवन्तीमे बन्धुस्नेहाश्च भोगाश्च ॥५४॥
क्षणभङ्गुरे शरीरे कात्र रतिः स्वभावदुर्गन्धे । नरकसदृशे घोरे जुगुप्सिते कृमिकुलावासे ॥५५॥
वशा-कलल-श्लेष्म-शोणित-मूत्राशुचिकर्दमे मलस्वभावे । उषित्वा गर्भावासे पुनरपि तदेवाभिलषसि ॥५६॥
एवंविधे देहे ये पुरुषा विषयरागमनुरक्ताः । ते दुःखसहस्रप्रचूरे घोरे हिण्डन्ते संसारे ॥५७॥
एवमेव मनोहस्तिनं व्रजन्तं विषयसंकटपथेषु । वैराग्यबलसमग्रो धारय नानाङ्कुशेन त्वम् ॥५८॥
प्रणम जिनं नराधिप ! भक्तिं कृत्वा वर्जितः कुदृष्टिः । संसारसलिलनाथं येनाविघ्नेनोत्तरषि ॥५९॥
मोहारिमहासैन्यं हत्वा संयमासिना शीघ्रम् । अध्यास्य सिद्धिपुरं कुरुत राज्यं भयविमुक्तम् ॥६०॥
यदेवं मुनिवरेण भणितश्चैव विजयपर्वतो राजा । संवेगसमापन्नो मुनेः पार्श्वे निष्क्रान्तः ॥६१॥
तावपि तत्र जिनविहितं ज्ञानं श्रुत्वा भ्रातरौ द्वावपि । वैराग्यजनितकारुण्यौ श्रमणत्वं यावत्प्रतिपन्नौ ॥६२॥
---

१. होह महं दुक्ख०-प्रत्य० । २. तओ नियत्तो-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४४. सीयाहरणे रामविप्पलावपव्वं

सा तत्थ रुवइ भवणे, चन्दणहा विगलियंसुसलिलोहा । विलिहियनहकक्खोरू, विमुक्ककेसी य रयमइला ॥१॥
खरदूसणेण दिट्ठा, मलिया नलिणि व्व गयवरिन्देणं । भणिया य साहसु तुमं, केणेयं पाविया दुक्खं ॥२॥
भणइ तओ चन्दणहा, गया य पुत्तं गवेसणट्ठाए । नवरं पेच्छामि वणे, छिन्नसिरं तं महिं पडियं ॥३॥
मारेऊण मह सुयं, केणवि पावेण सूरहासं तं । गहियं च सिद्धविज्जं, खेयरपुज्जं महाखग्गं ॥४॥
अहमवि तं पुत्तसिरं, अङ्के ठविऊण सोगतवियङ्गी । बहुला व जह विवच्छा, रुयामि रण्णे विगलियंसू ॥५॥
ताव च्चिय तेण अहं, दुट्ठेणं पुत्तवेरिएण पहू ! । अवगूहिया रुयन्ती, धणियं कज्जेण केणं पि ॥६॥
अहयं अणिच्छमाणी, दन्तेसु नहेसु तेण पावेणं । एयारिसिं अवत्थं, एगागी पाविया रण्णे ॥७॥
तत्तो वि रक्खिया हं, परभवजणिएण पुण्णजोएणं । अविखण्डियचारित्ता, कह वि इहं आगया सामी ॥८॥
विज्जाहराण राया, भाया मे रावणो तिखण्डवई । दूसण ! तुमं पि भत्ता, तह वि इमं पाविया दुक्खं ॥९॥
सुणिऊण तीए वयणं, सोगाऊरियमणो तहिं गन्तुं । खरदूसणो विवन्नं, पेच्छइ पुत्तं महीपडियं ॥१०॥
पडियागओ खणेणं, नियघरं रोसपूरियामरिसो । चोद्दसहि सहस्सेहिं, सन्नद्धो पवरजोहाणं ॥११॥

---

## ४४. सीताहरणे रामविप्रलापपर्वम्

सा तत्र रोदिति भवने चन्द्रनखा विगलिताश्रुसलिलौघा । विलिखितनखकक्षोरु र्विमुक्तकेशिनी च रजोमलिना ॥१॥
खरदूषणेन दृष्टा मलिना नलिनीव गजवरेन्द्रेण । भणिता च कथय त्वं केनेदं प्रापिता दुःखम् ॥२॥
भणति ततश्चन्द्रनखा गता च पुत्रं गवेषणार्थे । नवरं पश्यामि वने छिन्नशिरसं तं महीं पतितम् ॥३॥
मारयित्वा मम सुतं केनापि पापेन सूर्यहासं तम् । गृहीतं च सिद्धविद्यं खेचरपूज्यं महाखड्गम् ॥४॥
अहमपि तत्पुत्रशिरमङ्के स्थापयित्वा शोकतप्ताङ्गिनी । बहुलेव यथा विवस्त्रा रोदिम्यरण्ये विगलिताश्रुः ॥५॥
तावदेव तेनाहं दुष्टेन पुत्रवैरिणा प्रभो ! । अवगूहिता रुदन्ती गाढं कार्येण केनापि ॥६॥
अहमनिच्छन्ती दन्तै र्नखैस्तेन पापेन । एतादृशमवस्थामेकाकिनी प्राप्ताऽरण्ये ॥७॥
ततोऽपि रक्षिताहं परभवजनितेन पुण्ययोगेन । अविखण्डितचारित्रा कथमपीहमागता स्वामिन् ॥८॥
विद्याधराणां राजा भ्राता मे रावणस्त्रिखण्डाधिपतिः । दूषण ! त्वं भर्ता तथापीदं प्राप्ता दुःखम् ॥९॥
श्रुत्वा तस्या र्वचनं शोकापूरितमनास्तत्र गत्वा । खरदूषणो विपन्नं पश्यति पुत्रं महीपतितम् ॥१०॥
प्रत्यागतः क्षणेन निजगृहं रोषपूरितामर्शः । चतुर्दशभिस्सहस्रैस्सन्नद्धः प्रवरयोधानाम् ॥११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एयन्तरम्मि तो सो, भणिओ चित्तप्पभेण मन्तीणं । लङ्काहिवस्स दूयं, पेसेहि इमेण अत्थेणं ॥१२॥
अह रावणस्स दूयं, सिग्घं खरदूसणो विसज्जेउं । बाहपगलन्तनेत्तो, रुयइ य सुयसोगमावन्नो ॥१३॥
दूएणं परिकहिए, जाव च्चिय रावणो चिरावेइ । चोद्दसहि सहस्सेहिं, जोहाणं दूसणो चलिओ ॥१४॥
दूसणबलस्स गयणे, सीया सुणिऊण तूरनिग्घोसं । किं किं ? ति उल्लवन्ती, सीया रामं समल्लीणा ॥१५॥
मा भाहि चन्दवयणे !, एए हंसा नहेण वच्चन्ता । मुञ्चन्ति मुहनिनायं, अप्पेहि धणुं पणासेमि ॥१६॥
ताव य आसन्नत्थं, विविहाउहसंकुलं महासेन्नं । दिट्ठं समोत्थरन्तं गयणयले मेहवन्दं व ॥१७॥
चिन्तेइ रामदेवो, किं वा नन्दीसरं सुरा एए । गन्तूण पडिनियत्ता, निययट्ठाणाइं वच्चन्ति ? ॥१८॥
वंसत्थलम्मि छेत्तुं, अहवा जो सो विवाइओ रण्णे । वेरपडिउञ्छणत्थे, तस्स इमे आगया बन्धू ? ॥१९॥
नूणं दुस्सीलाए, तीए गन्तूण दुट्ठमहिलाए । सिट्ठं च जहावत्तं, तेण इमे आगया इहइं ॥२०॥
परिचिन्तिऊण एवं, रामो चावे सकंकडे दिट्ठी । देन्तो य लक्खणेणं, भणिओ वयणं निसामेहि ॥२१॥
सन्तेण मए राहव !, न य जुत्तं तुज्झ जुज्झिउं एत्तो । रक्ख इमं जणयसुयं, अरीण समुहो अहं जामि ॥२२॥
जंवेल सीहनायं, वेरियपरिवेढिओ विमुञ्चे हं । तंवेल तुमं राघव ! एज्जसु सिग्घं निरुत्तेणं ॥२३॥
एव भणिऊण तो सो, सन्नद्धो गहियपहरणावरणो । अह जुज्झिउं पवत्तो, समयं चिय रक्खसभडेहिं ॥२४॥
लच्छीहरस्स उवरिं, निसायरा विविहसत्थसंघायं । मुञ्चन्ति पव्वयस्स व, धारानिवहं पओवाहा ॥२५॥

---

एतदन्तरे तदा स भणितश्चित्रप्रभेन मन्त्रिणा । लङ्काधिपस्य दूतं प्रेषयानेनार्थेन ॥१२॥
अथ रावणस्य दूतं शीघ्रं खरदूषणो विसर्ज्य । बाष्पप्रगलन्नेत्रो रोदिति च सुतशोकसमापन्नः ॥१३॥
दूतेन परिकथिते यावदेव रावणश्चिरयति । चतुर्दशभिस्सहस्रैर्योधानां दूषणश्चलितः ॥१४॥
दूषणबलस्य गगने सीता श्रुत्वा तूर्यनिर्घोषम् । किं किमित्युल्लपन्ती सीता रामे समालीना ॥१५॥
माभैषीश्चन्द्रवदने ! एते हंसा नभसा व्रजन्तः । मुञ्चन्ति मुखनिनादमर्पय धनुं प्रणाशयामि ॥१६॥
तावच्चासन्नस्थं विविधायुधसंकुलं महासैन्यम् । दृष्टं समवस्तरन्तं गगनतले मेघवृन्दमिव ॥१७॥
चिन्तयति रामदेवः किं वा नंदीश्वरं सुरा एते । गत्वा प्रतिनिवृत्ता निजस्थानानि व्रजन्ति ? ॥१८॥
वंशस्थले छित्वाऽथवा यः स व्यापादितोऽरण्ये । वेरप्रतिकारार्थे तस्येम आगता बन्धवः ? ॥१९॥
नूनं दुःशीलया तया गत्वा दुष्टमहिलया । शिष्टः च यथावृत्तं तेनेम आगता इह ॥२०॥
परिचिन्त्येवं रामश्चापे सकङ्कटे दृष्टिम् । ददंश्च लक्ष्मणेन भणितो वचनं निशामय ॥२१॥
सता मया राघव ! न च युक्तं तव योद्धुमितः । रक्षेमां जनकसुतामरीणां संमुखोऽहं यामि ॥२२॥
यद्वेलां सिंहनादं वैरिपरिवेष्टितो विमुञ्चेऽहम् । तद्वेलां त्वं राघव ! आगच्छेः शीघ्रं निश्चयेन ॥२३॥
एवं भणित्वा ततः स सन्नद्धो गृहीतप्रहरणावरणः । अथ योद्धुं प्रवृत्तः समकमेव राक्षसभटैः ॥२४॥
लक्ष्मीधरस्योपरि निशाचरा विविधशस्त्रसंघातम् । मुञ्चन्ति पर्वतस्येव धारानिवहं पयोधराः ॥२५॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

रयणियरकरविमुक्कं, आउहनिवहं रणे निवारेउं । जमदण्डसरिसवेगे, मुञ्चइ लच्छीहरो बाणे ॥२६॥
वरमउडमण्डियाइं, जलन्तमणि-रयणकुण्डलवराइं । लक्खणसरछिन्नाइं, पडन्ति कमलाइं व सिराइं ॥२७॥
निवडन्ति गय-तुरङ्गा, जोहा य रहा य विलुलियधओहा । संचुण्णियङ्गमङ्गा, घोररवं चेव कुणमाणा ॥२८॥
एत्थन्तरम्मि पत्तो, पुप्फविमाणट्ठिओ य दहवयणो । हन्तुं समुज्जयमणो, सम्बुक्करिउं घणकसाओ ॥२९॥
अहऽहोमुहं नियन्तो पेच्छइ मोहस्स [1]कारिणी सीया । सव्वङ्गसुन्दरङ्गी, सुरवइमहिलं व रूवेणं ॥३०॥
मयणाणलतवियङ्गो, एक्कमणो दहमुहो विचिन्तेइ । किं मज्झ कीरइ इहं, रज्जेण इमाए रहियस्स ? ॥३१॥
परिचिन्तिऊण एवं, ताहे अवलोयणाए विज्जाए । जाणइ ताण दहमुहो, नामं चरियं च गोत्तं च ॥३२॥
बहुएसु समं समरे, जुज्झइ जो एस लक्खणो हवइ । रामो सीयाए समं, एसो वि हु चिट्ठई रण्णे ॥३३॥
तं मोत्तूण रणमुहे, सीहरवं लक्खणस्स सरसरिसं । सिग्घं हरामि सीया[2], रामस्स वि वञ्चणं काउं ॥३४॥
मारिहिइ दो वि एए, अवस्स खरदूसणो बलसमग्गो । परिचिन्तिऊण एवं, सीहरवं कुणइ दहवयणो ॥३५॥
सुणिऊण सीहनायं, लक्खणफुडवियडभासियं रामो । जाओ समाउलमणो, अप्फालइ धणुवरं ताहे ॥३६॥
अच्छसु ताव खणेक्कं, सुन्दरि ! एत्थं जडागिकयरक्खा । लच्छीहरस्स पासं, जाव य गन्तुं नियत्तेमि ॥३७॥
भणिऊण एव पउमो, वारिज्जन्तो वि पावसउणेसु । वेगेण रणमुहं सो, पविसइ भडमुक्कबुक्कारं ॥३८॥
एत्थन्तरम्मि सहसा, अवयरिऊणं नहाउ दहवयणो । हक्खुवइ जणयतण[3]या, भुयासु नलिणि व्व मत्तगओ ॥३९॥
दट्ठूण [4]हरिज्जन्ती, सामियघरिणी जडाउणो रुट्ठो । नहणङ्गलेसु पहरइ, दसाणणं विउलवच्छयले ॥४०॥

---

रजनीकरकरविमुक्तमायुधनिवहं रणे निवार्य । यमदण्डसदृशवेगान्मुञ्चति लक्ष्मीधरो बाणान् ॥२६॥
वरमुकुटमण्डितानि ज्वलन्मणिरत्नकुण्डलवराणि । लक्ष्मणशरछिन्नानि पतन्ति कमलानीव शिरांसि ॥२७॥
निपतन्ति गजतुरङ्गा योधाश्च रथाश्च विलुलितध्वजौधाः । संचूर्णिताङ्गाङ्गा घोररवमेव क्रियमाणाः ॥२८॥
अत्रान्तरे प्राप्तः पुष्पविमानस्थितश्च दशवदनः । हन्तुं समुद्यतमनाः शम्बुकरिपुं घनकषायः ॥२९॥
अथाधोमुखं नियान्पश्यति मोहस्य कारिणीं सीताम् । सर्वाङ्गसुन्दराङ्गिनीं सुरपतिमहिलामिव रुपेण ॥३०॥
मदनानलतप्ताङ्ग एकाग्रमना दशमुखो विचिन्तयति । किं मम क्रियत इह राज्येनानया रहितस्य ? ॥३१॥
परिचिन्त्यैवं तदावलोकनया विद्यया । जानाति तेषां दशमुख नाम चरित्रं च गोत्रं च ॥३२॥
बहुभिस्समं समरे युध्यते य एष लक्ष्मणो भवति । रामः सीतायाः सममेषोऽपि खलु तिष्ठत्यरण्ये ॥३३॥
तं मुक्त्वा रणमुखे सिंहरवं लक्ष्मणस्य स्वरसदृशम् । शीघ्रं हरामि सीतां रामस्यापि वञ्चनं कृत्वा ॥३४॥
मारिष्यति द्वावप्येतावश्यं खरदुषणो बलसमग्रः । परिचिन्त्येवं सिंहरवं करोति दशवदनः ॥३५॥
श्रुत्वा सिंहनादं लक्ष्मणस्फुटविकटभाषितं रामः । जातः समाकुलमना आस्फालयति धनुवरं तदा ॥३६॥
आस्स्व तावत्क्षणमेकं सुन्दरि ! अत्र जटाकिकृतरक्षा । लक्ष्मीधरस्य पार्श्वं यावच्च गत्वा निवर्ते ॥३७॥
भणित्वैवं पद्मो वार्यमाणोऽपि पापशकुनैः । वेगेन रणमुखं स प्रविशति भटमुक्तगर्जारवम् ॥३८॥
अत्रान्तरे सहसाऽवतीर्य नभसो दशवदनः । उत्क्षिपति जनकतनयां भुजाभ्यां नलिनीव मत्तगजः ॥३९॥
दृष्ट्वा हारयन्तीं स्वामिगृहिणीं जटायू रुष्टः । नखांङ्गुलैः प्रहरति दशाननविपुलवक्षःस्थले ॥४०॥

---

१. कारिणि सीयं । सव्वङ्गसुन्दरङ्गि-प्रत्य० । २. सीयं-प्रत्य० । ३. तणयं-प्रत्य० । ४. हरिज्जन्ति सामिय-घरिणि-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

घाएण तेण रुट्ठो, दहवयणो पक्खिणं अमरिसेणं । करपहरचुण्णियङ्गं, पाडेइ लहुं धरणिपट्ठे ॥४१॥
जाव य मुच्छाविहलो, पक्खी न उवेइ तत्थ पडिबोहं । ताव य पुप्फविमाणे, [1]सीया आणेइ दहवयणो ॥४२॥
सा तत्थ विमाणत्था, हीरन्ती जाणिऊण अप्पाणं । घणसोगवसीभूया, कुणइ पलावं जणयधूया ॥४३॥
चिन्तेइ रक्खसवई, कलुणपलावं इमा पकुव्वन्ती । बहुयं पि भण्णमाणी, रूसइ न पसज्जई मज्झं ॥४४॥
अहवा साहुसयासे, पढमं चियऽभिग्गहो मए गहिओ । अपसन्ना परमहिला, न य भोत्तव्वा सुरूवा वि ॥४५॥
तम्हा रक्खामि वयं, अहयं संसारसागरुत्तारं । होही पसन्नहियया, इमा वि मह दीहकालेणं ॥४६॥
एव परिचिन्तिऊणं, वच्चइ लङ्काहिवो सपुरिहुत्तो । रामो पविसरइ रणं, घणसत्थपडन्तसंघायं ॥४७॥
पासम्मि समल्लीणं, रामं दट्ठूण लक्खणो भणइ । [2]एगागी जणयसुया, मोत्तूण किमागओ एत्थं ॥४८॥
सो भणइ सीहनायं, तुज्झ सुणेऊण आगओ इहइं । पडिचोइओ य रामो, वच्चसु सीयासयासम्मि ॥४९॥
एए रिवू महाजस !, जिणामि अहयं न एत्थ संदेहो । वच्च तुमं अइतुरिओ, कन्तापरिक्खणं कुणसु ॥५०॥
एव भणिओ नियत्तो, तूरन्तो पाविओ तमुद्देसं । न य पेच्छइ जणयसुयं, सहसा ओमुच्छिओ रामो ॥५१॥
पुणरवि य समासत्थो, [3]दिट्ठी निक्खीवइ तत्थ तरुगहणे । घणपेम्माउलहियओ, भणइ तओ राहवो वयणं ॥५२॥
एहेहि इओ सुन्दरि !, वाया मे देहि मा चिरावेहि । दिट्ठा सि रुक्खगहणे, किं परिहासं चिरं कुणसि ? ॥५३॥
कन्ताविओगदुहिओ, तं रण्णं राहवो गवेसन्तो । पेच्छइ तओ जडागिं, केंकायन्तं महिं पडियं ॥५४॥

---

घातेन तेन रुष्टो दशवदनः पक्षिणममर्षेण । करप्रहरचूर्णिताङ्गं पातयति लघु धरणीपृष्टे ॥४१॥
यावच्च मूर्च्छाविह्वलः पक्षी नोपैति तत्र प्रतिबोधम् । तावच्च पुष्पकविमाने सीतामानयति दशवदनः ॥४२॥
सा तत्र विमानस्था हारयन्तीं ज्ञात्वाऽऽत्मानम् । घनशोकवशीभूता करोति प्रलापं जनकदुहिता ॥४३॥
चिन्तयति राक्षसपतिः करुणप्रलापमिमा प्रकुर्वन्ती । बहुमपि भण्यमाना रुष्यति न प्रसञ्जति मम ॥४४॥
अथवा साधुसकाशे प्रथममेवाभिग्रहो मया गृहीतः । अप्रसन्ना परमहिला न च भोक्तव्या सुरुपाऽपि ॥४५॥
तस्माद्रक्ष्यामि व्रतमहं संसारसागरोत्तारम् । भविष्यति प्रसन्नहृदयेमाऽपि मम दीर्घकालेन ॥४६॥
एवं परिचिन्त्य गच्छति लङ्काधिपः स्वपुर्यभिमुखः । रामः प्रविशति रणं घनशस्त्रपतत्संघातम् ॥४७॥
पार्श्वे समालीनं रामं दृष्ट्वा लक्ष्मणो भणति । एकाकिनीं जनकसुतां मुक्त्वा किमागतोऽत्र ॥४८॥
स भणति सिंहनादं तव श्रुत्वाऽऽगत इह । प्रतिचोदितश्च रामो गच्छ सीतासकाशे ॥४९॥
एतान् रिपून् महायशः ! नयाम्यहं नात्रसंदेहः । गच्छ त्वमतित्वरितः कान्तापरिरक्षणं कुरु ॥५०॥
एवं भणितो निवृत्तस्त्वरमाणःप्राप्तस्तमुद्देशम् । न च पश्यति जनकसुतां सहसाऽवमूर्च्छितो रामः ॥५१॥
पुनरपि च समाश्वस्थो दृष्टिं निक्षिपति तत्र तरुगहने । घनप्रेमाकुलितहृदयो भणति ततो राघवो वचनम् ॥५२॥
एहयेहीतः सुन्दरि ! वाचा मां देहि मा चिरय । दृष्टाऽसि वृक्षगहने किं परिहासं चिरं करोषि ? ॥५३॥
कान्तावियोगदुःखितस्तामरण्ये राघवो गवेषयन् । पश्यति ततो जटाकिनं कैकायन्तं महीं पतितम् ॥५४॥

---

१. सीयं-प्रत्य० । २. एगागिं जणयसुयं-प्रत्य० । ३. दिट्ठिं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पक्खिस्स कण्णजावं, देइ मरन्तस्स सुहयजोएणं । मोत्तूण पूइदेहं, तत्थ जडाऊ सुरो जाओ ॥५५॥
पुणरवि सरिऊण पियं, मुच्छा [१] गन्तूण तत्थ आसत्थो । परिभमइ गवेसन्तो, सीयासीयाकउल्लावो ॥५६॥
भो भो मत्तमहागय !, एत्थारण्णे तुमे भमन्तेणं । महिला सोमसहावा, जइ दिट्ठा किं न साहेहि ? ॥५७॥
तरुवर तुमं पि वच्चसि, दूरुन्नयवियडपत्तलच्छाय ! । एत्थं अपुव्वविलया, कह ते नो लक्खिया रण्णे ? ॥५८॥
सोऊण [२] चक्कवाई, वाहरमाणी सरस्स मज्झत्था । महिलासङ्काभिमुहो, पुणो वि जाओ च्चिय निरासो ॥५९॥
रोसपसरन्तहियओ, वज्जावत्तं धणुं समारुहिउं । अप्फालेइ महप्पा, भयजणणं सव्वसत्ताणं ॥६०॥
मोत्तूण सीहनायं, पुणो विसायं खणेण संपत्तो । सोयइ मए वराकी, जणयसुया हारिया रण्णे ॥६१॥
इह मणुयसारमईयं, महिलारयणुत्तमं महं नट्ठं । न लभामि गवेसन्तो, धणियं पि सुदीहकालेणं ॥६२॥
वग्घेण व सीहेण व, खइया किं ? मारिया व हत्थीणं ? । बहुजलकल्लोलाए, अवहरिया गिरिनदीए व्व ? ॥६३॥
दिट्ठा दिट्ठा सि मए, एहेहि इओ इओ कउल्लावो । धावइ तओ तओ च्चिय, पडिसद्दयमोहिओ रामो ॥६४॥
अहवा दुट्ठेण इहं, केण व हरिया महं हिययइट्ठा ? । घणगिरि-तरुसंछन्नं, कत्तो रण्णं गवेसामि ? ॥६५॥
एव परिहिण्डिऊणं, तं रण्णं राहवो पडिनियत्तो । जाओ निरासहियओ, निययावासे तओ सुयइ ॥६६॥

एवंविहा वि पुरिसा सुकयस्स छेदे, पावन्ति दुक्खमउलं इह जीवलोए ।
तम्हा जिणुत्तममएण विसुद्धभावा, धम्मं करेह विमलं च निरन्तरायं ॥६७॥

**॥ इय पउमचरिए सीयाहरणे रामविप्पलावविहाणं नाम चउत्तालीसं पव्वं समत्तं ॥**

पक्षिणः कर्णजापं ददाति म्रियमाणस्य सुकृतयोगेन । मुक्त्वा पूतिदेहं तत्र जटायुः सुरो जातः ॥५५॥
पुनरपि स्मृत्वा प्रियां मूर्च्छां गत्वा तत्राश्वस्तः । परिभ्रमति गवेषयन्सीतासीताकृतोल्लापः ॥५६॥
भो भो मत्तमहागज ! अत्रारण्ये त्वया भ्रमता । महिला सौम्यस्वभावा यदि दृष्टा किं न कथय ? ॥५७॥
तरुवर ! त्वमपि व्रजसि दूरोन्नतविकटपत्रालच्छायः । अत्रापूर्ववनिता कथं त्वया न लक्षितारण्ये ? ॥५८॥
श्रुत्वा चक्रवाकीं व्याहरन्तीं सरसो मध्यस्थाम् । महिलाशङ्काभिमुखः पुनरपि जात एव निराशः ॥५९॥
रोषप्रसरद्धृदयो वज्रावर्तं धनुं समारुह्य । आस्फालयति महात्मा भयजननं सर्वसत्त्वानाम् ॥६०॥
मुक्त्वा सिंहनादं पुन र्विषादं क्षणेन संप्राप्तः । शोचति मया वराकी जनकसुता हारिताऽरण्ये ॥६१॥
इह मनुष्यसारमतिकं महिलारत्नमुत्तमं मम नष्टम् । न लभे गवेषयन्नत्यंतमपि सुदीर्घकालेन ॥६२॥
व्याघ्रेण वा सिंहेन वा खादिता किं ? मारिता वा हस्तिना ? । बहुजलकल्लोलयापहृता गिरिनद्या वा ? ॥६३॥
दृष्टा दृष्टाऽसि मयैहि एहीत इतः कृतोल्लापः । धावति ततस्तत एव प्रतिशब्दमोहितो रामः ॥६४॥
अथवा दुष्टेनेह केन वा हृता मम हृदयेष्टा ? । धनगिरितरुच्छन्नं कुतोऽरण्यं गवेषयामि ? ॥६५॥
एवं परिहिण्डय तदरण्यं राघवः प्रतिनिवृत्तः । ज्ञातो निराशहृदयो निजावासे ततः शेते ॥६६॥
एवंविधा अपि पुरुषाः सुकृतस्यच्छेदे प्राप्नुवन्ति दुःखमतुलमिह जीवलोके ।
तस्माज्जिनोत्तममतेन विशुद्धभावा धर्मं कुरुत विमलं च निरन्तरायम् ॥६७॥

**॥ इति पद्मचरित्रे सीताहरणे रामविप्रलापविधानं नाम चतुश्चत्वारिंशत्तमं पर्वं समाप्तम् ॥**

१. मुच्छं-प्रत्य० । २. चक्कावाइं वाहरमाणिं सरस्स मज्झत्थं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४५. सीयाविप्पओगदाहपव्वं

एत्थन्तरम्मि पत्तो, पुव्वविरुद्धो विराहिओ सहसा । सन्नद्धबद्धकवओ, बलेण सहिओ महन्तेणं ॥१॥

जुज्झन्तस्स रणमुहे, पडिओ चलणेसु लच्छिनिलयस्स । भिच्चो हं तुह सामिय ! विज्जाहरवंससंभूओ ॥२॥

चन्दोयरस्स पुत्तो, अणुराहाकुच्छिसंभवो अहयं । तुह आणाए समत्थो, नामेण विराहिओ सामि ! ॥३॥

विणओणयस्स सीसे, हत्थं दाऊण लक्खणो भणइ । सव्वं पि एवमेयं, वच्छ ! महं मग्गओ ठाहि ॥४॥

एव भणिओ पवुत्तो, एक्कं खरदूसणे तुमं सामी ! । घाएहि सेससुहडे, अहयं मारेमि संगामे ॥५॥

एव भणिऊण तो सो, दूसणसेन्नस्स अहिमुहीहूओ । अह जुज्झिउं पवत्तो, विराहिओ नियबलसहिओ ॥६॥

जोहा जोहेहि समं, आभिट्टा गयवरा सह गजेहिं । जुज्झन्ति रहारूढा, समयं रहिएहि रणसूरा ॥७॥

एयारिसम्मि जुज्झे, विणिवाइज्जन्तसुहडसंघाए । लच्छीहरेण समयं, आलग्गो दूसणो समरे ॥८॥

भणिओ य दूसणेणं, मम पुत्तं मारिऊण मज्झत्थं । कन्ताथणाभिलासी !, पाव ! कहिं वच्चसे अज्जं ? ॥९॥

ठा-ठाहि सवडहुत्तो, पाव ! तुमं सुनिसिएहि बाणेहिं । कन्तावराहकारी, पेसेमि जमालयं सिग्घं ॥१०॥

पडिभणइ लच्छिनिलओ, किं ते भड ! वोक्किएहि बहुएहिं । न य हं वच्चामि तहिं, जत्थ गओ नन्दणो तुज्झं ॥११॥

लच्छीहरेण एन्तो, सरेहि खरदूसणो कओ विरहो । छिन्नधणुहा-ऽयवत्तो, गहो व्व पडिओ नहयलाओ ॥१२॥

---

## ४५. सीता विप्रयोगदाहपर्वम्

अत्रान्तरे प्राप्तः पुर्वविरुद्धो विराधितः सहसा । सन्नद्धबद्धकवचो बलेन सहितो महता ॥१॥

युध्यमानस्य रणमुखे पतितश्चरणयो र्लक्ष्मीनिलयस्य । भृत्योऽहं तव स्वामिन् ! विद्याधरवंशसंभूतः ॥२॥

चन्द्रोदरस्य पुत्रोऽनुरधाकुक्षिसम्भवोऽहम् । तवाज्ञया समर्थो नाम्ना विराधितः स्वामिन् ॥३॥

विनयावनतस्य शीर्षे हस्तं दत्वा लक्ष्मणो भणति । सर्वमप्येवमेतद्वत्स ! मम मार्गतस्तिष्ठ ॥४॥

एवं भणित्वा तदा स दूषणसैन्यस्याभिमुखम् । अथ योद्धुं प्रवृतो विराधितो निजबलसहितः ॥६॥

योधा योधैः समं प्रवृत्ता गजवरा सह गजैः । युध्यन्ते रथारुढाः समकं रथिकैः रणशूराः ॥७॥

एतादृशे युद्धे विनिपद्यमानसुभटसंघाते । लक्ष्मीधरेण समकमालग्नो दूषणः समरे ॥८॥

भणितश्च दूषणेन ममपुत्रं मारयित्वा मध्यस्थम् । कान्तास्तनाभिलाषिन् ! पाप ! कुत्र गच्छस्यद्य ? ॥९॥

तिष्ठ-तिष्ठाभिमुखः पाप ! त्वां सुनिशितैर्बाणैः । कान्ताऽपराधकारिणं प्रेषयामि यमालयं शीघ्रम् ॥१०॥

प्रतिभणति लक्ष्मीनिलयः किं ते भट ! व्याहृतै र्बहुभिः । न चाहं व्रजामि तत्र यत्र गतो नन्दनस्तव ॥११॥

लक्ष्मीधरेणाऽऽयन्शरैः खरदूषणः कृतो विरथः । छिन्नधनुष्कातपत्रो ग्रह इव पतितो नभस्तलात् ॥१२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आयड्डिऊण खग्गं, सोमित्ती तस्स पाविओ सिग्घं । खरदूसणो वि समुहं, अवट्ठिओ असिवरं घेत्तुं ॥१३॥**

**आमरिसवसगएणं, छिन्नं खग्गेण सुज्जहासेणं । खरदूसणस्स सीसं, पडियं रत्तारुणच्छायं ॥१४॥**

**खरदूसणस्स मन्ती, नामेणं खारदूसणो एन्तो । लच्छीहरेण भिन्नो, सरेण मुच्छागयओ विद्धो ॥१५॥**

**सिग्घं विराहिएण वि, तं सव्वं दूसणस्स निययबलं । निद्दयपहराभिहयं, खणेण भग्गं निराणन्दं ॥१६॥**

**तं मारिऊण सत्तुं, सहिओ य विराहिएण सोमित्ती । पत्तो रामसयासं, पेच्छइ जेट्ठं सुहपसुत्तं ॥१७॥**

**उट्ठविऊणाऽऽलत्तो, साह कहिं जणयनन्दिणी सामि ! ।**
**तेण वि सो पडिभणिओ, केण वि मे अवहिया कन्ता ॥१८॥**

**ताव पणामं काउं, विराहिओ भणइ सविणयं सामि ! । अम्हं तुमं महाजस !, आणत्तिं देह कज्जेसु ॥१९॥**

**एवं च भणियमेत्ते, पुच्छि लच्छीहरं पउमणाहो । साहेहि वच्छ ! एसो, कस्स सुओ ? किं च नामं से ? ॥२०॥**

**चन्दोयरस्स पुत्तो, नामेण विराहिओ इमो सामि ! । जुज्झन्तस्स रणमुहे, मज्झ सयासं समणुपत्तो ॥२१॥**

**एएण रिवुबलं तं, साहणसहिएण रणमुहे भग्गं । खग्गरयणेण सत्तू, मए वि खरदूसणो निहओ ॥२२॥**

**अह भणइ लच्छिनिलओ, विज्जाहर ! कारणं सुणसु एत्तो ।**
**मह गुरवस्स महिलिया, केण वि हरिया महारण्णे ॥२३॥**

**तीए विरहम्मि इमो, वच्छय ! जइ चयइ अत्तणो जीयं । तो हं हुयवहरासिं, पविसामि न एत्थ संदेहो ॥२३॥**

**एयस्स जीवियव्वे, किंचि उवायं करेहि मुणिऊणं । सीयागवेसणपरो, वच्छ ! सहीणो तुमं होहि ॥२५॥**

---

आकृष्य खड्गं सौमित्रिस्तस्य प्राप्तः शीघ्रम् । खरदूषणोऽपि संमुखमवस्थितोऽसिवरं गृहीत्वा ॥१३॥

आमर्षवशगतेन छिन्नं खड्गेन सूर्यहासेन । खरदूषणस्य शीर्षं पतितं रक्तारुणच्छायम् ॥१४॥

खरदूषणस्य मन्त्रि र्नाम्ना खारदूषण आयन् । लक्ष्मीधरेण भिन्नः शरेण मुर्च्छागतोविद्धः ॥१५॥

शीघ्रं विराधितेनापि तत्सर्वं दुषणस्य निजबलम् । निर्दयप्रहाराभिहतं क्षणेन भग्नं निराणन्दम् ॥१६॥

तं मारयित्वा शत्रुं सहितश्च विराधितेन सौमित्रिः । प्राप्तो रामसकाशं पश्यति ज्येष्टं सुखप्रसुप्तम् ॥१७॥

उत्थाप्याऽऽलप्तः कथय कुत्र जनकनन्दिनी स्वामिन् । तेनापि स प्रतिभणितः केनापि मे ऽपहृता कान्ता ॥१८॥

तावत्प्रणामं कृत्वा विराधितो भणति सविनयं स्वामिन् ! । अहं तव महायशः ! आज्ञां देहि कार्येषु ॥१९॥

एवं च भणितमात्रे पृच्छति लक्ष्मीधरं पद्मनाभः । कथय वत्स ! एष कस्य सुतः ? किं च नाम तस्य ? ॥२०॥

चन्द्रोदरस्य पुत्रो नाम्ना विराधितोऽयं स्वामिन् ! । युध्यमानस्य रणमुखे मम सकाशं समनुप्राप्तः ॥२१॥

अनेन रिपुबलं तं साधनसहितेन रणमुखे भग्नम् । खड्गरत्नेन शत्रुर्मयाऽपि खरदूषणो निहतः ॥२२॥

अथ भणति लक्ष्मीनिलयो विद्याधर ! कारणं श्रुण्वितः । मम गुरो र्महिला केनापि हृता महारण्ये ॥२३॥

तस्या विरहेऽयं वत्स ! यदि त्यजत्यात्मनोजीवम् । तदाहं हुतवहराशिं प्रविशामि नात्र संदेहः ॥२४॥

एतस्य जीवितव्ये किंचिदुपायं कुरु ज्ञात्वा । सीतागवेषणपरो वत्स ! सख्यस्त्वं भव ॥२५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एव भणिओ पवुत्तो, चन्दोयरनन्दणो निययभिच्चे । [1]सीया लहुं गवेसह, तुम्हे वि जल-त्थला-ऽऽगासे ॥२६॥

एव भणिया पयट्टा, सुहडा सन्नद्धबद्धतोणीरा । सीयागवेसणट्ठे, दस वि दिसाओ पवणवेगा ॥२७॥

अह अक्कजडिस्स सुओ, रयणजडी नाम खेयरो गयणे । सायरवरस्स उवरिं, सुणइ पलावं महिलियाए ॥२८॥

हा रामदेव ! लक्खण !, धरेहि बन्दी इमेण हीरन्ती । सुपरिप्फुडं च सद्दं, सोउं रुट्ठो रयणकेसी ॥२९॥

पेच्छइ पुप्फविमाणे, हीरन्ती रावणेण वइदेही । भणइ य रामस्स पियं, दुट्ठ ! कहिं नेसि मह पुरओ ? ॥३०॥

सो एव भणियमेत्तो, दसाणणो तस्स निययविज्जाओ । अवलोयणीए नाउं, छिन्दइ मन्तप्पभावेणं ॥३१॥

अह सो विरिक्कविज्जो, कम्बुद्दीवम्मि तक्खणं पडिओ । आरुहइ कम्बुसेलं, समुद्दवाएण आसत्थो ॥३२॥

जे वि य ते तत्थ गया, गवेसिऊणं च आगया सिग्घं । रामस्स कहेन्ति फुडं, न सामि ! तुह गेहिणी दिट्ठा ॥३३॥

विज्जाहराण वयणं, सोऊणं राघवो विसण्णमणो । भणइ य सायरवडियं, रयणं को लहइ जियलोए ? ॥३४॥

नूणं परभवजणियं, अणुहवियव्वं मए निययकम्मं । नियमेण तं न तीरइ, देवेहि वि अन्नहा काउं ॥३५॥

एवं परिदेवन्तं, रहुनाहं भणइ खेयरनरिन्दो । थोवदिवसेसु कन्तं, दावेमि तुहं मुयसु सोगं ॥३६॥

अन्नं पि सुणसु सामिय !, निहए खरदूसणे बलब्भहिए । जाहिन्ति महाखोहं, इन्दइपमुहा भडा तुज्झं ॥३७॥

तम्हा वच्चामु लहुं, पायालंकारपुरवरं एत्तो । भामण्डलस्स वत्ता, तत्थ लभामो सुहासीणा ॥३८॥

---

एवं भणितः प्रोक्तश्चन्द्रोदरनन्दनो निजभृत्यान् । सीतां लघु गवेषयत यूयं हि जल-स्थलाऽऽकाशे ॥२६॥

एवं भणिताः प्रवृत्ताः सुभटाः सन्नद्धबद्धतूणीराः । सीतागवेषणार्थे दशापि दिशः पवनवेगाः ॥२७॥

अथार्कजटेः सुतो रत्नजटी नाम खेचरो गगने । सागरवरस्योपरि श्रृणोति प्रलापं महिलायाः ॥२८॥

हा रामदेव ! लक्ष्मण ! धर बन्दीमनेन ह्रियमाणाम् । सुपरिस्फुटं च शब्दं श्रुत्वा रुष्टो रत्नकेशी ॥२९॥

पश्यति पुष्पविमाने ह्रियमाणीं रावणेन वेदैहीम् । भणति च रामस्य प्रियां दुष्ट कुत्र नयसि मम पुरतः ? ॥३०॥

स एवं भणितमात्रो दशाननस्तस्य निजकविद्यया । अवलोकिन्या ज्ञात्वा छिनत्ति मन्त्रप्रभावेण ॥३१॥

अथ स विरिक्तविद्यः कम्बुद्वीपे तत्क्षणं पतितः । आरोहति कम्बुशैलं समुद्रवातेनाश्वस्तः ॥३२॥

येऽपि च ते तत्र गता गवेषयित्वा चागताः शीघ्रम् । रामस्य कथयन्ति स्फुटं न स्वामिंस्तव गृहिणी दृष्टा॥३३॥

विद्याधराणां वचनं श्रुत्वा राघवो विषण्णमनाः । भणति च सागरपतितं रत्नं को लभते जीवलोके ? ॥३४॥

नूनं परभवजानितमनुभवितव्यं मया निजकर्म । नियमेन तन्न तीर्यते देवैरप्यन्यथा कर्तुम् ॥३५॥

एवं परिदेवन्तं रघुनाथं भणति खेचरनरेन्द्रः । स्तोकदिवसैः कान्तां दर्शयामि तव मुञ्च शोकम् ॥३६॥

अन्यदपि श्रुणु स्वामिन् ! निहते खरदूषणे बलाभ्यधिके । यास्यन्ति महाक्षोभमिन्द्रजित्प्रमुखा भटास्तव ॥३७॥

तस्माद्गच्छामो लघु पाताललङ्कापुरवरमितः । भामण्डलस्य वार्तां तत्र लभामहे सुखासीनाः ॥३८॥

---

१. सीयं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सामच्छिऊण एवं, राम-सुमित्ती य रहवरविलग्गा । समयं विराहिएणं, पायालपुरं चिय पविट्ठा ॥३९॥
सोऊण आगया ते, चन्दणहानन्दणो तओ सुन्दो । निययबलेण समग्गो, तेहि समं जुज्झिउं पत्तो ॥४०॥
परिणिज्जिऊण सुन्दं, चन्दोयरनन्दणेण समसहिया । खरदूसणस्स गेहे, अवट्ठिया राम-सोमित्ती ॥४१॥
तत्थ वि सुरभिसुयन्धे, पासाए राधवो परिवसन्तो । सीयासमागममणो, निमिसं पि धिइं न सो लहइ ॥४२॥
तस्स घरस्साऽऽसन्ने, जिणभवणं उववणस्स मज्झम्मि । तं पविसिऊण रामो, पणमइ [1]पडिमा धिइं पत्तो ॥४३॥
नियबलेण समग्गो, सुन्दो जणणिं च गेण्हिउं सिग्घं । लङ्कापुरिं पविट्ठो, पिइ-भाईसोगसंतत्तो ॥४४॥

एवं सङ्गा परभवकया होन्ति नेहाणुबद्धा, पच्छा दुक्खं जणियविरहा, देवमाणुस्सभावा ।
तम्हा नाणं जिणवरमए जाणिऊणं विसुद्धं, धम्मे चित्तं कुणह विमलं सव्वसोक्खाण मूलं ॥४५॥

॥ इय पउमचरिए सीयाविप्पओगदाहपव्वं पणयालं समत्तं ॥

---

पर्यालोच्यैवं रामसौमित्री च रथवरविलग्नौ । समकं विराधितेन पातालपुरमेव प्रविष्टौ ॥३९॥
श्रुत्वाऽऽगतांस्तेश्चन्द्रनखानन्दनस्ततः सुन्दो । निजबलेन समग्रस्तैः समं योद्धुं प्राप्तः ॥४०॥
परिणिर्जित्य सुन्दं चन्द्रोदरनन्दनेन समसहिताः । खरदूषणस्य गृहे ऽवस्थितौ रामसौमित्री ॥४१॥
तत्रापि सुरभिसुगन्धे प्रासादे राघवः परिवसन् । सीतासमागममना निमेषमपि धृतिं न स लभते ॥४२॥
तस्य गृहस्यासन्ने जिनभवनमुपवनस्य मध्ये । तं प्रविश्य रामः प्रणमति प्रतिमां धृतिं प्राप्तः ॥४३॥
निजबलेन समग्रः सुन्दो जननीं च गृहीत्वा शीघ्रम् । लङ्कापुरिं प्रविष्टः पितृ-भ्रातृ शोक संतप्तः ॥४४॥
एवं सङ्गाः परभवयुता भवन्ति स्नेहानुबद्धाः पश्चाद्दुक्खं जनितविरहा देवमनुष्यभावाः ।
तस्माज्ज्ञानं जिनवरमते ज्ञात्वा विशुद्धं धर्मे चित्तं कुरुत विमलं सर्वसौख्यानां मूलम् ॥४५॥

इति पद्मचरित्रे सीताविप्रयोगदाहपर्वं पञ्चचत्वारिंशत्तमं समाप्तम् ॥

---

१. पडिमं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ४६. मायापायारविउव्वणपव्वं

सो तत्थ विमाणत्थो वच्चन्तो रावणो जणयधूयं । दट्ठुं मिलाणवयणं, जंपइ महुराणि वयणाणि ॥१॥

होहि पसन्ना सुन्दरि !, मं दिट्ठी देहि सोमससिवयणे ! । जेण मयणाणलो मे पसमइ तुह चक्खुसलिलेणं ॥२॥

जइ दिट्ठिपसायं मे, न कुणसि वरकमलपत्तदलनयणे ! । तो पहणसुत्तिमङ्गं, इमेण चलणारविन्देणं ॥३॥

अवलोइऊण पेच्छसु, ससेल-वण-काणणं इमं पुहइं । भमइ जसो पवणो इव, मज्झ अणक्खलियगइपसरो ॥४॥

इच्छसु मए किसोयरि !, माणेहि जहिच्छियं महाभोगं । आभरणभूसियङ्गी, देवि व्व समं सुरिन्देणं ॥५॥

जं रावणेण भणिया, विवरीयमुही ठिया य तं सीया । जं परलोयविरुद्धं, कह जंपसि एरिसं वयणं ? ॥६॥

अवसर दिट्ठिपहाओ, मा मे अङ्गाइं छिवसु हत्थेणं । परमहिलियाणलसिहापडिओ सलहो व्व नासिहिसि ॥७॥

परनारिं पेच्छन्तो, पावं अज्जेसि अयससंजुत्तं । नरयं पि वच्चसि मओ, दुक्खसहस्साउलं घोरं ॥८॥

फरुसवयणेहि एवं, अहियं निब्भच्छिओ य सीयाए । मयणपरिताविय‌ङ्गो, तह वि न छड्डेइ पेम्मासा ॥९॥

ताहे लङ्काहिवई, निययसिरे विरइऊण करकमलं । पाएसु तीए पडिओ, तणमिव गणिओ विदेहाए ॥१०॥

खरदूसणसंगामे, निव्वत्ते ताव आगया सुहडा । सुय-सारणमाईया, जयसद्दं चेव कुणमाणा ॥११॥

---

## ४६. मायाप्राकारविकुर्वणपर्वम्

स तत्र विमानस्थो गच्छन्रावणो जनकदुहितरम् । दृष्ट्वा म्लानवदनां जल्पति मधुराणि वचनानि ॥१॥

भव प्रसन्ना सुन्दरि ! मां दृष्टिं देहि सौम्यशशिवदने ! । येन मदनानलो मम प्रशाम्यति तव चक्षुःसलिलेन ॥२॥

यदि दृष्टिप्रसादं मे न करोषि वरकमलदलपत्रनयने । तत प्रजहित्तमाङ्गमनेन चरणारविन्देन ॥३॥

अवलोक्य पश्य सशैलवनकाननामिमां पृथिवीम् । भ्रमति यशः पवन इव ममालक्षितगतिप्रसरः ॥४॥

इच्छ मां कृशोदरि ! मानय यथेच्छितं महाभोगम् । आभरणभूषिताङ्गिनी देवीव समं सुरेन्द्रेण ॥५॥

यद्रावणेन भणिता विपरितमुखी स्थिता च तत्सीता । यत्परलोकविरुद्धं कथं जल्पस्येतादृशं वचनम् ? ॥६॥

अपसर दृष्टिपथान्मा मेऽङ्गानि स्पृश हस्तेन । परमहिलानलशिखापतितः शलभ इव नङ्क्ष्यसि ॥७॥

परनारीं पश्यन्पापमर्जयस्ययशः संयुक्तम् । नरकमपि व्रजषि मृतो दुःखसहस्राकुलं घोरम् ॥८॥

परुषवचनैरेवमधिकं निर्भिर्त्सितश्च सीतया । मदनपरितप्ताङ्गस्तथापि न त्यजति प्रेमाशा ॥९॥

तदा लङ्काधिपति र्निजशिरसि विरच्य करकमलम् । पादयोस्तस्याः पतितस्तृणमिव गणितो विदेह्या ॥१०॥

खरदूषणसंग्रामे निवृते तावदागताः सुभटाः । शुक-सारणादयो जयशब्दमेव क्रियमाणाः ॥११॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

पडुपडह-गीय-वाइय-रवेण अभिणन्दिओ सह बलेणं । पविसइ लङ्कानयरिं, दसाणणो इन्दसमविभवो ॥१२॥

चिन्तेइ जणयतणया, हवइऽह विज्जाहराहिवो एसो । आयरइ अमज्जायं, कं सरणं तो पवज्जामि ? ॥१३॥

जाव य न एइ वत्ता, कुसला दइयस्स बन्धुसहियस्स । ताव न भुञ्जामि अहं, आहारं भणइ जणयसुया ॥१४॥

देवरमणं ति नामं, उज्जाणं पुरवरीए पुव्वेणं । ठविऊण तत्थ [1]सीया, नियययघरं पत्थिओ ताहे ॥१५॥

सीहासणे निविट्ठो, नाणाविहमणिमऊहपज्जलिए । सीयावम्महनडिओ, न लहइ निमिसं पि निव्वाणं ॥१६॥

खरदूसणम्मि वहिए, ताव पलावं कुणन्ति जुवईओ । मन्दोयरिपमुहाओ, लङ्काहिवइस्स घरिणीओ ॥१७॥

एक्कोयरस्स चलणे, चन्दणहा गेण्हिऊण रोवन्ती । भणइ हयासा पावा, अहयं पइ-पुत्तपरिमुक्का ॥१८॥

विलवन्ती भणइ तओ, लङ्कापरमेसरो अलं वच्छे ! । रुण्णेण किं व कीरइ ?, पुव्वकयं आगयं कम्मं ॥१९॥

वच्छे ! जेण रणमुहे, निगओ खरदूसणो तुह सुओ य । तं पेच्छ वहिज्जन्तं, सहायसहियं तु अचिरेणं ॥२०॥

संथाविऊण [2]बहिणी, आएसं जिणहरच्चणे दाउं । पविसइ नियमभवणं, दसाणणो मयणजरगहिओ ॥२१॥

मन्दोयरी पविट्ठा, दइयं दट्ठूण दीहनीसासं । भणइ विसायं सामिय !, मा वच्चसु दूसणवहम्मि ॥२२॥

अन्ने वि तुज्झ बन्धू, एत्थेव मया न सोइया तुम्हे । किं पुण दूसणसोगं, सामि ! अपुव्वं समुव्वहसि ? ॥२३॥

लज्जन्तो भणइ तओ, सुण सुन्दरि ! एत्थ सारसब्भावं । जइ नो रूसेसि तुमं, तो हं साहेमि ससवयणे ! ॥२४॥

---

पटुपटहगीतवादितरवेणाभिनन्दितः सह बलेन । प्रविशति लङ्कानगरीं दशानन इन्द्रसमविभवः ॥१२॥

चिन्तयति जनकतनया भवतीह विद्याधराधिप एषः । आचरत्यमर्यादां कं शरणं ततः प्रपद्ये ॥१३॥

यावन्नैति वार्ता कुशला दयितस्य बन्धुसहितस्य । तावन्न भुञ्जेऽहमाहारं भणति जनकसुता ॥१४॥

देवरमणमिति नामोद्यानं पुरवर्याः पूर्वेण । स्थापयित्वा तत्र सीतां निजगृहं प्रस्थितस्तदा ॥१५॥

सिंहासने निविष्टो नानाविधमणिमयूखप्रज्वलिते । सीता मन्मथनटितो न लभते निमषमपि निर्वाणम् ॥१६॥

खरदूषणे वधिते तावत्प्रलापं कुर्वन्ति युवतयः । मन्दोदरिप्रमुखा लङ्काधिपस्य गृहिण्यः ॥१७॥

एकोदरस्य चरणौ चन्द्रनखा गृहीत्वा रुदन्ती । भणति हताशा पापाऽहं पति-पुत्रपरिमुक्ता ॥१८॥

विलपन्ती भणति गतो लङ्कापरमेश्वरोऽलं वत्से ! । रुदितेन किं वा क्रियते ? पूर्वकृतमागतं कर्म ॥१९॥

वत्से ! येन रणमुखे निहतो खरदूषणस्तव सुतश्च । तं पश्य घ्नन्तं सहायसहितं त्वचिरेण ॥२०॥

संस्थाप्य भगिनिमादेशं जिनगृहाचर्ने दत्वा । प्रविशति निजभवनं दशाननो मदनज्वरगृहीतः ॥२१॥

मन्दोदरी प्रविष्य दयितं दृष्ट्वा दीर्घनिःश्वासम् । भणति विषादं स्वामिन् ! मा व्रज दूषणवधे ॥२२॥

अन्येऽपि तव बान्धवा अत्रैव मृता न शोचितास्त्वया । किं पुनो दुषणशोकं स्वामिन् ! अपूर्वं समुद्वहसि ? ॥२३॥

लज्जमानो भणति ततः श्रुणु सुन्दरि ! अत्र सारसद्भावम् । यदि न रुष्यषि त्वं ततोऽहं कथयामि शशिवदने ! ॥२४॥

---

१. सीयं-प्रत्य० । २. बहिणिं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सम्बुक्को जेण हओ, विवाइओ दूसणो य संगामे । सीया तस्स महिलिया, हरिऊण मए इहाऽऽणीया ॥२५॥**

**जइ नाम सा सुरूवा, न मए इच्छइ पइं मयणतत्तं । तो नत्थि जीवियं मे, तुज्झ पिए साहियं एयं ॥२६॥**

**दइयं एयावत्थं, दट्ठुं मन्दोयरी समुल्लवइ । महिला सा अकयत्था, जा देव ! तुमं न[1] इच्छेइ ॥२७॥**

**अहवा सयलतिहुयणे, सा एक्का रूव-जोव्वणगुणड्ढा । अइमाणगव्विएणं, जाइज्जइ जा तुमे सामि ! ॥२८॥**

**केऊरभूमियासू, इमासु बाहासु करिकरसमासु । किह नऽवगूहसि सामिय !, तं विलयं सबलकारेणं ॥२९॥**

**सो भणइ सुणसु सुन्दरि !, अत्थि इमं कारणं महागरुयं । बलगव्विओ वि सन्तो, जेण न गिण्हामि परमहिलं ॥३०॥**

**पुव्वं मए किसोयरि !, अणन्तविरियस्स पायमूलम्मि । साहुपडिचोइएणं, कह वि य एक्कं वयं गहियं ॥३१॥**

**जा नेच्छइ परमहिला, अपसन्ना जइ वि रूवगुणपुण्णा । सा वि मए बलेणं, न पत्थियव्वा सयाकालं ॥३२॥**

**एएण कारणेणं, बला न गिण्हामि परिगिहत्था हं । मा मे निवित्तिभङ्गो, होही पुव्वम्मि गहियाए॥३३॥**

**अचलिय-अखण्डियाए, एस निवित्तीए नरयपडिओ वि । उत्तारिज्जामि अहं, घडो व्व कूवम्मि रज्जूए ॥३४॥**

**मयणसरभिन्नहियय, जइ जीवन्तं मए तुमं महसि । सुन्दरि ! आणेहि लहुं, तं महिलाओसहिं गन्तुं ॥३५॥**

**एयावत्थसरीरं, कन्तं मन्दोदरी पलोएउं । जुवईहि संपरिवुडा, चलिया जत्थऽच्छए सीया ॥३६॥**

**उज्जाणं सुररमणं, संपत्ता तत्थ पायवसमीवे । मन्दोयरीए दिट्ठा, जणयसुया वणसिरी चेव ॥३७॥**

---

शम्बुको येन हतो व्यापादितो दूषणश्च संग्रामे । सीता तस्य महिला हृत्वा मयेहाऽऽनीता ॥२५॥

यदि नाम सा सुरुपा न मामिच्छति पतिं मदनतप्तम् । तदा नास्ति जीवितं मे तव प्रिये ! कथितमेतत् ॥२६॥

दयितमेतदवस्थं दृष्ट्वा मन्दोदरी समुल्लपति । महिला साऽकृतार्था या देव ! त्वां नेच्छति ॥२७॥

अथवा सकलत्रिभुवने सैका रुपयौवनगुणाढ्या । अतिमानगर्वितेन ध्यायते या त्वया स्वामिन् ॥२८॥

केयूरभूषितैरेतैर्बाहुभिः करिकरसमैः । कथं नालिङ्गसि स्वामिंस्तां वनितां सबलात्कारेण ॥२९॥

स भणति श्रुणु सुन्दरि ! अस्तीदं कारणं महागुरुकम् । बलगर्वितोऽपि सन् येन न गृह्णामि परमहिलाम् ॥३०॥

पूर्वं मया कृशोदरि ! अन्तवीर्यस्य पादमूले । साधुप्रतिचोदितेन कथमपि चैकं व्रतं गृहीतम् ॥३१॥

या नेच्छति परमहिलाऽप्रसन्ना यद्यपि रुपगुणपूर्णा । सापि च मया बलेन न प्रार्थयितव्या सदाकालम् ॥३२॥

एतेन कारणेन बलान्न गृह्णामि परगृहस्थीमहम् । मा मे निवृतिभङ्गो भवेत्पूर्वे गृहीतायाः ॥३३॥

अचलिताखण्डितयैष निवृत्या नरकपतितोऽपि । उत्तीर्येऽहं घट इव कूपे रज्ज्वा ॥३४॥

मदनशरभिन्नहृदयं यदि जीवन्तं मां त्वं काङ्क्षसे । सुन्दरि ! आनय लघु तां महिलौषधिं गत्वा ॥३५॥

एतदावस्थशरीरं कान्तं मन्दोदरी प्रलोक्य । युवतिभिस्संपरिवृत्ता चलिता यत्रास्ते सीता ॥३६॥

उद्यानं सुररमणं संप्राप्ता तत्र पादपसमीपे । मन्दोदर्या दृष्टा जनकसुता वनश्रीरिव ॥३७॥

---

१. न पत्थेइ-मु० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आलविऊण निविट्ठा, जंपइ मन्दोयरी सुणसु भद्दे ! । किं नेच्छसि भत्तारं, दहवयणं खेय[१]राहिवई ?॥३८॥

महिगोयरस्स अत्थे, किं अच्छसि दुक्खिया तुमं बाले ! । अणुहवसु देवसोक्खं, लद्धूण दसाणणं कन्तं ॥३९॥

जे राम-लक्खणा वि हु, तुज्झ हिए नियमेव उज्जुत्ता । तेहिं पि किं व कीरइ, विज्जापरमेसरे रुट्ठे ? ॥४०॥

मन्दोयरीए एवं, जं भणिया जणयनन्दिणी वयणं । जाया गग्गरकण्ठा, अंसुजलापुण्णनयणजुया ॥४१॥

पडिभणइ तओ सीया, सईउ किं एरिसाणि वयणाणि । जंपन्ति सुमहिलाओ, उत्तमकुलजायपुव्वाओ ? ॥४२॥

जइ वि हु इमं सरीरं, छिन्नं भिन्नं हयं च पुणरुत्तं । रामं मोत्तूण [२]पई, तह वि य अन्नं न इच्छामि ॥४३॥

जइ वि अखण्डलसरिसं, परपुरिसं सणंकुमाररूवं पि । तं पि य नेच्छामि अहं, किं वा बहुएहि भणिएहिं ? ॥४४॥

एत्थन्तरम्मि पत्तो, दहवयणो मयणवेयणुम्हविओ । सीयाए समब्भासे, अवट्ठिओ भणइ वयणाइं ॥४५॥

सुन्दरि ! विन्नप्पं सुण, हीणो हं केण वत्थुणा ताणं । जेण [३]ममं भत्तारं, नेच्छसि सुइरं पि भण्णन्ती ? ॥४६॥

भणइ तओ जणयसुया, अवसर मा मे छिवेहि अङ्गाइं । विज्जाहराहम ! तुमं, कह जंपसि एरिसं वयणं ? ॥४७॥

मइ जुवईण किसोयरि !, होहि तुमं उत्तमा महादेवी ।
माणेहि विसयसोक्खं, जहिच्छियं, जहिच्छियं मा चिरावेमि ॥४८॥

तो भणइ जणयतणया, समयं रामेण रण्णवासो य । अहियं मे कुणइ धिइं, सुरवइलोगं विसेसेइ ॥४९॥

भूसणरहिया वि सई, ताए सीलं तु मण्डणं होइ । सीलविहूणाए पुणो, वरं खु मरणं महिलियाए ॥५०॥

---

आलप्य निविष्ठा जल्पति मन्दोदरी श्रुणु भद्रे ! । किं नेच्छसि भर्तारं दशवदनं खेचराधिपतिम् ? ॥३८॥

महीगोचरस्यार्थे किमास्से दुःखिता त्वं बाले ! । अनुभव देहवसौख्यं लब्ध्वा दशाननं-कान्तम् ॥३९॥

यौ रामलक्ष्मणावपि खलु तव हिते नित्यमेवोद्यतौ । तैरपि किंवा क्रियते विद्यापरमेश्वरे रुष्टे ? ॥४०॥

मन्दोदर्यैव यद्भणिता जनकनन्दिनी वचनम् । जाता गद्गद्कण्ठाऽश्रुजलापूर्णनयनयुग्मा ॥४१॥

प्रतिभणति ततः सीता सत्यः किमिदृशानि वचनानि । जल्पन्ति सुमहिला उत्तमकुलजातपूर्वाः? ॥४२॥

यद्यपिह्विदं शरीरं छिन्नं भिन्नं हतं च पुनरुक्तम् । रामं मुक्त्वा पतिं तथापि चान्यं नेच्छामि ॥४३॥

यद्यप्याखण्डलसदृशं परपुरुषं सनत्कुमाररुपमपि । तमपि च नेच्छाम्यहं किं वा बहुभिर्भणितैः ? ॥४४॥

अत्रान्तरे प्राप्तो दशवदनो मदनवेदनोष्मापितः । सीताया समभ्यासेऽवस्थितो भणति वचनानि ॥४५॥

सुन्दरि ! विज्ञप्तं श्रुणु हीनोऽहं केन वस्तुना तयोः । येन माम् भर्तारं नेच्छसि सुचिरमपि भणन्ती ? ॥४६॥

भणति ततो जनकसुताऽपसर मा मे स्पृशाङ्गानि । विद्याधराधम ! त्वं कथं जल्पसीदृशं वचनम् ? ॥४७॥

मम युवतीनां कृशोदरि ! भव त्वमुत्तमा महादेवी । मानय विषयसुखं यथेच्छितं मा चिरय ॥४८॥

तदा भणति जनकतनया समकं रामेणारण्यवासश्च । अधिकं मे करोति धृतिं सुरपतिलोकं विशेषयति ॥४९॥

भूषणरहिताऽपि सती तस्याश्शीलं तु मण्डनं भवति । शीलविहीनायाः पुन र्वरं खलु मरणं महिलायाः ॥५०॥

---

१. खेयराहिवइं-प्रत्य० । २. पइं-प्रत्य० । ३. मए भत्तारं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जं एव निरागरिओ, [1]माया काउं समुज्जओ सहसा । अत्थमिओ दिवसयरो, ताव य जायं[2] तमं घोरं ॥५१॥

हत्थीसु केसरीसु य, वग्घेसु य भेसिया जणयधूया । न य पडिवन्ना सरणं, दसाणणं नेव सा खुहिया ॥५२॥

रक्खस-वेयालेसु य, अहियं भेसाविया वि नागेसु । न य पडिवन्ना सरणं, दसाणणं नेव सा खुहिया ॥५३॥

एवं दसाणणेणं, भेसिज्जन्तीए ववगया रयणी । नासेन्तो बहलतमं, ताव च्चिय उग्गओ सूरो ॥५४॥

तत्थेव वरुज्जाणे, ठियस्स सुहडा विभीसणाईया । सिग्घं च समणुपत्ता, पणमन्ति कमेण दहवयणं ॥५५॥

ताव य तहं रुयन्ती, दट्ठूण बिहीसणो जणयधूयं । पुच्छइ कहेहि भद्दे !, दुहिया भज्जा व कस्स तुमं ? ॥५६॥

सा भणइ वच्छ ! निसुणसु, दुहिया जणयस्स नरवरिन्दस्स । भामण्डलस्स बहिणी, राघवघरिणी अहं सीया ॥५७॥

जाव य मज्झ पिययमो, गवेसणट्ठे गओ कणिट्ठस्स । ताव अहं अवहरिया, इमेण पावेण रण्णाओ ॥५८॥

जाव न वच्चइ मरणं, मह विरहे राघवो तहिं रण्णे । ताव इमो दहवयणो, नेऊण मए समप्पेउ ॥५९॥

सुणिऊण तीए वयणं, बिहीसणो भायरं भणइ एवं । दित्ताणलसमसरिसी, किं परनारी [3]समाणीया ? ॥६०॥

अन्नं पि सुणसु सामिय !, तुज्झ जसो भमइ तिहुयणे सयले । परनारिपसङ्गेणं, मा अयसकलङ्किओ होहि ॥६१॥

उत्तमपुरिसाण पहू !, न य जुत्तं एरिसं हवइ कम्मं । बहुजणदुगुञ्छणीयं, दोग्गइगमणं च परलोए ॥६२॥

पडिभणइ खेयरेन्दो, किं परदव्वं महं वसुमईए । दुपयचउप्पयवत्थुं, जस्स न सामी अहं जाओ ? ॥६३॥

---

यदेवं तिरस्कृतो मायां कर्तुं समुद्यतः सहसा । अस्तमितो दिवाकरस्तावच्चजातं तमो घोरम् ॥५१॥

हस्तिभिः केसरभिश्च व्याघ्रैश्च भेषिता जनकदुहिता । न च प्रतिपन्ना शरणं दशाननं नैव सा क्षुब्धा ॥५२॥

राक्षस-वैतालैश्चाधिकं भेषयिताऽपि नागैः । न च प्रतिपन्ना शरणं दशाननं नैव सा क्षुब्धा ॥५३॥

एवं दशाननेन भेषयन्त्या व्यपगता रजनी । नाशयन्बहुलतमस्तावदेवोद्गतः सूर्यः ॥५४॥

तत्रैव वरोद्याने स्थितस्य सुभटा बिभीषणादयः । शीघ्रं च समनुप्राप्ताः प्रणमन्ति क्रमेण दशवदनम् ॥५५॥

तावच्च तत्र रुदन्तीं दृष्ट्वा बिभीषणो जनकदुहितरम् । पृच्छति कथय भद्रे ! दुहिता भार्या वा कस्य त्वम् ? ॥५६॥

सा भणति वत्स ! निश्रुणु दुहिता जनकस्य नरवरेन्द्रस्य । भामण्डलस्य भगिनी राघवगृहिण्यहं सीता ॥५७॥

यावच्च मम प्रियतमो गवेषणार्थे गतः कनिष्ठस्य । तावदहमपहृतानेन पापेनारण्यात् ॥५८॥

यावन्न गच्छति मरणं मम विरहे राघवस्तत्रारण्ये । तावदयं दशवदनो नीत्वा मां समर्पयेत् ॥५९॥

श्रुत्वा तस्या वचनं बिभीषणो भ्रातरं भणत्येव । दिप्तानलसमसदृशी किं परनारी समानीता ? ॥६०॥

अन्यदपि श्रुणु स्वामिंस्तव यशो भ्रमति त्रिभुवने सकले । परनारिप्रसङ्गेन माऽयशः कलङ्कितो भवेत् ॥६१॥

उत्तमपुरुषाणां प्रभो ! न च युक्तमिदृशं भवति कर्म । बहुजनजुगुप्सनीयं दुर्गतिगमनं च परलोके ॥६२॥

प्रतिभणति खेचरेन्द्र किं परद्रव्यं मम वसुमत्याम् । द्विपदचतुष्पदवस्तु यस्य न स्वाम्यहं जातः ? ॥६३॥

---

१. मायं-प्रत्य० । २. तमन्धार-प्रत्य० । ३. इहाऽऽणीया-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एत्थन्तरे विलग्गो, भुवणालंकारमत्तमायङ्गं । सीया वि य आरुहिया, पुप्फविमाणे दहमुहेणं ॥६४॥

गय-तुरय-जोह-रहवर-संघट्टुट्ठन्तमङ्गलरवेणं । अहिणन्दिओ य वच्चइ, तणमिव गणिओ विदेहाए ॥६५॥

पत्तो समत्तकुसुमं, उज्जाणं विविहपायवसमिद्धं । पुप्फगिरिस्स मणहरं, ठियं च उवरिं समन्तेणं ॥६६॥

उज्जाणस्स पएसा, सत्त तुमं ताव सुणसु मगहवई । पढमं पइण्णनामं, आणन्दं तह य सुहसेवं ॥६७॥

सामुच्चयं चउत्थं, पञ्चमयं चारणं ति नामेणं । पियदंसणं च छट्ठं, पउमुज्जाणं च सत्तमंय ॥६८॥

पढमं पइण्णगं ति य, धरणियले तह परं जणाणन्दं । नाणाविहतरुछन्नं, तत्थ जणो नायरो रमइ ॥६९॥

तइयम्मि उ सुहसेवे, समुच्चए तह चउत्थए रम्मे । कीलइ विलासिणिजणो, सुगन्धकुसुमोहबलिकम्मो ॥७०॥

चारणमणाभिरामे, उज्जाणे चारणा समणसीहा । सज्झाय-झाणनिरया, वसन्ति निच्चं दढधिईया ॥७१॥

तम्बोलवल्लिपउरं, केयइधूलीसुधूसरामोयं । पियदंसणं च छट्ठं, उज्जाणं मणहरालोयं ॥७२॥

पउमवरुज्जाणं तं, सत्तमयं विविहरइयसोवाणं । पुप्फगिरिपवरसिहर, अहिट्ठियं पण्डगवणं व ॥७३॥

नारङ्ग-फणस-चम्पग-असोग-पुन्नाग-तिलयमाईहिं । रेहन्ति उववणाइं, कोइलमुहरानिणायाइं ॥७४॥

वावीसु दीहियासु य, जणवयण्हाणावगाहणजलासु । कमलुप्पलछन्नासुं, ताइं अहियं विरायन्ति ॥७५॥

तत्थ य पउमुज्जाणे, नामेणासोगमालिणी वावी । कीलणहरेसु रम्मा, विमलजला काणणसणाहा ॥७६॥

---

अत्रान्तरे विलग्नो भुवनालङ्कारमत्तमातङ्गम् । सीताऽपि चारोहिता पुष्पविमाने दशमुखेन ॥६४॥

गज-तुरग-योध-रथवर-संघट्टोत्तिष्ठन्मङ्गलरवेण । अभिनन्दितश्च व्रजति तृणमिव गणितो वैदेह्या ॥६५॥

प्राप्तः समस्तकुसुममुद्यानं विविधपादपसमृद्धम् । पुष्पगिरे र्मनोहरं स्थितं चोपरि समन्तेन ॥६६॥

उद्यानस्य प्रदेशाः सप्त त्वं तावच्छृणु मगधपते ! । प्रथमं प्रकीर्णनामानन्दं तथा च सुखसेवम् ॥६७॥

समुच्चयं चतुर्थं पञ्चमं चारणमिति नाम्ना । प्रियदर्शनं च षष्ठं पद्मोद्यानं च सप्तमम् ॥६८॥

प्रथमं प्रकीर्णकमिति च धरणितले तथा परं जनानन्दम् । नानाविधतरुच्छन्नं तत्र जनो नागरिको रमते ॥६९॥

तृतीये तु सुखसेवे समुच्चये तथा चतुर्थे रम्ये । क्रीडति विलासिनिजनः सुगन्धकुसुमौघबलिकर्मा ॥७०॥

चारणमनोऽभिराम उद्याने चारणाः श्रमणसिंहाः । स्वाध्याय ध्याननिरता वसन्ति नित्यं दृढधृतयः ॥७१॥

ताम्बुलवल्लीप्रचुरं केतकीधूलीसुधूसरामोदम् । प्रियदर्शनं च षष्टमुद्यानं मनोहरालोकम् ॥७२॥

पद्मवरोद्यानं तं सप्तमं विविधरचितसोपानम् । पुष्पगिरिप्रवरशिखरेऽधिष्ठितं पाण्डकवनमिव ॥७३॥

नारङ्ग-फणस-चम्पकाशोक-पुन्नाग-तिलकादिभिः । राजन्त उपवनानि कोकिलमधुरनिनादानि ॥७४॥

वापिभि दीर्घिकाभिश्च जनपदस्नानावगाहनजलाभिः । कमलोत्पल्लछन्नाभिस्तान्यधिकं विराजन्ते ॥७५॥

तत्र च पद्मोद्याने नाम्नाऽशोकमालिनी वापिः । क्रीडनगृहै रम्या विमलजला काननसनाथा ॥७६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्थासोगमहातरुसंछन्ने ठाविया जणयधूया । पण्डगवणे व्व नज्जइ, अवइण्णा सुरवहू चेव ॥७७॥
रावणपवेसियाहिं, जुवईहि अणेयचाडुकारीहिं । निययं पि पसाइज्जइ, वीणागन्धव्वनट्टेहिं ॥७८॥
न करेइ मज्जणविहिं, न य भुञ्जइ नेय देइ उल्लावं । एगग्गमणा सीया, अच्छइ रामं विचिन्तेन्ती ॥७९॥
गन्तूण सव्वमेयं, कहन्ति लङ्काहिवस्स दूईओ । जा न कुणइ आहारं, सा किह सामी तुमं महइ ? ॥८०॥
तत्तो सो दहवयणो, मयणाणलपज्जलन्तसव्वङ्गो । पडिओ वसणसमुद्दे, अहियं चिन्ताउरो जाओ ॥८१॥
सोयइ गायइ विलवइ, दीहुण्हे तत्थ मुयइ नीसासे । कोट्टिमतलं निसण्णो, अप्फालइ दाहिणकरेणं ॥८२॥
सहसा समुट्ठिऊणं, वच्चइ भवणाउ निग्गओ सन्तो । पुणरवि नियत्तइ लहुं, सीया सीय त्ति जंपन्तो ॥८३॥
लोलइ कमलोत्थरणे, सिंचन्तो बहलचन्दणरसेणं । उट्ठइ चलइ वियम्भइ, गहिओ मयणग्गितावेणं ॥८४॥
जंपइ भुयासु तुलिओ, कइलासो खेयरा जिया सव्वे । सो किह मोहेण अहं, मसिरासिनिरूविओ काउं ? ॥८५॥
अच्छउ ताव दहमुहो, मन्तीहि समं बिहीसणो मन्तं । काऊण समाढत्तो, भाइसिणेहुज्जयमईओ ॥८६॥
संभिन्नो भणइ तओ, अम्हं सामिस्स दइवजोगेणं । पडिओ दाहिणहत्थो, जं चिय खरदूसणो निहओ ॥८७॥
सुहकम्मपहावेणं, विराहिओ लक्खणस्स संगामे । सिग्घं च समणुपत्तो, वहमाणो बन्धवसिणेहं ॥८८॥
चलिया य इमे सव्वे, कइद्धया पवणपुत्तमाईया । काहिन्ति पक्खवायं, ताणं सुग्गीवसन्निहिया ॥८९॥

---

तत्राशोकमहातरुसंच्छन्ने स्थापिता जनकदुहिता । पाण्डकवन इव ज्ञायतेऽवतीर्णा सुरवधुरिव ॥७७॥
रावणप्रवेशिताभि र्युवतिभिरनेकचाटुकारिभिः । नित्यमपि प्रसाद्यते वीणागान्धर्वनृत्यैः ॥७८॥
न करोति मज्जनविधिं न च भुनक्ति नैव ददात्युल्लापम् । एकाग्रमनाः सीताऽस्ति रामं विचिन्त्यन्ती ॥७९॥
गत्वा सर्वमेतत्कथयन्ति लङ्काधिपस्य दूत्यः । या न करोत्याहारं सा कथं स्वामिंस्त्वां काङ्क्षते ? ॥८०॥
ततः स दशवदनो मदनानलप्रज्वलत्सर्वाङ्गः । पतितो व्यसनसमुद्रेऽधिकं चिन्तातुरो जातः ॥८१॥
शोचति गायति विलपति दीर्घोष्णांस्तत्र मुञ्चति निःश्वासान् । कुट्टिमतलं निसण्ण आस्फालयति दक्षिणकरेण ॥८२॥
सहसा समुत्थाय गच्छति भवनान्निर्गतस्सन् । पुनरपि निर्वर्तते लघु सीता सीतेति जल्पन् ॥८३॥
लोठति कमलास्तरणे सिञ्चन्बहलचन्दनरसेण । उत्तिष्ठति चलति विजृम्भते गृहीतो मदनाग्नितापेन ॥८४॥
जल्पति भुजाभ्यांतोलितः कैलाशः खेचरा जिताः सर्वे । स कथं मोहेनाहं मषीराशि निरुपितः कर्तुम् ? ॥८५॥
सताम् तावद्दशमुखो मन्त्रिभिः समं बिभीषणो मन्त्रम् । कर्तुं समारब्धो भ्रातृस्नेहोद्यतमतिः ॥८६॥
संभिन्नो भणति ततोऽस्माकं स्वामिनो दैवयोगेन । पतितो दक्षिणहस्तो यदेव खरदूषणो निहतः ॥८७॥
शुभकर्मप्रभावेण विराधितो लक्ष्मणस्य संग्रामे । शीघ्रं च समनुप्राप्तो वहन्बाधन्वस्नेहम् ॥८८॥
चलिताश्चेमे सर्वे कपिध्वजाः पवनपुत्रादयः । करिष्यन्ति पक्षपातं तेषां सुग्रीवसंनिहिताः ॥८९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अह भणइ पञ्चवयणो, मन्ती मा भणह दूसणं वहियं । सूराण गई एसा, सुहडाणं हवइ संगामे ॥९०॥

जइ चिय तस्स सहीणो, विराहिओ असिवरं च रविभासं ।
लङ्काहिवस्स तह वि य, किं कीरइ लक्खणेण रणे ? ॥९१॥

भणिओ सहस्समइणा, पञ्चमुहो किं व अत्थहीणाइं । वयणाइ भाससि तुमं, अगणिन्तो सामियस्स हियं ? ॥९२॥

मा परिहवइ कयाई, तुब्भे नाऊण वेरियं थोवं । अप्पो वि देसयाले, किं न डहइ तिहुयणं अग्गी ? ॥९३॥

विज्जाहराण राया, आसग्गीवो महाबलसमग्गो । थोवेण वि संगामे, निहओ पुव्विं तिवुट्ठेणं ॥९४॥

तम्हा अकालहीणं, करेह [1]लङ्का सुदुग्गपायारा । सम्मणेह जणवयं, भिच्चा य बहुप्पयाणेणं ॥९५॥

ताहे बिभीसणेणं, रइओ मायाए दुग्गमो सिग्घं । पायारो अइविसमो, निरन्तरो कूडजन्तेसु ॥९६॥

दिन्ना य रक्खपाला, समन्तओ खेयरा बलसमग्गा । समरे अभग्गमाणा, गहियाउह-पहरणा-ऽऽवरणा ॥९७॥

एवमिमं सुणिऊण य तुब्भे, रावणवम्महदुक्खसमूहं ।
वज्जह निच्चमवि परदारं, जेण जसं विमलं अणुहोह ॥९८॥

॥ इय पउमचरिए मायापायारविउव्वणं नाम छायालीसं पव्वं समत्तं ॥

---

अथ भणति पञ्चवदनो मन्त्री मा भण दूषणं वहतः । शूराणां गतिरेषा सुभटानां भवति संग्रामे ॥९०॥

यद्येव तस्य स्वाधीनो विराधितोऽसिवरं च रविभासम् । लङ्काधिपस्य तथापि च किं क्रियते लक्ष्मणेन रणे ? ॥९१॥

भणितः सहस्रमतिना पञ्चमुखः किं वार्थहीनानि । वचनानि भाषसे त्वमगणयन्स्वामिनो हितम् ? ॥९२॥

मा परिभव कदाचित्त्वं ज्ञात्वा वैरिकं स्तोकम् । अल्पोऽपि देशकाले किं न दहति त्रिभुवनमग्निः ? ॥९३॥

विद्याधराणां राजाऽश्वग्रीवो महाबलसमग्रः । स्तोकेनापि संग्रामे निहतः पूर्वं त्रिपृष्टेन ॥९४॥

तस्मादकालहीनं कुरुत लङ्कां सुदुर्गप्राकाराम् । सन्मानयत जनपदं भृत्यांश्च बहुप्रदानेन ॥९५॥

तदा बिभीषणेन रचितो मायया दुर्गमः शीघ्रम् । प्राकारोऽतिविषमो निरन्तरः कूटयन्त्रैः ॥९६॥

दत्ताश्च रक्षपालाः समन्ततः खेचरा बलसमग्राः । समरेऽभग्नमाना गृहीतायुधप्रहरणावरणाः ॥९७॥

एवमिदं श्रुत्वा च यूयम् रावणमन्मथदुःखसमूहम् । वर्जयत नित्यमपि परदारां येन यशो विमलमनुभवत ॥९८॥

**॥ इति पद्मचरित्रे मायाप्राकारविकुर्वणं नाम षट्चत्वारिंशतमं पर्वं समाप्तम् ॥**

---

१. लङ्कं-प्रत्य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# આચાર્યશ્રી ૐકારસૂરિ જ્ઞાન મંદિર ગ્રંથાવલી

## પ્રભુવાણી પ્રસાર સ્થંભ (યોજના-૧,૧૧,૧૧૧)

૧. શ્રી સમસ્ત વાવ પથક શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ-ગુરુમૂર્તિ પ્રતિષ્ઠા-સ્મૃતિ
૨. શેઠશ્રી ચંદુલાલ કકલચંદ પરીખ પરિવાર, વાવ
૩. શ્રી સિદ્ધગિરિ ચાતુર્માસ આરાધના (સં. ૨૦૫૭) દરમ્યાન થયેલ જ્ઞાનખાતાની આવકમાંથી.
હસ્તે : શેઠશ્રી ધુડાલાલ પુનમચંદભાઈ હેક્કડ પરિવાર, ડીસા, બનાસકાંઠા
૪. શ્રી ધર્મોત્તેજક પાઠશાળા, શ્રી ઝીંઝુવાડા જૈન સંઘ, ઝીંઝુવાડા
૫. શ્રી સુઈગામ જૈન સંઘ, સુઈગામ
૬. શ્રી વાંકડિયા વડગામ જૈન સંઘ, વાંકડિયા વડગામ
૭. શ્રી ગરાંબડી જૈન સંઘ, ગરાંબડી
૮. શ્રી રાંદેરરોડ જૈન સંઘ-અડાજણ પાટીયા, રાંદેરરોડ, સુરત
૯. શ્રી ચિંતામણી પાર્શ્વનાથ જૈન સંઘ પાર્લા (ઈસ્ટ), મુંબઈ
૧૦. શ્રી આદિનાથ તપાગચ્છ શ્વે.મૂ.પૂ.જૈન સંઘ, કતારગામ, સુરત
૧૧. શ્રી કૈલાસનગર જૈન સંઘ, કૈલાસનગર, સુરત
૧૨. શ્રી ઉચોસણ જૈન સંઘ, સમુબા શ્રાવિકા આરાધના ભવન, સુરત જ્ઞાનખાતેથી
૧૩. શ્રી વાવ પથક જૈન શ્વે. મૂ.પૂ. સંઘ, અમદાવાદ
૧૪. શ્રી વાવ જૈન સંઘ, વાવ, બનાસકાંઠા
૧૫. કુ. નેહલબેન કુમુદભાઈ (કટોસણ રોડ)ની દીક્ષા પ્રસંગે થયેલ આવકમાંથી
૧૬. શ્રી આદિનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નવસારી
૧૭. શ્રી ભીલડીયાજી પાર્શ્વનાથ જૈન દેરાસર પેઢી, ભીલડીયાજી
૧૮. શ્રી નવજીવન જૈન શ્વે. મૂ.પૂ. સંઘ, મુંબઈ

## પ્રભુવાણી પ્રસારક (યોજના-૬૧,૧૧૧)

૧. શ્રી દિપા શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, રાંદેરરોડ, સુરત
૨. શ્રી સીમંધરસ્વામી મહિલા મંડળ, પ્રતિષ્ઠા કોમ્પલેક્ષ, સુરત
૩. શ્રી શ્રેણીકપાર્ક જૈન શ્વે.મૂ. સંઘ, ન્યૂ રાંદેરરોડ, સુરત
૪. શ્રી પુણ્યપાવન જૈન સંઘ, ઈશિતા પાર્ક, સુરત
૫. શ્રી શ્રેયસ્કર આદિનાથ જૈન સંઘ, નીઝામપુરા, વડોદરા

## પ્રભુવાણી પ્રસાર અનુમોદક (યોજના - ૩૧,૧૧૧)

૧. શ્રી મોરવાડા જૈન સંઘ, મોરવાડા
૨. શ્રી ઉમરા જૈન સંઘ, સુરત
૩. શ્રી શત્રુંજય ટાવર જૈન સંઘ, સુરત
૪. શ્રી ચૌમુખજી પાર્શ્વનાથ જૈન મંદિર ટ્રસ્ટ, શ્રી જૈન શ્વેતાંબર તપાગચ્છ સંઘ ગઢસિવાના (રાજ.)
૫. શ્રીમતી તારાબેન ગગલદાસ વડેચા-ઉચોસણ
૬. શ્રી સુખસાગર અને મલ્હાર એપાર્ટમેન્ટ સુરતની શ્રાવિકાઓ તરફથી
૭. રવિજ્યોત એપાર્ટમેન્ટ, સુરતની શ્રાવિકાઓ તરફથી
૮. અઠવાલાઈન્સ જૈન સંઘ, પાંડવબંગલો, સુરત શ્રાવિકાઓ તરફથી
૯. શ્રી આદિનાથ તપાગચ્છ શ્વે.મૂર્તિપૂજક જૈન સંઘ, કતારગામ, સુરત
૧૦. શ્રીમતી વર્ષાબેન કર્ણાવત, પાલનપુર
૧૧. શ્રી શાંતિનિકેતન સરદારનગર જૈન સંઘ, સુરત
૧૨. શ્રી પાર્શ્વનાથ જૈન સંઘ, ન્યુ રામારોડ, વડોદરા

## પ્રભુવાણી પ્રસાર ભક્ત (યોજના - ૧૫,૧૧૧)

૧. શ્રી દેસલપુર (કંઠી) શ્રી પાર્શ્વચંદ્રગચ્છ ૨. શ્રી પ્રાંગધ્રા શ્રી પાર્શ્વચંદ્રસૂરીશ્વરગચ્છ ૩. શ્રી અઠવાલાઈન્સ જૈન સંઘ, સુરત શ્રાવિકા ઉપાશ્રય

## વાવ નગરે પૂજ્ય આચાર્ય ભગવંત ૐકારસૂરિ મહારાજાની ગુરૂ મૂર્તિ પ્રતિષ્ઠા સ્મૃતિ

| | | | |
|---|---|---|---|
| ૧. | રૂા. | ૨,૧૧,૧૧૧ | શ્રી વાવ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ |
| ૨. | રૂા. | ૧,૧૧,૧૧૧ | શ્રી વાવ પથક શ્વે.મૂ. જૈન સંઘ, અમદાવાદ |
| ૩. | રૂા. | ૩૧,૦૦૦ | શ્રી સુઈગામ જૈન સંઘ |
| ૪. | રૂા. | ૩૧,૦૦૦ | શ્રી બેણપ જૈન સંઘ |
| ૫. | રૂા. | ૩૧,૦૦૦ | શ્રી ઉચોસણ જૈન સંઘ |
| ૬. | રૂા. | ૩૧,૦૦૦ | શ્રી ભરડવા જૈન સંઘ |
| ૭. | રૂા. | ૩૧,૦૦૦ | શ્રી અસારા જૈન સંઘ |
| ૮. | રૂા. | ૩૧,૦૦૦ | શ્રી ગરાંબડી જૈન સંઘ |
| ૯. | રૂા. | ૩૧,૦૦૦ | શ્રી માડકા જૈન સંઘ |
| ૧૦. | રૂા. | ૩૧,૦૦૦ | શ્રી તીર્થગામ જૈન સંઘ |
| ૧૧. | રૂા. | ૩૧,૦૦૦ | શ્રી કોરડા જૈન સંઘ |
| ૧૨. | રૂા. | ૩૧,૦૦૦ | શ્રી ઢીમા જૈન સંઘ |
| ૧૩. | રૂા. | ૩૧,૦૦૦ | શ્રી માલસણ જૈન સંઘ |
| ૧૪. | રૂા. | ૩૧,૦૦૦ | શ્રી મોરવાડા જૈન સંઘ |
| ૧૫. | રૂા. | ૩૧,૦૦૦ | શ્રી વર્ધમાન શ્વે.મૂ.પૂ.જૈન સંઘ, કતારગામ દરવાજા, સુરત |
| ૧૬. | રૂા. | ૧૧,૧૧૧ | શ્રી વાસરડા જૈન સંઘ, સેવંતીલાલ મ. સંઘવી |

• • •



Jain Education International For Personal & Private Use Only www.jainelibrary.org




KIRIT GRAPHICS - 09898490091

Jain Education International
For Personal & Private Use Only
www.jainelibrary.org